स्तु दृष्टे खरांशिभिः पीडितदेहभाक्स्यात्॥८७॥केतौ विलग्ने बहुपापदृष्टे पिशाचचौरैर्भवति प्रवंभीः॥
लग्ने चरे तद्भवने स्वरे वा चरस्थिते संचरति प्रजातः॥८८॥संचारशीलः स्वनरो विलग्ने लग्नांशके चैवमुदाह
रंति॥विदेशभाग्यः स्वरभे विलग्ने चरे तदीशे चरखेटदृष्टे॥८९॥स्थिरे स्वदेशे बहुभाग्ययुक्तः स्थिरे ग्रहैर्भूरिध
नान्वितः स्यात्॥मिश्रे ग्रहैः संयुतभाग्यकीर्तिर्नानाविदेशे विचरन्कुमार्गे॥९०॥लग्ने स्वरे वीर्ययुते स्वतुंगे गं
भीरगामी पुरुषोऽन्यथा स्यात्॥हीने तदीशे स जडः शुभैस्तः दृष्टे युते वा न तथाविधं तत्॥९१॥लग्ने शुभे शो
भनदृष्टियुक्ते बाल्यात्सुखं तत्र हि पापयोगात्॥दुःखी भवेत्पापबहुत्वयोगे लग्नेतु बाल्यान्मरणं तकालः॥९२॥

सम.
१२

वर्गोत्तमांशे यदि लग्ननाथे स्वोच्चांशके वा स्वसुहृद्दृकाणे ॥ शुभान्विते वा शुभदृष्टियाते नरो भवेदामरणां
त सौख्यं ॥१३॥ लग्नांत्यलाभे शुभखेचरेंद्रे लग्नेश्वरे केंद्रगते बलाढ्ये ॥ सिंहासनांशे यदि देवपूज्ये ज्ञा
तो भवेदादिममध्यसौख्यः ॥१४॥ लग्नाथे सास्थे शुभदृष्टियोगे लग्नेश्वरे शोभनखेचरेंद्रे ॥ पारावतांशे
यदि सानवेद्ये जातो भवेदंतिममध्यसौख्यः ॥१५॥ बाल्ये सुखी स्यात्त्रिदशेंद्रपूज्ये केंद्रे युते लग्नपतिर्बलाढ्यः
॥ पारावतांशे यदि लग्ननाथे स्त्रीपुत्रमित्रार्थसुखान्वितोयं ॥१६॥ देवलोकांशके शुक्रे लग्नेशे गोपुरांशा
के ॥ लग्ने शुभग्रहैर्दृष्टे मध्यांते सौख्यमाप्नुयात् ॥१७॥ लग्ने शुभे धने पापे केंद्रे पापसमन्विते ॥ लग्नेश्वरे नी
तमांशे आदौ दुःखमतः सुखं ॥१८॥ लग्ने पापे धने सौम्ये भाग्येकक्रि शुभग्रहः ॥ लग्नेशे देवलोकस्थे बाल्ये
सौख्यमतोन्यथा ॥१९॥ लग्नेश्वरे कर्मगते दिनेशे लग्नान्विते शोभनखेचरेंद्रे ॥ योगे ग्रहे दृष्टे तनुपे स्वतुंगे
सत्कीर्त्तिमान्सुनयो पितृज्ञः ॥१०॥ पापे विलग्ने शपतौ सराहौ केंद्रस्थिते कर्मणि पापखेटे ॥ नीच
ग्रहे लग्नगते केंद्रे हेतुष्कीर्त्तियुक्तः सभवेत्तदानीं ॥१॥ आरोहवीर्ये तु विलग्ननाथे भाग्याधिपे नाहशा
वीर्ययुक्ते ॥ विख्यातकीर्त्तिः प्रभवो नरः स्याच्छुभग्रहेणापि समन्विते स्यात् ॥२॥ आरोहवयसि पूर्वार्द्धे
सौख्यं लग्ने भ्रगोः सुते ॥ दुःखं त्वपरभागे च वंधो पापे सुते तथा ॥३॥ लग्नाधिपे शुभयुते यदि तुंगभा

गे केंद्रत्रिकोणसहिते शुभदृष्टियुक्ते॥ कर्माधिपेन सहिते यदि वा स्वगेहे सद्भाग्यकीर्त्तिधनधान्यविरा
युरेति॥४॥ लग्नाधिपोऽतिबलवान् शुभैरदृष्टः केंद्रस्थितः शुभखगैरवलोक्यमानः॥ मृत्युं विहाय वि
दधाति सुदीर्घमायुः सार्द्धं गुणैर्विविधैरूर्जितया च लक्ष्म्या॥५॥ केंद्रत्रिकोणनिधनेषु न यस्य पा
पा लग्नाधिपः सुरगुरुश्च चतुष्टयस्थौ॥ भुक्त्वा शुभानि विविधानि सुपुण्यकर्मा जीवेच्च वत्सरशतं
स विमुक्तरोगः॥६॥ लग्नेश्वरादतिबली निधनेश्वरोऽसौ केंद्रस्थिते र्निधनरिःफगतेश्च पापैः॥ तस्या
युरल्पमथवा यदि मध्यमायुरुत्साहसंकटवशात्परमायुरेति॥७॥ एकांशकस्था बुधजीवशुक्राः स्वे
केंद्रगा लग्नमुपागता वा॥ धर्मेशतो जन्मनि यस्य जंतोः स सायनाद्यैर्युगमादधाति॥८॥ एकांश
कस्था बुधशुक्रमंदा धर्मे स्थिता लग्नमुपागता वा॥ जातो नरः सद्व्रजितः स बाल्ये युगांतमायुर्वहुशा
स्वकर्ता॥९॥ मंदांशकस्थारविजीवभौमाः कर्माश्रिता धर्मयुता वलाढ्याः॥ राज्यावसाने हिमगौ वि
लग्ने युगांतमायुः श्रियमादधाति॥१०॥ धर्मेश्वरे धर्मगते च यस्य भौमांशकस्थे हिमगौ च दृष्टे॥ मु
नीश्वरत्वं मुनियोगजातः शास्त्रादिकर्ता युगमादधाति॥११॥ लग्नेशे धनराशिस्थे लग्नेशस्थांशपे पि
वा॥ तथा स्थिते लाभनाथे विंशद्वर्षात्परं सुखं॥१२॥ लग्नेशस्थांशनाथे तु केंद्रकोणाख्यसंयुते॥ लाभे

=सुहृद्भूः५ + ६१

शेवा तथा युक्ते त्रिंशाद्वर्षात्परं सुखं ॥१३॥ लग्नेशे शुभराशिस्थे शुभग्रहनिरीक्षिते। गोपुरांशगते वापि
षोडशाद्वात्परं सुखं ॥१४॥ ग्रहयोगेक्षणाभ्यां तु बलाबलवशादपि ॥ लग्नस्यैवं फलं प्रोक्तं श्रीमहेश्वरश
र्मणा ॥१५॥ ॥ इति सर्वार्थचिंतामणौ द्वितीयोध्यायः॥ ॥ कौटुंबाढ्येत्यानसुखं च वाकूदृक्क्रियाक्रियापूर्णाह्ना
न्॥ विद्याशुक्तिविशेषान्विद्यामंत्रप्रभेदांश्च ॥१॥ लग्नेश्वरेण सहिते यदि वित्तनाथे दुःस्थेक्षिते नाशन
मथा स्फुटमिदं द्वियुक्ते ॥ नेत्रेश्वरे तनुगते यदि नैशिकांधः स्वोच्चे शुभग्रहयुते न तथा वदंति ॥२॥ भान्वन्वितल
ग्नपतिभिः सहिते तदीशे जात्यंधको भवति रंध्रगतेन्त्यगेपि ॥ रिःफेश्वरासुतगतेन यनं हि वामं नाशांतप्र
प्रकृतिस्तु यंतुते तदन्यत् ॥३॥ चंद्रार्कसंयुक्तहरौ विलग्ने शन्यारदृष्टे हि विनाशमायुः ॥ शुभाशुभैर्बुद्बुद
लोचनः स्याच्छुभैर्न दोषः सहिते क्षणाभ्यां ॥४॥ निमीलिताक्षः स्तु धने सपापे तदीश्वरे शोभनदृष्टियुक्ते
॥ लग्नाधिपे पापखगेन युक्ते लग्नान्विते कारकखेचरेंद्रे ॥५॥ नेत्रे शुभे तद्भवनेश्वरे वा सौम्यान्विते का
रकखेचरेंद्रे ॥ लग्नेश्वरेणापि युते थ दृष्टे विशालदृष्टिः स नरो विशेषात् ॥६॥ शन्यारयोगे गुलिकेन यु
क्ते नेत्रेश्वरे तन्नतु रोगनेत्रः ॥ नेत्रे यदा पापवदुत्ययोगे यमेन दृष्टे स तु रोगनेत्रः ॥७॥ नेत्रेश्वरस्यांशप
तौ सपापे पापग्रहक्षेत्रगतेन तथैव ॥ नेत्राधिपे वा सरनायके तु धरासुते वा गुलिकार्कदृष्टे ॥८॥ उष्णो

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स०टि० द्रवेनाप्ययपित्तकासैर्नेत्ररोगोभवतिप्रमादः॥ अथवाजरोगैर्नयनस्यरोगंतत्स्थानयेदुःस्थगतेससौम्ये॥
१४ ॥९॥सहोदरात्मोद्भवमातृगेहकलत्रमित्रादिफलंतथैव॥ व्यारपुत्रेसतिनेत्रनाथेदृष्टेशुभाभ्यांनयनां
तरक्तः॥१०॥सौम्यग्रहोकारकभावनाथौस्यातांशुभादृष्टिरसौम्यनानु॥पापग्रहैर्वीक्षणयोगतश्च
पित्रादिकानांफलमेवमाहुः॥११॥कुटुंबराशेरधिपेससौम्येकेंद्रस्थितेस्वोच्चसुहृद्गृहेवा॥सौम्यर्क्षयुक्ते
यदिजातपुण्यःकुटुंबसंरक्षणवाग्विभूतिः॥१२॥स्वोच्चस्थितेशोभनखेचरेंद्रेकुटुंबराशौशुभवीक्षिते
वा॥अनेकसंरक्षणजातपुण्योलग्नेश्वरेवीर्ययुतेसतुंगे॥१३॥गुरौकुटुंबेस्वपतौयदिस्याद्भृगौयुवेता
दृशाभावनाथे॥स्वोच्चेसुहृत्क्षेत्रगतेयथेवंधीपरोपकारीजनरक्षकःस्यात्॥१४॥पापेनुतद्राशिपतौ
नहानीपापेक्षितेपापयुतेस्वतुंगे॥लग्नेश्वरेहीनबलेसपापेस्वजीवनोपायसहायकोना॥१५॥पा
पेवकुलेसकुटुंबराशौपापेक्षितेहीनबलेतरीशे॥दुःस्थोविलग्नाधिपतौसपापेस्वजीवनंनास्ति
सुखेनतस्य॥१६॥पतौकुटुंबस्यतृतीयराशौस्थितेयदापुंग्रहसौम्यदृष्टे॥शुभेस्थितेखेचरनाथ
केस्यात्स्वतुंगगेसर्वजनावनेशः॥१७॥स्वोच्चत्रिकोणायगतेकुटुंबराशेःपतौलग्नपतौबलाढ्ये॥कु राम०
टुंबनाथस्थितराशिनाथेकेंद्रस्थितेसर्वजनावनेशः॥१८॥तन्नाथयोगेपुरांशस्थेकुटुंबेसांशपेशुभे॥ १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिंहासनांशके वापि पूर्वाशाङ्के नरहंतकः ॥१९॥ द्वितीये पापसंयुक्ते कुटुंबेशे तथा स्थिते ॥ पापग्रहेण
संदृष्टे दुर्घटे नावनं लभेत् ॥२०॥ आविंशतेर्हंतकः स्यात् कुटुंबेशे शुभैर्युते ॥ पारावतांशके तस्माद्व
ने चंद्रसमन्विते ॥२१॥ स्वोच्चे सुहृद्गृहे स्वगृहे तदीशे सिंहासने तद्भवनेश्वरे वा ॥ पारावतांशे गुरुदृष्टि
युक्ते शतत्रयं शाससमितं गतायुः ॥२२॥ कुटुंबनाथे परमोच्चयुक्ते देवेंद्रपूज्येन समीक्षिते वा ॥ तथावि
धे तद्भवने षिकांतः सहस्रवर्षो भवति प्रतापैः ॥२३॥ सिंहासनांशे त्रिदशेशपूज्ये शुक्रे यदा गोपु
रसंयुते तु ॥ ऐरावतांशे धनपे बलाढ्ये जातस्य संख्यातनरहंतकः स्यात् ॥२४॥ मुखेशे केंद्रभावस्थे
शुभग्रहनिरीक्षिते ॥ मुखे सौम्ययुते वापि सुमुखः स नरो भवेत् ॥२५॥ प्रफुल्लवदनः श्रीमान् केंद्रे
मुखपतौ यदा ॥ स्वोच्चमित्रस्ववर्गस्थे तन्नाथे गोपुरांशके ॥२६॥ पापैर्युते मुखस्थाने तन्नाथे पापसं
युते ॥ नीचारातिगते वापि दुर्मुखः पापवीक्षिते ॥२७॥ क्रोधयुक्तो नरः पापी तदीशे गुलिकान्विते
॥ पापयोगवहुत्वे स्मिन् नीचराजवशंगतः ॥२८॥ वाक्स्थानपे सौम्ययुते त्रिकोणे केंद्रस्थिते तुंगसम
न्विते वा ॥ शुभेक्षिते पुंग्रहयोगयुक्ते वाग्मी भवेद्युक्तिसमन्वितोसौ ॥२९॥ वाक्स्थानपे देवगुरोक्षिते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न युक्तेऽयशनाशागतेऽत्र मूकः॥ चित्रादिकानान्नियमेव रीतिरुक्ता मुनीन्द्रैर्गुरुशास्त्रविद्भिः॥३०॥ वाचाल
कः केंद्रगते तदीशे कारकवर्तांशे परमोच्चभागे॥ सिंहासने देवगुरौ मृगौ वा वर्गोत्तमे सोमसुतेन यु
क्ते॥३१॥ वाग्मी शशस्थांशगे सौम्ये स्वोच्चे वा शुभवीक्षिते॥ गोपुरांशगते वापि वाग्मी पटुतरो भवेत्
॥३२॥ वाग्मीशोपि बलान्वितः शुभयुतो वर्गोत्तमांशेपि वा वाग्मी स्याद्भवनेश्वरो गुरुयुतः पारावतां
शेपि वा॥ तन्त्राथोभ्युगुणाबुधेन सहितः स्वैरावतांशे तथा स्वोच्चे स्वे सुहृदांशगे हि धनपतौ वाक्स्थान
कोलाहलः॥३३॥ सभाजडो वागधिपः सपापः कर्मस्थितो नीचगतोऽर्कयुक्तः॥ मांद्यान्विते वाग्भवनेऽर्क
युक्ते पापैस्तु दृष्टे च जडोऽत्र जातः॥३४॥ केंद्रे बुधे वागधिपे बलाढ्ये शुक्रे धनस्थानगते ससौम्ये॥ स्वोच्चे
धने दानवपूजिते वा ज्योतिर्विदांश्रेष्ठतमो नरः स्यात्॥३५॥ गणितज्ञो भवेज्जातो वाग्भावे भूमिनंदने
॥ससोमे बुधसंदृष्टे केंद्रे वा सोमनंदने॥३६॥ वाग्भावपे बुधे स्वोच्चे लग्ने देवेंद्रपूजिते॥ शनावष्टमसं
युक्ते गणितज्ञो भवेन्नरः॥३७॥ वाग्भावपे रवौ भौमे गुरुशुक्रनिरीक्षिते॥ पारावतांशगे वापि तर्कयुक्ति
परायणः॥३८॥ गुरुशुक्रौ धने शौचे च विभौमनिरीक्षितौ॥ मूलत्रिकोणगे तुंगे वा तर्कशास्त्रविदांवरः॥३९॥

=सौम्यर

संपूर्णबलसंयुक्ते गुरौ तद्भवनेश्वरे ॥ दिनेशभ्रगुसंदृष्टे शाहिको यं नरो भवेत् ॥४०॥ वाग्भावपे बुधे स्वोच्चे
गोपुरांशगते शनौ ॥ सिंहासने गुरौ वापि वेदांतज्ञो भवेन्नरः ॥४१॥ वेदांतपरिशीलः स्यात्केंद्रकोणे गुरोर्य
दि ॥ बुधेन भ्रगुणा दृष्टे शनौ पारावतांशके ॥४२॥ उत्तमांशे भ्रगौ लग्ने केंद्रे वा तद्विधे भ्रगौ ॥ देवलो
कगते चंद्रे वेदांतज्ञानपारगः ॥४३॥ बहुशास्त्रवक्ता भः केंद्रे जीवे दानवपूजिते ॥ सिंहासने गोपुरांशे वा
ग्भावस्थांशपे बुधे ॥४४॥ विकल्पं भो धनेशस्य राशीशस्थांशपे शनौ ॥ सपापे केंद्रकोणे वा भौमे प्यवं
विनिर्दिशेत् ॥४५॥ परिहासकरो नित्यं भानुस्थितनवांशपे ॥ वाग्भावस्थे बलाढ्ये तु तस्मिन्वैशेषिकां
शके ॥४६॥ गुरौ बलाढ्ये धनराशियुक्ते तदीश्वराक्रांतनवांशनाथे ॥ केंद्रत्रिकोणे शुभवीक्षिते वा तर्कमां
तविद्यासु विशारदः स्यात् ॥४७॥ लग्नेश्वरे धनस्थे च लग्ने वा सौम्यसंयुते ॥ तुंगे पारावते तद्दीशे ज्ञा
तो निगमांतविद्ये शुक्रे ॥४८॥ लग्नेश्वरस्थांशपति स्थराशिनाथस्थितांशाधिपतौ बलाढ्ये ॥ वैशे
षिकांशकयुते [redacted] शुभदृष्टियुक्ते योगे वकुत्वधनलाभमिहाहुरार्याः ॥४९॥ वित्तेश्वरेण
सहिते भवराशिनाथे कर्माधिपस्थनवभागपदृष्टियुक्ते ॥ वैशेषिकांशकयुते परमोच्चभांशे योगे

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स॰ चिं॰ १६

बहुत्वधनलाभमिहाकुरार्याः॥५०॥ कर्माधिपेनसहितेधनराशिनाथेलग्नेश्वरस्थितनवांशपतीश्वरेण
॥ दृष्टेचतुष्टयगतेशुभदृष्टियोगेजातोबहुलधनलाभमुपैतिबाल्ये॥५१॥ लग्नार्थलाभभवनेशुभखे
चरेंद्रेस्वांशेसुहृद्गृहगतेचविशेषितांशे॥ ओजांशकेधनपतिस्थनवांशनाथदृष्टेबहुत्वधनलाभ
मुपैतिबाल्ये॥५२॥ लग्नेशोधनराशिस्थोधनेशोलाभराशिगे॥ लाभेशोवाविलग्नस्थोबहुनिध्यादिकंभ
वेत्॥५३॥ सर्वग्रहाइतिवलीयदिलग्ननाथःकेंद्रस्थितस्त्रिदशपूजितसंयुतश्च॥ वैशेषिकांशकयु
तोधनराशिनाथोवित्तंस्ववीर्यबलमर्जितमाकुरार्याः॥५४॥ लग्नेशसंयुतनवांशपति पाति स्थराशि
नाथोवलेनसहितोधनपस्यमित्रं॥ केंद्रत्रिकोणसहितःस्वगृहेपवाऋजातःस्ववीर्यधनमेतिबहु
प्रकारैः॥५५॥ वित्तेश्वरोलाभविलग्नपाभ्यांयुक्तस्त्रिकोणेयदिकेंद्रराशौ॥ शुभेक्षितःकालवलान्वि
तश्चेज्जातःस्ववीर्यार्जनमेतिमर्त्यः॥५६॥ अंतेधनंयातिधनेशयुक्तराशौविलग्नेशयुतेससौम्ये॥
नहीश्वरेलग्नगतेवलाढ्येलाभेश्वराद्वेवसुहाहरंति॥५७॥ तृतीयराशौधनलग्ननाथौबलान्वितौपुंग्र
हदृष्टियुक्तौ॥ नदीश्वरेणापियुतौप्रदृष्टौभ्रातुर्धनंयातिविशेषितांशे॥५८॥ तृतीयभावाधिपतो
धनस्थेतत्रस्थितेकारकखेचरेन्द्रे॥ दृष्टेयुतेवातनुपेनजातोभ्रातुर्धनंयातिविशेषितांशे॥५९॥

राम॰ १६

20

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

परस्परं वित्तविलग्ननाथौ निरीक्षितौ केंद्रगतौ शुभांशे ॥ निरीक्षितौ लग्नशुभेश्वराभ्यां जातो धनं या-
ति बहुप्रकारैः ॥६०॥ वित्तेश्वरं पश्यति लग्ननाथे युते स्ववीर्याद्धनमेति जातः ॥ तृतीयभावाधिपका-
रकाभ्यां दृष्टे युते तादृशमेति वित्तं ॥६१॥ दृष्टे युते वित्तपतौ बलाढ्ये सुखेश्वरेणापि धनं जनन्याः ॥ वं-
धोः सकाशाद्यवाहुपैश्च धनं प्रयात्यत्र विशेषितांशे ॥६२॥ पुत्रेशतत्कारकखेचराभ्यां तथाविधे
वित्तपतौ बलाढ्ये ॥ शत्रोः सकाशात्सधनं प्रयाति वैशेषिके लग्नपतौ बलाढ्ये ॥६३॥ कलत्रतत्कारक-
योस्तथैव वित्तं कलत्राद्धनमेति हि जातः ॥ पितुर्द्धनं कारकभावपाभ्यां गुरोः सकाशादपि धर्मम्मलात्
॥६४॥ कर्मेशतत्कारकदृष्टियोगाद्धनं स्वशानग्रहणात्स्वकीर्त्या ॥ लाभेशतत्कारकदृष्टियोगाद्देवं-
वदंत्याद्यधनं बहुत्वं ॥६५॥ धनाशये ग्रहाः क्रोकाबलाढ्यास्तेन तथा भवेत् ॥ नीचारिमूढभावस्थे दृग्यो-
गात्खेचरैरपि ॥६६॥ तत्तद्भावाधिपैर्वित्तनाशस्तत्सुखतो भवेत् ॥ सहोत्थवंधुपुत्रारिकलत्रादेरखं
क्रमः ॥६७॥ लग्नाधिपे हीनबले सपापे रिःफे धनेशे दिननाथयुक्ते ॥ नीचस्थिते वाऽशुभदृष्टियुक्ते
जातस्य वित्तं हरति क्षितीशः ॥६८॥ व्ययेशे धनभावस्थे रिःफस्थे धननायके ॥ दुःस्थे धनेशे नीचे वा प-
रं दंडाद्धनक्षयः ॥६९॥ धनेशे नाशराशिस्थे सपापे नीचराशिगे ॥ राजकारकसंयुक्ते राजदंडाद्धनक्षयः ॥७०॥

=वित्त४ =लाभ२

स·चिं· धनव्ययेशौ व्ययवित्तसंस्थौ लग्नेश्वरेणापि निरीक्षितौ चेत्।।लग्नाधिपेनाशगते सपापे राज्ञां प्रकोपाद्धनना
११ शमाहुः।।७१।।कर्मेश्वरे लाभगते विलग्नानाथेन युक्ते यमकंटकांशे।।द्यूताकरालं शगते यवापि राज्ञां।।
।।७२।।कर्मेश्वरे नाशगते सपापे क्रूरादि षष्ट्यंशयुते विशेषात्।।धनायपाभ्यां सहिते तदानीं लोकापवादाद्ध
ननाशमेति।।७३।।वित्तायपौ भूमिजदृष्टियुक्तौ क्रूरांशगौ हीनवलौ सपापौ।।चौरेशतत्कारकदृष्टियुक्तौ
चौराग्निभूपैर्द्धननाशमेति।।७४।।वित्तेशसंयुक्तनवांशनाथयुक्तो शकस्थांशपतौ सपापे।।दुःस्थे विल
ग्नेश्वरदृष्टयुक्ते चौराग्निभूपैर्द्धननाशमेति।।७५।।धनेशस्य नवांशेशनाथो दुःस्थो यपापयुक्।।क्रूरांश
कगतो वापि निर्द्धनो यं भवेन्नरः।।७६।।धने क्रूरादि संयुक्ते तदीशे पापसंयुते।।तथैव लाभराशीशे धनही
नो भवेन्नरः।।७७।।व्ययेश संयुक्तनवांशनाथो युक्तो धनेशेन निरीक्षितो वा।।नीचार्कगो हीनवलः सपापः
केंद्रस्थितश्चेदपि निर्द्धनः स्यात्।।७८।।धनेशांतरराशीशसंयुक्तांशपतो यदा।।कालदंडाद्यंशयुक्ते निर्द्ध
नो वा भवेन्नरः।।७९।।यत्किंचिद्धनसंयुक्तो धनेशे केंद्रकोणगे।।क्रूरषष्ट्यंशसंयुक्ते नीचस्थे र्कयुते यदि।।८०।।
यत्किंचिद्धनमायाति लाभेशस्थांशराशिपे।।गुरुणा भृगुना दृष्टे क्रूरषष्ट्यंशसंयुते।।८१।।लाभलग्नध रान·
नेशानां युक्तांशाः क्रूरसंज्ञकाः।।केंद्रत्रिकोणयुक्ता नाम्नुत्पन्नधनिको भवेत्।।८२।।वैशेषिकांशे धनपे ११

स्वोच्चमूलत्रिकोणगे ॥ क्रूरषष्ठ्यंशसंयुक्ते लाभेशे वार्थनाशभाक् ॥ ८३ ॥ उत्पन्नधनिको लग्ननाथे वैशेषिकांशके ॥
धनेशे क्रूरषष्ठ्यंशे चेत्तौ केंद्रगतौ तथा ॥ ८४ ॥ सद्योधनी धनेशेन कर्मनाथो युतो यदि ॥ कर्मेशस्थांशपतिना लाभ
नाथे तथाविधः ॥ ८५ ॥ लग्नेशे धनराशिस्थे लाभेशे कर्मसंयुते ॥ धनेशस्थांशपे सौम्ये धनिको नामतो भवेत् ॥ ८६ ॥
सहस्रनिष्कभर्ता स्याद्धनेशे चोत्तमांशके ॥ लाभाधिपेन संदृष्टे गुरुणा वा निरीक्षिते ॥ ८७ ॥ सहस्रनिष्कभर्ता स्याल्ल
ग्नेशस्य नवांशपे ॥ गोपुरांशगते कर्मनाथेन यदि वीक्षिते ॥ ८८ ॥ कर्मेशसंयुक्तनवांशनाथयुक्तेशसप्तांशपतौ व
लाढ्ये ॥ शुक्रेण दैवेंद्रपुरोहितेन दृष्टे सहस्रद्वयनिष्कभर्ता ॥ ८९ ॥ सौम्यषष्ठ्यंशसंयुक्ते धनभावे बलान्विते ॥ तदी
शे पि तथा युक्ते सहस्रत्रयनिष्कयुक् ॥ ९० ॥ वैशेषिकांशे वित्तस्य नाथे गुर्वीत्तु भास्करे ॥ तथाविधे भवेशे पि बलाढ्ये
चेत्तदा धनी ॥ ९१ ॥ धनेशस्य दृकाणेशसंयुक्तनवभागपः ॥ सर्वोत्तमबलोपेतस्त्वष्टसाहस्रनिष्कयुक् ॥ ९२ ॥ लग्नेश
स्य दृकाणेशसंयुक्तमुनिभावपः ॥ वैशेषिकांशकगतस्त्वयुतं धनमाप्नुयात् ॥ ९३ ॥ व्ययेशुक्रे धने जीवे स्वांशे वै
शेषिके युते ॥ लग्नेशे पि तथा युक्ते तद्द्विगुणमुपयाति सः ॥ ९४ ॥ गुरौ लग्नेशसंयुक्ते धने वैशेषिकांशके ॥ केंद्रत्रिको
णगे वापि तद्द्विगुणं वित्तमाप्नुयात् ॥ ९५ ॥ कर्मेशस्य दृकाणेशनाथसंयुक्तसप्तपः ॥ ऐरावतांशसंयुक्तो धनलक्षं स
मश्नुते ॥ ९६ ॥ केन्द्रत्रिकोणभे वीर्यस्तत्ययवाभवनाथयुक् ॥ वैशेषिकांशगश्चेत्तु धनं० ॥ ९७ ॥ लक्षद्वयं धनं याति च

= मागरा

स.चिं. १८

शुभेक्षेन्द्रशुभान्विते ॥ सिंहासनेधनेशोपि यदि पारावतांशके ॥९८॥ लग्नेशस्य याधिकारी स्याच्छुभलग्नधनाधि-
पे ॥ वैशेषिकांशकयुते मृदंशादियुतेपि वा ॥९९॥ तद्दशायां वित्तपः स्यात्तु धनलाभपतीयदा ॥ इष्टकेन्द्रगतौ
तौ चेद्दलिनौ भाग्यपत्तया ॥१००॥ लग्नवंशस्थभाग्येशाः परमोच्चांशसंयुताः ॥ वैशेषिकांशे लाभेशे तथा
कोटीश्वरो भवेत् ॥१॥ अन्यगृहे विलग्नेशसंयुक्त नवभागपः ॥ इष्टे देवेन्द्रगुरुणा मृदंशादिसमन्वि-
तः ॥२॥ वित्तलाभपसंयुक्ते यद्यथाकेशनवांशपः ॥ वैशेषिकः केन्द्रकोणे अन्यदेवाभवेन्नरः ॥३॥ अन्यग्र-
स्तो धने पापे लग्ने चव्ययसंयुते ॥ कर्मेशे लाभनाथेन युक्ते दृष्टे विशेषतः ॥४॥ दिनेशके लुप्तस्ते धनेशो
नीचराशिगः ॥ पापान्विते धने रंध्रे ऽन्यग्रस्तो भवेन्नरः ॥५॥ धनेशे नीचराशिस्थे क्रूरषष्ठ्यंशसंयुते ॥
लाभेशे लग्ननाथेपि ऋण ॥६॥ लाभेशे स्थितभांशेशानाथे दुःस्थशुभान्विते ॥ क्रूरषष्ठ्यंशसंयुक्ते ऋण
॥७॥ वाक्स्थानपे षष्ठगते सराहौ राहुस्थित क्षौधिपसंयुते वा ॥ दंतस्य रोगं पतनं च नेत्रे घांधुक्षौत यो वीप्र-
व दंतितज्ज्ञाः ॥८॥ वाक्स्थानपेनापियुतौ रिनाथस्तद्भावपस्थांशपयुक्तनाथः ॥ षष्ठेश्वरेणापि युतः स्वभु-
क्तौ दंतादिरोगः पतनं च नेत्रे ॥९॥ वाक्स्थानपेनापियुतोर्कपुत्रः पापैर्युतो वातभयात्प्रमादः ॥ सर्पानुको-
पाद्भवति प्रमादो राहौ कुजे चौरभयात्प्रकोपः ॥१०॥ तदीश्वरेणापि युते तु पुत्रे सराहुकेतावरिभावयुक्ते ॥

राम. १८

२८

राहुस्थितर्क्षाधिपसंयुतेवायुक्तौतदातालुभवःसरोगः॥११॥राजारिनाथौतनुभावयुक्तौसाछाक्षिपौ
भूमिपतेःत्रिकोपात्॥उत्पादनंनेत्ररुजंतितह्रन्नीचांशगौपापयुतौतथैव॥१२॥राजारिनाथस्थितभां
शकेशौदुःस्थौविलग्नेशयुतौतथैव॥साछाक्षिपौनाशगतौतथैवशुभैर्नदृष्टौनयनप्रमादः॥१३॥आत
त्मावपाभ्यामयकारकाद्वापित्रादिकानांफलमेवमाहुः॥कर्णस्यविच्छेदनमाहुरार्याःसौरेसभौमेध
नपेविलग्ने॥१४॥रोगाधिपेवित्तपतौविलग्नेनाशस्थितेमंदसुतारयुक्ते॥पित्रादिकानांफलमेवमूह्यं
तत्स्थाननाथग्रहकारकेभ्यः॥१५॥भुक्तीश्वरेलक्षुनिशाकराभ्यांकेंद्रयुतेराऊतमत्रपात्रं॥सचंद्रपुत्रा
मरनाथपूज्येकेंद्रस्थितेस्वर्णमयंहिपात्रं॥१६॥तदीश्वरेकोणचतुष्टयेवावैशेषिकांशेयदिताद्दशंतत्र॥
मृद्वंशकेवापरमोच्चभांशेस्थितेतदीशेयदिताद्दशंतत्॥१७॥स्वांशादिगानांपरमोच्चएशोशशांकडी
ष्टौविदांयदांशे॥वीर्यान्वितेभुक्तिपतौतदंशेभुक्तेत्रपात्रंसुदृशंहिरत्नं॥१८॥मृद्वंशकेभुक्तिपतौवि
शेषात्पारावतांशेबलपूर्णयुक्ते॥केंद्रस्थितेमित्रशुभेक्षितेस्यात्छंसंतिपात्रंवदुभुक्तिकाले॥१९॥विचि
त्रपात्रंप्रवदंतितज्ज्ञाभुक्तीश्वरेकेंद्रगतेवलाढ्ये॥शुक्रामरेज्येंदुसुतावलाढ्यास्त्रैरेवयुक्तात्रविशेषितांशे॥
॥२०॥लग्नेश्वरेलग्नसहितौशनिभुक्तिनाथौषष्ठस्थितौयदितदाप्रवदंतिलोहं॥पात्रंतदीश्वरयुतेयदिवा

CC-0. In Public Domain. Digitization by eGangotri

विनाशस्थानार्थगो सुदृढमत्र तु लोहपात्रं ॥२१॥ कांस्यं वदंति किल भुक्तिपतौ कलाढ्ये वैशेषिकांशरहिते यदि सौम्य
दृष्टे ॥ भुक्तौ स्वरस्थितनवांशपतिर्यदंशे तद्राशिपः शुभयुतोपि तथैव माहुः ॥२२॥ पापग्रहेण सहिते यदि भुक्तिरा
शौ तद्राशिनाथयुतभागपतौ यदंशे ॥ तद्राशिपे वलविहीनशुभेर दृष्टे भुक्तौ कृतौ समदृढं कथयंति तज्ज्ञाः ॥२३॥ वा
गुह्ययुतं पात्रं भुक्तौ शेना शराशिजे ॥ पापग्रहेण संदृष्टे कारके वलवर्जिते ॥२४॥ वह्नाशनी भुक्तिपतौ सपापे
रावाग्निदंडायुधकालभागे ॥ नीचांशगे पापनिरीक्षिते वा शुभैर्न दोषः सहिते हि कर्णां ॥२५॥ भुक्तिस्थाने शुभ
युते तदीशे शुभसंयुते ॥ शुभग्रहेण संदृष्टे स्वच्छे भुक्तेन रो भवेत् ॥२६॥ भुक्तिसौख्ययुतः श्रीमान् भुक्तीशे वल
संयुते ॥ विशेषितांशके वापि गुरुशुक्रनिरीक्षिते ॥२७॥ भुक्तौ स्वोच्चे त्रिकोणे वा तदीशे पि वलान्विते ॥ कारके तु
विशेषांशे शुभदृष्टे सुखाशनी ॥२८॥ कालोचिताशनी भुक्तिनाथे रेहे शवीक्षिते ॥ पापग्रहेण वा दृष्टे नीचांशादियु
ते न तु ॥२९॥ अन्नप्रदो द्वितीयेशो गुरुसौम्ययुतेक्षिते ॥ वैशेषिकांशकयुते मृद्वंशादियुते पि वा ॥३०॥ गुरुशुक्र
युते भुक्तौ नाथसौम्यनिरीक्षिते ॥ वैशेषिकांशकयुते लब्धदाता न रो भवेत् ॥३१॥ भुक्तिराशिपतौ वीर्यकेंद्रे तपच
येपि वा ॥ वलयुक्तैः शुभैर्दृष्टे लब्धदाता भवेन्नरः ॥३२॥ सौम्यस्वोच्चगते भुक्तौ मित्रसौम्यनिरीक्षिते ॥ नाथे वैशेषि
कांशे वा सुखभुक्तिप्रदो भवेत् ॥३३॥ अल्पाशी रुचिकामः स्याद् भुक्तिनाथे शुभग्रहे ॥ स्वोच्चे वा शुभसंदृष्टे मृद्वंशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दिसमन्विते ॥३४॥ परान्नभुक् तद्दीशे तु क्रूरखगांशसंयुते ॥ नीचखेचरसंदृष्टे न दूषणपरो नरः ॥३५॥ भुक्ति
स्थाननाथिपे मंदे तद्दीशे मंदसंयुते ॥ नीचे केसरिनुनादृष्टे श्राद्धभुक् सततं नरः ॥३६॥ कुंभे मीने भुक्तिनाथे
तु शन्यारगुलिकान्विते ॥ नीचशत्रुयमांशादौ शुभदृष्टिविवर्जिते ॥३७॥ तद्दीशे शुभसंयुक्ते शीघ्रभुग्ब
लसंयुते ॥ द्वितीये शुभराशौ वा शुभखेचरसंयुते ॥३८॥ तद्दीशे चरराशौ वा युक्तौ वाता दृशो गृहे ॥ ता
दृशे पापसंबंधे चिरभोक्तातिदूषकः ॥३९॥ विलग्नसप्ताष्टमयोगराशौ दिनेशयुक्ते क्षितिसूनुदृष्टे ॥
भौमेऽथवा वासरनाथदृष्टे स्फोटाग्निभीतिं प्रवदेन्मताद्या ॥४०॥ लग्नांत्यशत्रुभवने यदि भूमिपुत्रे मां
द्यन्विते कमलबंधुनिरीक्षिते वा ॥ मूढारिनीचभवने यदि वाक्षितीशे त्वाऽप्यस्य हादिसहितः सभ
वेत्तदानीं ॥४१॥ मंदात्मजेन सहिते यदि भूमिपुत्रे वित्तेऽथवा निधनराशिमुपागते वा ॥ तेनैव वीक्षितयु
ते धनभावनाथे त्वाऽप्यस्य हादि नियतं प्रवदंति तज्ज्ञाः ॥४२॥ पापेक्षिते रविसुते धनराशियुक्ते पापा
न्विते शुनकभीतिमुपैति जातः ॥ तद्भावनाथसहिते दिननाथपुत्रे दृष्टेऽथवा शुनकभीतिमुपैति मर्त्यः
॥४३॥ राहौ द्वितीये गुलिकेन दृष्टे युक्तेऽथवा सर्पभयं वदंति ॥ कदंत्रयुग्भूमिसुतेन युक्ते पिचारिकानां
फलमेवमाहुः ॥४४॥ लग्नेश्वरे शोभनखेचरेंद्रे निध्यादिलाभं धनभावयुक्ते ॥ सौम्ये द्वितीये युधिस

CC-0. In Public Domain. Digitization by eGangotri

त्वहीने पापेक्षिते वा कुचकलत्रेन नसाहुः ॥४५॥ पापे धने पापनिरीक्षिते वा क्रूरांशगे पापयुते विशेषात् ॥ तत्स्था
ने पापपापनिरीक्षिते पि विषप्रयोगः खलु बंधनादिः ॥४६॥ मित्रारिस्थानपवशादेवं तेषां फलं भवेत् ॥ ना
यकारकभावानां बलाबलवशात्तथा ॥४७॥ सर्वेषामुपकारार्थं रहस्यार्थप्रकाशकः ॥ धनभावफला
ध्यायो वर्णितो व्यंकटेनुना ॥४८॥ ॥ इति सर्वार्थचिंतामणौ द्वितीयोध्यायः ॥ ॥ सहजेन सहजविक्रम
यो धैर्यसहायान्गलोरःस्थानं ॥ विद्याद्दक्षिणकर्णं भक्ष्य विशेषांश्च मूलादीन् ॥१॥ नाथस्थितौ सोदरना
यभौमौ पापेक्षितौ सोदरनाशमाहुः ॥ पापर्क्षगौ पापसमागमौ वा भ्रातृन्समुत्याद्य विनाशहेतुः
॥२॥ नीचास्तगौ सोदरकारकाख्यौ नीचांशगौ पापसमागतौ वा ॥ क्रूरादिषष्ट्यंशयुतौ तदानीं
भ्रातृन्हंति ॥३॥ पापग्रहे सोदरभावयुक्ते सोत्थे यदा पापनिरीक्षिते स्यात् ॥ तदीश्वरे पापखगां
तरस्थे सहोदराणां कथयंति नाशं ॥४॥ पापांतरे पापनिरीक्षिते वा पापान्विते नीचगृहान्विते वा ॥
तृतीयभावे शुभखेचरेंद्रैर्नवीक्षिते सोदरनाशमाहुः ॥५॥ भ्रातृस्थानाधिपस्थांशराशीशे नाश
राशिगे ॥ नीचारातिगते मूढे वाहुः सोदरनाशनं ॥६॥ शनिमांदिसमायुक्ते पापखेचरवीक्षिते
॥ तदीशेनाशराशिस्थे सोदराणां विनाशनं ॥७॥ पापांतरे तदीशे तु कारके वा तथा विधे ॥ नयैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तद्भावनाथे सोदरः ॥८॥ पापाभिलक्षिते भावे भावेशे पापसंयुते ॥ क्रूरषष्ठ्यंशगे वापि सोदरः ॥९॥ भ्रा
तृस्थानाधिपस्थांशराशीशेयन्नवांशके ॥ तदीशे नाशराशौ चेत्सोदरः ॥१०॥ सात्येशयुक्ते राशपूश
नाथोयत्रनवांशके ॥ तन्नाथे नीचमूढारिभावे सोदरनाशनं ॥११॥ भ्रातृस्थानाधिपे दुःस्थे कारके वा
नयाविधे ॥ पापेक्षिते पापयुक्ते स्वोच्चे वा सोदरक्षयः ॥१२॥ अतिक्रूरसमायुक्ते भावे वा कारकेपि वा
॥ तद्भावनायके वापि वाल्ये सोदरनाशनं ॥१३॥ यत्किंचित्क्रूरसंयोगेन नाशः स्थिरकालतः ॥ वलहीन
वशादेवं सोदरक्षयचिंतनं ॥१४॥ भ्रातृस्थाने शुभैर्युक्ते शोभनग्रहवीक्षिते ॥ भावनाथे वलाढ्ये तु भ्रा
तृलाभमुदीरयेत् ॥१५॥ भ्रातृपे कारके वापि शुभयोगनिरीक्षिते ॥ भावे वा वलसंपूर्णे भ्रातृणां वर्द्ध
नं वदेत् ॥१६॥ केंद्रत्रिकोणगे वापि स्वोच्चमित्रस्ववर्गगे ॥ नाथे वा कारके वापि भ्रातृलाभमुदीरयेत् ॥
॥१७॥ सौम्यग्रहांशके वापि सौम्यानामंशके यदि ॥ नाथे वा कारके वापि भावे सोदरवर्द्धनं ॥१८॥ सोत्थे
श्वरे गोपुरभागयुक्ते सिंहासने कारकखेचरेंद्रे ॥ सौम्यग्रहे तद्भवनाधिपे स्याद्भ्रात्रादिलाभं कथयंति
तज्ज्ञाः ॥१९॥ पारावतांशेयदि केंद्रराशौ भावेश्वरे शोभनखेटयुक्ते ॥ सौम्यांशके सौम्यग्रहे तदीशसा
त्यादिवाहुल्यमुदीरयंति ॥२०॥ भ्रातृभावे स्वतुंगे वा स्वर्क्षे मूलत्रिकोणगे ॥ वलाढ्ये भावनाथे स्यात्

CC-0. In Public Domain. Digitization by eGangotri

सोदरो त्यन्ति मादिशेत् ॥२१॥ सहृत्स्थानादिसमायुक्ते भावनाथे शुभैर्युते ॥ शुभेक्षिते वलाढ्ये वा सोदरः ॥२२॥
वैशेषिकांशके भावनाथे वा शुभवीक्षिते ॥ सुहृत्स्थानादियुते वापि भ्रातृवर्द्धनमेव तु ॥२३॥ लग्ननाथस्य
सौम्येशामित्रं चेन्मित्रता भवेत् ॥ भ्रातास्थानगुर्भवेच्छत्रुश्चेदेवं विनिर्दिश्यते ॥२४॥ अयुग्मभांशे यदि
कारके शौ गुर्वर्कभस्त्वनुनिरीक्षितो चेत् ॥ ओजे गृहे स्याद्यदि विक्रमाख्ये पुंभ्रातरस्तस्य वदंति तज्ज्ञाः ॥
॥२५॥ युग्मांशके युग्मगृहे तदीशे भावेन या कारक खेचरेंद्रे ॥ सहोदरीलाभमिहाहुरार्या नपुंसकांशे
किल तत्तथैव ॥२६॥ भ्रातृराशिपराशकवशाद्भ्रातृसंख्यां विनिर्दिशेत् ॥ नाथकारकसंयुक्ते राश्यंशाद्भ्रा
तथा वदेत् ॥२७॥ भ्रातृराशिसमायुक्त खेचरस्यांशकाद्वदेत् ॥ सौम्येशयुक्ते राश्यंशात्कारकान्वि
तभागतः ॥२८॥ तयोः संयुक्तखेटस्य राश्यंशाद्भ्रातृ था भवेत् ॥ एतयो रश्मिमानाद्वा पापयोगा
द्विनाशनं ॥२९॥ संवादे विविधे शास्त्रे तत्कर्मवलतो वदेत् ॥ कारकाद्विक्रमे यावाद्विक्रांतस्य वि नि
र्दिशेत् ॥३०॥ शौर्ये क्षिपेत्तुंगयुते वलाढ्ये केंद्रत्रिकोणे यदि सौम्यदृष्टे ॥ मूलत्रिकोणे स्वगृहे स्वगेहे
वैशेषिकांशे पुरुषः सधीरः ॥३१॥ धीरो भवेद्विक्रमराशिनाथे सौम्यग्रहांशे शुभखेटयुक्ते ॥ तथैव
तत्कारकखेचरेंद्रे सौम्यग्रहाणां भवने तु शौर्ये ॥३२॥ धैर्यान्वितो विक्रमराशिनाथसंयुक्तराश्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शशनौ यदंशे ॥ तदंशनाथे स्वगृहादिवर्गे युद्धे प्रवीणः कलहप्रवीणः ॥३३॥ विक्रमाधिपतौ स्वोच्चे
नाशस्थे पापसंयुते ॥ चरभे चरराश्यंशे युद्धान्मृर्वं दृढो भवेत् ॥३४॥ पापग्रहाणां भवने विक्रमेपा
पसंयुते ॥ तथा विधेतदीशेपि युद्धा• ॥३५॥ क्रूरषष्ट्यंशगे वापि तदीशे नीचराशिगे ॥ पापयुक्ते पथवा
दृष्टे युद्धजाऽस्रो भवेन्नरः ॥३६॥ युद्धे पराजितः स्वोच्चे विक्रमेशे विनाशगे ॥ कारके वलहीने वा क्रूरषष्ट्यंशसंयुते ॥
॥३७॥ सिंहासनांशे यदि विक्रमेशे पारावतांशे गोपुरभागयुक्ते ॥ मृदंशके वा शुभदृष्टियोगे मनोऽस्यवो युद्धविशा
रदः स्यात् ॥३८॥ युद्धाभिलाषी समरप्रवीणो वीर्येश्वरे सौम्ययुते यतुंगे ॥ वैशेषिकांशे वलपूर्णयुक्ते मृदंशगे वा
विपरीतमन्यत् ॥३९॥ शौर्याधिपे भानुयुते च धीर श्रद्धान्विते मानसधैर्ययुक्तः ॥ कुजे जडो भौमयुते प्रकोपी
सौम्यान्विते सात्विकबुद्धियुक्तः ॥४०॥ जीवान्विते धीरतया समेतः सर्वार्थशास्त्रार्थविशारदः स्यात् ॥ कामातुर
स्त्वास्फुजिदन्विते तु तन्मूलकोपात्कलहप्रवीणः ॥४१॥ जडो भवेद्वासरनाथपुत्रयुक्ते फणीनामधिपेन युक्ते
॥ वह्निर्दृढो हृकृतजाद्ययुक्तः केत्वन्विते मान्दियुते तथैव ॥४२॥ लग्ने गुरौ विक्रमनाथयुक्ते चतुष्पदानां प्रवदन्ति
भीतिं ॥ गर्वांभयं वा जलराशिलग्ने जलेश्रमाद्धोभवति क्रवं ततः ॥४३॥ वीर्याधिपे राहुसमेतराशिनाथान्विते राहु
युते विलग्ने ॥ सर्पाद्भयं विक्रमराशिनाथे वुधेन युक्ते गलरोगमत्र ॥४४॥ नीचे तृतीये रिपुगेहे विमूढे पापेक्षिते तत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स.विं.
२२

ऊरलग्रमादः॥ विषप्रयोगाद्विषभक्षणाद्वा तेषामभावे च विनिश्चितार्थः॥४५॥ शुक्रे कलाढ्ये यदि वा शशांके
सौम्येक्षिते शोभनखेटयुक्ते॥ सोत्थस्थिते स्वोच्चसुमित्रवर्गे सुपात्रभोक्ता सुखभुक्तिभाग्वा॥४६॥ पापे
तृतीये गलरोगमत्र वदंति मांद्याहियुते विशेषात्॥ भौमान्विते अत्र पुरीषकृच्छ्रं नौ तृतीयराशौ यदि क
र्णरोगः॥४७॥ सोत्थेशनौ मांदियुते तथैव वाताद्भयं सौम्यदृशाविहीने॥ तृतीयनाथस्थित राशिनाथ
संयुक्तराश्याधिपतौ च केंद्रे॥४८॥ पापान्विते पापनिरीक्षिते वा वदंति कर्णोद्भवरोगमत्र॥ क्रूरादि
षष्ट्यंशयुते तृतीशे कर्णस्य रोगं कथयंति तज्ज्ञाः॥४९॥ सौम्ययुक्ते तृतीये वा सौम्यखेचरवीक्षिते॥ तृ
तीयेशे शुभसंयुक्ते कर्णयोर्भूषणं भवेत्॥५०॥ शुक्रे तृतीये यदि मौक्तिकं तु जीवे तु लस्याभरणं वदंति॥
भानोस्तु संवंधयुते तृतीये सरत्नमानीलमयं हिमांशो॥५१॥ चंडे वक्र त्वाभरणं तु सौम्ये स्वामभवेत्तत्र =२५
क्षितिसूनुराशौ॥ मंविक्रमार्गाभरणं तथैव पापेक्षिते तत्क्षयमाहुरार्याः॥५२॥ शुभग्रहाणां भवने तु त
स्मिन् तृतीयराशौ श्रवणं कथानां॥ वृत्यादिकानां यदि पापराशौ क्रूरस्थनत्कर्णकुठारमाहुः॥५३॥ ॥
अथ चतुर्थभावफलं॥ ॥बंधुभवनेन बंधून्गृहमातृज्ञातीन्मित्रक्षिभोज्यादीन्॥ वाहनहृदयस्कंधास राम.
नशयनसुखान्मखो जलं ब्रूयात्॥१॥ लग्नेश्वरे लग्नगते सुखेशगनाथेन युक्ते यदि गेहलाभः॥ अथ यन्तेतः २२

32

CC-0. In Public Domain. Digitization by eGangotri

स्याच्छुभदृष्टियोगात्स्वोच्चे स्वमित्रे स्वगृहे बलाढ्ये ॥२॥ गेहाधिपे केंद्रगते बलाढ्ये सौम्येक्षिते मंदि
रलाभमाहुः ॥ वैशेषिकांशे परमोच्चभागे गेहेश्वरे मंदिरलाभमाहुः ॥३॥ गृहस्थानाधिपस्थांशनाथ
संयुक्तराशिपः ॥ तद्दृशाधिपतौ केंद्रे गृहलाभमुदीरयेत् ॥४॥ भाग्येशे केंद्रभावस्थे गृहेशे स्वोच्चमित्र
भे ॥ गृहराशिगते खेटे स्वोच्चे वस्तुविचित्रकः ॥५॥ तृतीये सौम्यसंयुक्ते गृहेशे स्वबलान्विते ॥ तद्दृशे
बलसंपूर्णे हर्म्यप्राकारमंडितम् ॥६॥ सिंहासनांशके वापि गृहेशे गोपुरांशके ॥ मृदंशादियुते वापि
विज्ञेयं सौधमंडितं ॥७॥ पारावतांशके गेहनाथे गुर्विन्दुवीक्षिते ॥ गोपुराद्यंशके वापि देविकं गृहमादिश
त् ॥८॥ विचित्रसौधप्राकारमंडितं गृहमादिशेत् ॥ कर्माधिपेन सहिते नाथे केंद्रे के सूनुना ॥९॥ गे
हाधिपे नाशगते यदि स्यात् पापेक्षिते तद्गृहनाशमत्र ॥ गेहेशसंयुक्तनवांशनाथे नाशस्थिते स्यादपि
गेहनाशः ॥१०॥ बंधुस्थानेश्वरे सौम्ये सौम्यग्रहनिरीक्षिते ॥ तत्कारके बलाढ्ये वा बंधुपूज्यो भवेन्नरः
॥११॥ बंधुस्थानगते जीवे तदीशे शुभसंयुते ॥ गोपुराद्यंशके वापि बंधुपूज्यो भवेन्नरः ॥१२॥ बंधुस्था
नगते जीवे तदीशे गुरुसंयुते ॥ गुरुदृष्टिसमायुक्ते बंधुश्रेष्ठो भवेन्नरः ॥१३॥ बंधुपकर्तानाथे कें
द्रकोणायसंयुते ॥ वैशेषिकांशसंयुक्ते पापदृग्योगवर्जिते ॥१४॥ बंधूनामुपकारी स्याद्धीगुर्वर्कसो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

+तद्येः२

स॰ चिं॰ २३ मज्ञाः॥ तेषां गृहे वा तैर्दृष्टे मृद्वंशादिसमन्विते ॥१५॥ बंधुभिस्त्यक्तः पुरुषस्तदीशो पापसंयुते ॥ क्रूरषष्ठ्यंशा
गे वा पि नीचारातिगृहे पि वा ॥१६॥ वक्रपापसमायुक्ते बंधुनाथे वहि ॥ तत्कारके तथैवात्र बंधूनां कुत्सितो
भवेत् ॥१७॥ नाथकारकसंयुक्ते न वांशेशांशनायकः ॥ नीचराशिगतो मूढो बंधूनां भयकर्मकृत् ॥१८॥
बंधूपभोगी केंद्रस्थे तदीशे शुभवीक्षिते ॥ गोपुरांशकेवापि मृद्वंशादिसमन्विते ॥१९॥ धने लाभे त्रिको
णस्थे तन्नाथे शुभवीक्षिते ॥ सौम्यग्रहाणामंशे वा बंधूनामुपकारकृत् ॥२०॥ बंधुवृद्धीर्भवेन्नित्यं पापा
क्रांते गृहे परः ॥ नीचास्तखेटसंयुक्ते शुभदृग्योगवर्जिते ॥२१॥ कस्मिंश्चित्खेचरे द्वे वा बंधौ स्वोच्चे स्वमित्र
भे ॥ गुरुणा दृष्टिसंयाते बंधुपूज्यो भवेन्नरः ॥२२॥ गृहस्थाने चरे लग्ने तदीशे चरराशिगे ॥ तथैवत्कारके +तदे
पि वक्रस्थाने गृहं वदेत् ॥२३॥ स्थिरे गृहे स्थिरगृहे नाथकारकयोरपि ॥ षष्ठ्यंशे शुभभागे वा तदीशे स्थि
रतां व्रजेत् ॥२४॥ अर्थव्ययगृहेशौ स्तो यावंतः पापसंयुताः ॥ तावद्गृहादिनाशः स्यात् शुभदृष्टा न दोषदाः
॥२५॥ अर्थव्ययगृहेशास्तु केंद्रकोणादिसंयुताः ॥ तावद्गृहालयं सर्वं शोभनं तत्र निर्दिशेत् ॥२६॥ गृ
हेशो कर्मराशिस्थे कर्मेशो गेहमागते ॥ बलयुक्ते धरासूनौ वक्रहेत्रं विनिर्दिशेत् ॥२७॥ बलाढ्ये कर्मरा राम॰
शीशे बंधुस्थानाधिपे तथा ॥ तयोर्मित्रे परातस्य वक्रहेत्रं विनिर्दिशेत् ॥२८॥ हेत्रस्थाने शुभैर्युक्ते २३

33

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

=पा॰ न्रूपचये १

तदीशे शुभसंयुते ॥ तत्कारके तथा प्राप्ते वक्रु क्षेत्र धनैर्युतः ॥ २९ ॥ क्षेत्राधिपे पंचमस्थे गोपुरांशादिसंयुते ॥ म्रदं
शादियुते वापि वक्रु क्षेत्रे समन्वितः ॥ ३० ॥ भ्रातृकारकसंयुक्ते भ्रातृनाथेन संयुते ॥ क्षेत्रे तदीश्वरे वापि भ्रातृक्षेत्रं
विनिर्दिशेत ॥ ३१ ॥ क्षेत्रेशसंयुक्तनवांशनाथे केंद्रस्थिते मित्रनिरीक्षिते वा ॥ भौमान्विते भौमदृशा समेते भ्रातु
र्दत्तं क्षेत्रमुदाहरंति ॥ ३२ ॥ लग्नेश्वरे क्षेत्रगते वलाढ्ये लग्ने वलिष्ठे यदि क्षेत्रनाथे ॥ शुभैर्ग्रहैर्दृष्टिसमागमे वा क्षे
त्रं स्वकीयेन वलेन याति ॥ ३३ ॥ कलत्रकारके क्षेत्रे तदीशे वा कलत्रगे ॥ तदीशयोस्तथा मैत्री कलत्रात्क्षेत्रमादिशेत्
॥ ३४ ॥ षष्ठेश्वरे क्षेत्रगते वलाढ्ये षष्ठस्थिते वा ग्रहभावनाथे ॥ षष्ठेश्वरान्क्षेत्रपतौ वलाढ्ये शत्रोः सकाशात्स धरामु
पैति ॥ ३५ ॥ पारावतांशे स्वगृहे वलाढ्ये क्षेत्रेश्वरे चोपचयं गते वा ॥ आरोहभागे शुभदृष्टियुक्ते क्षेत्रे वक्रुत्वं समुदाहरं
ति ॥ ३६ ॥ धनेशलाभेशसमन्विते वा क्षेत्रे तदीशे यच कारके वा ॥ वैशेषिकांशे शुभदृष्टियोगे वक्रुत्वमूर्धं ग्रहमाहुरा
र्याः ॥ ३७ ॥ क्षेत्रेश्वरे नीचगते विमूढे पापांतरे पापनिरीक्षिते वा ॥ पापग्रहक्षेत्रगते रिगेहे क्षेत्रादिनाशं कथयंति तज्ज्ञाः
॥ ३८ ॥ पापांतरस्थे यदि भूमिराशौ पापान्विते पापनिरीक्षिते वा ॥ पापग्रहक्षेत्रगते यवास्याक्रूरांशके भूमिविनाश
मेति ॥ ३९ ॥ क्रूरादिषष्ठ्यंशयुते तदीशे क्षेत्रे सपापे यदि नीचभे वा ॥ दुःस्थे रिगेहे त्वतिभीवरांशे क्षेत्रादिनाशं कथ
यंति तज्ज्ञाः ॥ ४० ॥ क्षेत्रेश्वरे पापयुते धनस्थे नीचारिभे क्षेत्रविनाशमेति ॥ स्वोच्चस्थिते तद्भवनेश्वरे तु पापान्विते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विक्रयमेति भूमेः॥४१॥आज्ञाक्षयात्क्षेत्रविनाशमाहू राज्ञे व्यये क्षेत्रगते सपापे॥ क्रूरांशके मध्यमुखमादि
भागे कर्मे व्यये एणापि युते तथैव॥४२॥आज्ञाक्षयाद्भूमिविनाशमेति राज्ञे शनत्कारके भूमिनाथे॥ क्रूरांश
के वा लववरोहभागे नाशस्थिते मध्यमुखमादिभागे॥४३॥ राज्ञा श्रियाक्षेत्रविनाशमेति भानौ तदीशेन युते
पि निम्ने॥ धने शसंयुक्तनवांशनाथयुक्तांशपेनापि युते सपापे॥४४॥ जीवेन दृष्टे यदि वा तदीशे रव्ये गुरौ
शोभनखेचरे वा॥ सौम्यांतरे तद्भवने शसौम्ये सुखीभवेत्सर्वजनेषु मुख्यः॥४५॥ जीवे बलाढ्ये सुखराशि
नाथयुक्ते स सौम्ये तु चतुष्टये वा॥ जीवेन दृष्टे यदि वा तदीशे मह्वंशके वा सुखभाङ्नरः स्यात्॥४६॥ सुखे गुरौ
शोभनखेचरे वा सौम्यांतरे तद्भवने स सौम्ये॥ जीवे बलाढ्ये यदि लग्ननाथात्सुखीभवेत्सर्वजनेषु मुख्यः
॥४७॥ गोपुरांशे शके वापि सुखपे देवपूजिते॥ धनायहद्धि भावेषु तस्मिन्खेटे सुखीभवेत्॥४८॥ सौम्यांतरा
न्विते सौख्य बलहीने गुरावपि॥ सपापे दुर्बले नाथे दुःखी स्याद्दर्थसंयुतः॥४९॥ पुत्रार्थवंधुयुक्तश्च दुःखि
स्यान्नीचखेचरे॥ सुखे तदीशे पापेन युक्ते क्रूरांशसंयुते॥५०॥ स्थिरयुक्ते सुखराशिनाथे क्रूरांशके सौ
म्यदशाविहीने॥ आरोहभागे सुखराशिनाथे क्रूरांशके सौम्यदशाविहीने॥५१॥ आरोहभागेतरभा
गयुक्ते देहार्तिभाक्जातनरस्तु नित्यं॥५१॥ नीचारिभागे रविभूमिपुत्रे सुखस्थिते पापदशा समेते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रूरांशके तद्भवनाधिनाथे ग्रहार्थहीनो भवति प्रमादात्॥५२॥ पापान्विते पापनिरीक्षिते वा पापां
तरे वा सुखभे तदीशे॥ क्रूरादिषष्ट्यंशसमन्विते वा पापी नरः स्याच्छुभदृष्टिमुक्ते॥५३॥ पापे वृकुत्वे सुख
राशियुक्ते तदीश्वरे चारिविमूढयाते॥ पापान्विते वा यमसन्तुयुक्ते जातो वृकुत्वं समुपैति पापं॥५४॥
युक्ते दुर्विहृवसुपूजितानां क्षेत्रे सुखे सर्गवलान्वितानां॥ शुभान्विते शोभनदृष्टियाते जातो नरोयं सु
विपुलप्रभावस्यात्॥५५॥ बुधदृष्टे सिते सौख्ये सौम्यमध्यगते पि वा॥ गोपुरांशके वापि पुण्यप्रभावस्त
नरो भवेत्॥५६॥ नीचान्विते मृदयुते सुखस्थे स पतनभे वा जलराशिसंज्ञे॥ नरीश्वरे हीनकलेतदानीं
पतत्यसौ कूपतटांबुराशौ॥५७॥ जलेश्वरे हीनकले सुखस्थे नीचे र्कयुक्ते यदि वा स पापे॥ जलग्रहेणा
पियुते सुखे शेवलेनहीने जलराशिमग्नः॥५८॥ सरित्स्थानाधिपे लग्ने नाथेन सहिते सुखे॥ कर्माधिपे
न संदृष्टे नरी कूपतटादिषु॥५९॥ पतनं कूपनद्यादौ सुखे रास्यांश राशिपः॥ सरित्स्थाने शसंदृष्टो यदि वा
सुखपेन युक्॥६०॥ शिलाप्रहारस्तस्य स्याद्विभौमान्विते सुखे॥ दृष्टे युते कर्मपेन सरित्स्थानाधिपेन वा
॥६१॥ सुखेशे राहुमंदाभ्यां सहिते कुजवीक्षिते॥ शुभदृष्टिविहीने तु शिलाभिः पीडितो नरः॥६२॥ केंद्र
स्थिते रात्रिकरे भंगो वा पापान्विते पापनिरीक्षिते वा॥ क्रूरांशके वा त्वथ वरोहभागे सोयं जनन्यासह संग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेति ॥६३॥ पापेक्षिते पापयुते शशांके दिवाकरे वा यदि केंद्रराशौ ॥ क्रूरे सुखे वा यदि पापदृष्टे जातो न
रः स्याद्धि हि मातृगामी ॥६४॥ पापेक्षिते स्यात्सुखभावनाथे पापान्विते सौम्यदृशाविहीने ॥ दारेश्वरा
श्रयपतौ विहीने जातो नरो मातृसमानगामी ॥६५॥ सहोदरी संगममाहुरन्ये दारेश्वरे क्रूरयुते सुख
स्थे ॥ पापेक्षिते पापसमागमे वा क्रूरादिषष्ट्यंशसमन्विते वा ॥६६॥ सुखेशनौ पापनिरीक्षिते वा पापान्वि
ते नाहशापापयुक्तः ॥ पापग्रहाणां भवने सुखे तु क्रूरादिषष्ट्यंशयुते तथैव ॥६७॥ षष्ठेशभूनंदनसंयुते
ऽब्जे सुखस्थिते पापनिरीक्षिते वा ॥ चंद्रांशसंयुक्तनवांशनाथेन तथाविधे मातरि दोषमाहुः ॥६८॥ सुखेश्वरे
राहुयुते सपापे शनैश्चरेणापि दिवाकरेण ॥ मातान्यसक्ता सुखराशिनाथसंयुक्तभांशाधिपतौ तथैव ॥६९॥
सुखेश्वरे लग्नगते बलाढ्ये गुर्विन्दुसौम्यास्फुजिदैक्ष्य दृष्टे ॥ वैशेषिकांशे शुभदृष्टियोगे पतिव्रता तस्य भ
वेत्सवित्री ॥७०॥ तथाविधे शीतकरे सराहुकेतौ सवित्री यदि नीचसक्ता ॥ रव्यन्विते क्षत्रियजातिसक्ता शु
क्रेऽपयुक्ते हि जघुंगवैश्या ॥७१॥ धरासुतेनापि तथाविधेन वक्तुं फलं तादृशमत्र सत्यं ॥ मंदेन युक्ते सति शू
द्रसक्ता वैश्येन सक्ता शशिसूनुयुक्ते ॥७२॥ षष्ठेश्वरेण सहिते सुखराशिनाथे भाग्यस्थिते जनकमत्र वि
टं करोति ॥ भाग्याधिपेन सहिते सति मातृनाथे सौख्यस्थिते जनकमत्र विटं करोति ॥७३॥ लग्नेशभाग्येश
सुखेशयुक्ते षष्ठाधिपे स्यात्परजात एव ॥ तदंशनाथेन युते तदीशे पापेक्षिते स्यात्परजात एव ॥७४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पापांतरे मातृगृहे तदीशे तत्कारके वाशुभदृष्टियुक्ते॥ लग्नेश्वरात्हीनबले शुभेशे जातस्तदानीं परजात एव॥७५॥ न
वीक्ष्यते चेद्गुरुणा विलग्नं निशाकरो वा गुरुणा न दृष्टः॥ दिवाकरेणापि युते शशांके सपापचंद्रे रविणा तथैव॥७६॥
पापे शुभे मातृगृहे सपापे लग्नेश्वरे हीनबले सपापे॥ पारांशकारो सुखपे तदानीं जातो नरः स्यात्परजात एव॥७७॥
मातृस्थाने शुभयुते कारके शुभसंयुते॥ तद्भावपे बलाढ्ये वा मातुरायुष्यमादिशेत्॥७८॥ चंद्रे बलिष्ठे यदि वा भृगौ वा
सौम्येक्षिते शोभनभागयुक्ते॥ चतुष्टये मातृगृहात्कुभाढ्ये मातुश्च दीर्घायुरुदाहरंति॥७९॥ भावेशसंयुक्तनवांश
नाथयुक्तांशपे केंद्रयुते बलाढ्ये॥ तस्मिन्शशांकाद्यदि केंद्रयुक्ते मातुश्च॰॥८०॥ पापांतरे पापयुते शशांके पापेक्षि =गृहेद्द
ते मातृगृहे विनाशः॥ शुक्रात्तथैवं प्रवदंति संतस्तत्स्थानपापाधिकथयंति शेषं॥८१॥ निशाकरात्पापयुते स्मरे वा
भृगोस्तथैवं जननीविनाशं॥ सुखेशनौ मातृविनाशमेति पापेक्षिते चेद्रविरेण नाशं॥८२॥ पापग्रहाणां भवनेश
नौ तु पापान्विते मातृविनाशमेति॥ शुभेक्षितश्चेच्चिरकालमृत्युमुदाहरंत्यत्र महानुभावाः॥८३॥ मातृस्थानाधि
पस्थाराशौ योयत्रवांशके॥ तदंशनाथकिरणान्मातृकालं विनिर्दिशेत्॥८४॥ नाथकारकराशीनां मध्ये यो बल
वान्भवेत्॥ यावानंशास्तदंशाः स्यान्मेषादितत्र मृत्युदः॥८५॥ वक्रे तद्द्विगुणं प्रोक्तं त्रिगुणं त्वतिवक्रगे॥ चतुर्गुणं
शुभैर्दृष्टे कालमेवं विनिर्दिशेत्॥८६॥ हृदये पापसंयुक्ते पापदृष्टे तदीश्वरे॥ पापांतरे वा हृदये हृत्कापद्यं विनिर्दिशेत्
॥८७॥ धान्याररराहुसंयुक्ते हृदये शुभवर्जिते॥ तथैव तद्भावनाथे हृत्कापद्यं विनिर्दिशेत्॥८८॥ पापे कर्मेश्वरे सौख्यकप

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स॰चिं॰
२६

दौ पापवीक्षिते ॥ सपापे रंध्रपे सौरवौ कापट्यं पापसंयुते ॥८९॥ भानुना हीनचंद्रेण सहिते हृदये तथा ॥ कपटी
हीनमात्रं तु निष्कापट्यं न दृश्यतः ॥९०॥ हृदये शुभसंयुक्ते स्वोच्चमित्रग्रहान्विते ॥ शुभग्रहाणां दृष्टे वा निष्का
पट्यं विनिर्दिशेत् ॥९१॥ विशुद्धहृदयः शांतो हृदयेशे बलान्विते ॥ गोपुराद्यंशके वापि मृद्वंशादियुते पि वा ॥९२॥
लग्नेश्वरे हृद्गते वा शुभयुक्तेक्षिते पि वा ॥ पारावतादिभागस्थे निष्कापट्यं विनिर्दिशेत् ॥९३॥ लग्ने गुरौ दान
वपूजिते न युक्ते यदा तस्य विशुद्धचित्तं ॥ पापे सुखे तद्भवनाधिनाथे पापान्विते तस्य विशुद्धचित्तं ॥९४॥ राहौ सु
खे पापदृष्टा समेते वहिर्विशुद्धस्त्विति तत्र भाति ॥ अंतर्गतं तत्कपटं वदंति पापे वक्रत्वे सुखराशियुक्ते ॥९५॥
यत्तल्लग्ने सुखेशौ वा मित्रभतौ परस्परं ॥ शुभेक्षितो शुभैर्युक्तो मातृस्नेहं विनिर्दिशेत् ॥९६॥ लग्नेश्वरे रास
दृष्टे मातृनाथे चतुष्टये ॥ शुभग्रहान्विते दृष्टे मातृ॰ ॥९७॥ शत्रुक्षेत्रस्थनाथस्य मातृभावाधिपो यदि ॥ पापे
क्षिते पापयुते तच्छत्रुत्वं विनिर्दिशेत् ॥९८॥ लग्नेशात्त्र्यायराशिस्थे मातृस्थानाधिपे यदि ॥ तथैव लग्नभा
वाद्वा तच्छत्रुत्वं विनिर्दिशेत् ॥९९॥ वाहनेशे बलयुते वाहने शुभसंयुते ॥ शुभग्रहेण संदृष्टे वाहनादि फलं ल
भेत् ॥१००॥ सुगंधवस्त्राभरणादि यानं शुक्रा छदेत स्तु खराशितो वा ॥ संदेश्च चतुर्थाधिपतौ विलग्ने लग्नेश्व
रेणापियुते स्वलाभः ॥१॥ शुक्रेण युक्ते यदि वाहनेशे देहान्विते वा न रवाहनादि ॥ देवेंद्रपूज्येन युते च लग्ने

राम॰
२६

३०

वदंति संतश्च तुरंगयानं ॥२॥ चंद्रामरेज्यामरशत्रुपूज्यैर्युक्ते तनौ वा यदि वाहनेशे ॥ प्रोक्तं च यद्वाहनमाशु रार्या
नीचारिमूढादिविहीनखेटैः ॥३॥ भाग्येशलग्नेशचतुर्थनाथाः कर्मस्थिता नीचविमूढहीनाः ॥ कर्मेश्वरेणापि युते
विलग्ने सिंहासनप्राप्तिमुदाहरंति ॥४॥ भाग्यस्थिते वाहनराशिनाथे सशुक्रजीवे सुखराशियुक्ते ॥ भाग्याधिपे
कोणचतुष्टये वा वक्रुत्वदेशाभरणार्थयानं ॥५॥ भाग्याधिपेन सहिते यदि वाहनेशे जीवेक्षिते तनुगते
वलपूर्णयुक्ते ॥ स्वक्षेत्रतुंगसहिते यदि वा त्रिकोणे भूनायमाननवशाद्धनवाहनादि ॥६॥ भाग्ये
श्वरेणापि युते सुखेशे यत्र स्थिते पश्यति वा सुखर्क्षं ॥ वैशेषिकांशे यदि वा वलाढ्ये स सर्वभाग्यान्वि
तवाहनी स्यात् ॥७॥ दुःस्थे विमूढे यदि वाहनेशे भाग्येश्वरेणापि समन्विते वा ॥ दुर्वाहनी च चलवाहनी वा
लाभाधिपेनापि समीक्षिते तु ॥८॥ सौख्याधिपे शोभनखेचरेण भाग्येश्वरेणापि युते यथा स्यात् ॥
सेनावक्रुत्वं समुपैति जातो वक्रुत्वदेशाभरणानि यानं ॥९॥ भाग्येश्वराख्ये भगते विलग्ननाथे सुखेशे
यदि भाग्यराशौ ॥ सुखाय भाग्ये तनुनायके वा त्वसख्ययानादियुतः प्रसिद्धः ॥१०॥ सुखेश्वरे केंद्र
गते तदीशे लग्नस्थिते वा यदुवाहनाढ्यः ॥ कर्मेश्वरे लग्नगते तदीशे कर्मस्थिते वा वहुवाहनाढ्यः ॥११॥ सु
खेश्वरे सौम्ययुते शुभस्थे शस्त्राम्वकोशाधिपतिर्भवेत्तु ॥ क्षेत्रेश्वरे लाभगते वलाढ्ये वं यो भवे वाक्कि

=कर्म १

सं.चिं. २७ तिस्तनुयुक्ते ॥१२॥ अस्तनुराशौ यदि वास्तु खेचरे राज्यार्थसौख्याभरणादियानं ॥ सौम्यैर्विलग्नेवलसंयुते
धर्मान्विते शोभनखेचरेंद्रे ॥१३॥ स्वोच्चस्थिते वित्तपतौ च केंद्रे सिंहासनप्राप्तिमुदाहरंति ॥ केंद्रे शुभाः पा
परखगास्त्रिषष्ठलाभस्थितास्तत्परमाहुरार्याः ॥१४॥ गेहेशे व्ययराशिस्थे पित्र्यादन्यदेशगः ॥ अष्टम
स्थे गृहेशे वा स्वयं संपादयेद्गृहं ॥१५॥ धनेशे लग्नभावस्थे धर्मेशे धनमाश्रिते ॥ वाहनेशे वलाढ्ये तु वाहना
धिपतिर्भवेत् ॥१६॥ वाहनस्थे लाभनाथे कर्मनाथेन वीक्षिते ॥ लग्ननाथेन वा दृष्टे वाहनाधिपतिर्भवेत् ॥१७॥
लग्नवाहनभाग्येशा स्वन्योन्यं केंद्रमाश्रिताः ॥ लग्नाधिपे वलाढ्ये वा वाह० ॥१८॥ गोपुरांशके वापि वाहने
शे वलान्विते ॥ लाभकर्मसुखाधीशैर्दृष्टे वाहनसंयुतः ॥१९॥ परमोच्चांशकयुते भाग्येशे केंद्रमागते ॥
गुरुदृष्टे तुंगयुते वहुवाहनदेशभाक् ॥२०॥ धनाधिपेन संयुक्ते व्ययेशे स्वोच्चराशिगे ॥ भाग्याधिपेन संदृ
ष्टे वाह० ॥२१॥ कर्माधिपे चतुर्थस्थे लाभनाथेन संयुते ॥ भाग्यनाथेन वा युक्ते वहुवाहनदेशभाक् ॥२२॥ अव्
दये कर्मगते लग्ननाथेन वीक्षिते ॥ भाग्याधिपेन वा दृष्टे वाहनाधिपतिर्भवेत् ॥२३॥ सिंहासनांशकगते
कर्मवाहनराशिपे ॥ लग्नेश्वरेण संदृष्टे वहुवाहनदेशभाक् ॥२४॥ वाहनार्थं तृतीयेषु भाग्यकर्मभवाधि
पाः ॥ स्थितावाल्येर्थयानादिसंयुक्तो निधने शुभे ॥२५॥ स्वोच्चे सुखेशे तन्नाथे केंद्रकोणसमन्विते ॥ वा रा.मं. २७

ग्नेतुंगसंयुक्ते व्ययेशुद्धे न्नयानभाक्॥२६॥परमोच्चांशके शुक्रे कर्मेशे बलसंयुते॥संभवेत्तादृशे योगे वाद्यघोषादिभिर्युतः॥२७॥शंखवादित्रघोषाद्यैः संयुक्तो भाग्यपे सुखे॥ केंद्रोच्चकोणगे वापि कर्मेशे वा ह्नान्विते॥२८॥शनिना संयुते कर्मनाथे केंद्रे शुभान्विते॥लग्नेशे दृष्टिभं याते पणवादिरवैर्युतः॥२९॥कर्मभाग्यविलग्नेषु स्वोच्चसौम्यग्रहाः स्थिताः॥ दृष्टेषु वा लग्नपेन यानां तेदुःखमाप्नुयात्॥३०॥कर्मषट्सोदरसुखभाग्यलग्नव्ययेश्वराः॥सुखाधिपेन सहिता स्वसंख्या वोपदेशभाक्॥३१॥सुखे शुभयुते नाथे केंद्रकोणोच्चसंयुते॥भाग्येशे परमोच्चांशे सुखयानादिलाभभाक्॥३२॥मानेशे सुखराशिस्थे लाभे सौख्येशसंयुते॥लग्ने शुभेन संदृष्टे वदृयानादिलाभभाक्॥३३॥मृदंगभेरीशंखाद्यैः काहलादिरवैर्युतः॥राजयोगे समुद्भूते कर्मपे सौख्यसंयुते॥३४॥बलाबलात्शोभनदृष्टियोगात्प्रोक्तं त्वतीयस्य फलं नु राशेः॥चतुर्थराशेश्च फलं तथैव श्रीवेंकटेशेन निरीक्ष्य सर्वं॥१३५॥ ॥इति सर्वार्थचिंतामणौ चतुर्थोध्यायः॥४॥

सुतभवनात्सुतबुद्धिमंत्रिणामपि मंत्रभोजपितृभावान्॥हृदयोदरप्रवेशं विवेकशक्तिं च निर्दिशेन्मतिमान्॥१॥नाथैः कलत्रात्मजधर्मभानां पुत्रार्थचिंतां कथयेत्सजीवैः॥बुद्धितरासोमसुतात्मजाभ्यां पितुस्तथैवात्मजभाग्यसूर्यैः॥२॥पिता धनं याति सुखे सभानौ पुत्रेशशांके मरणं च मातुः॥

युते शुभे सौम्यन दृष्टियोगे पुत्रं वदन्त्येव तथान्तरीशे ॥३॥ पुत्रस्थाने तदीशो वा गुरौ वा शुभवीक्षिते ॥ शुभेन
सहिते वापि पुत्रप्राप्तिर्न संशयः ॥४॥ लग्नेशे पुत्रभावस्थे पुत्रेशे बलसंयुते ॥ परिपूर्णबले जीवे पुत्र॰ ॥
॥५॥ पुत्रस्थानगते जीवे परिपूर्णबलान्विते ॥ लग्नाधिपेन वा दृष्टे पुत्रावाप्तिं विनिर्दिशेत् ॥६॥ वैशेषि
कांशे जीवे वा पुत्रेशे पि तथा स्थिते ॥ शुभग्रहेण वा दृष्टे पुत्रे तत्प्राप्तिमादिशेत् ॥७॥ पुत्रस्थानगते वित्त
नाथे पूर्णबलान्विते ॥ दृष्टे देवेंद्रगुरुणा पुत्रप्रा॰ ॥८॥ लग्नपुत्राधिपौ युक्तावन्योन्यं वापि वीक्षितौ ॥
क्षेत्रे परस्परस्थौ वा पुत्र॰ ॥९॥ लग्नपुत्राधिपौ केंद्रे शुभग्रहसमन्वितौ ॥ कुटुंबेशो बलाढ्ये तु पु॰ ॥१०॥ पुत्र
स्थानाधिपस्थांशराशीशे शुभसंयुते ॥ शुभेन वीक्षिते वापि पु॰ ॥११॥ लग्नेशे दारभावस्थे दारेशे भाग्य
संयुते ॥ द्वितीयेशे विलग्नस्थे पु॰ ॥१२॥ दारेशांशग्रहसंयुक्तेन वांशभवनाधिपे ॥ भाग्यवित्तविलग्नेशैर्दृष्टे
तत्प्राप्तिमादिशेत् ॥१३॥ पापमध्ये तु तद्भावे तदीशे पि तथा स्थिते ॥ कारके पापसंयुक्ते पुत्रनाशं वदे
त् सदा ॥१४॥ भाग्यपुत्रकलत्रेशसंयुक्तेनवभागपाः ॥ पापांशकाः पापयुताः पुत्रना॰ ॥१५॥ क्रूरांशे पुत्र
भावेशे नीचमूढसमन्विते ॥ पापैर्दृष्टे यदा दुःस्थे पुत्रनाशं॰ ॥१६॥ व्ययेशसंयुतांशेशशत्र्वंशनाथस
मन्विते ॥ दृष्टे पुत्रेश्वरे तेन पुत्रार्तिं कथयंति हि ॥१७॥ पुत्रस्थानाधिपे दुःस्थे क्रूरषष्ठ्यंशसंयुते ॥ क्रूर

ग्रहेणावा दृष्टे पुत्रार्त्तिं कथयंति हि ॥१८॥ मंदक्षेत्रादिसंयुक्ते पुत्रस्थानेश्वरे दृष्टे ॥ गोपुरांशे शके वापि पुत्र
सिद्धिर्न संशयः ॥१९॥ पुत्राधिपस्यांशपतौ विलग्ने लग्नेश्वरस्यांशपतौ सुतस्थे ॥ गुरुस्थितांशाधिपतौ
च केंद्रे पुत्राप्तिमाहुर्मुनयो महांतः ॥२०॥ पारावतांशादि युते सुतेशे भाग्येश्वरे तादृशभागयुक्ते ॥ लग्नेश्वरे
शोभनदृष्टियुक्ते पुत्रादिलाभं कथयंति तज्ज्ञाः ॥२१॥ वंशाकृयादि रहिते यदि सत्यमेतच्छास्त्राब्धिपारगमना
मुनयो वदंति ॥ पुत्रादियोगमखिलं तदभावयोगं प्रोक्तं किलोक्य मनसा च वदेत्सुविद्वान् ॥२२॥ वंशस्य वि
च्छेदकरः प्रजातः चंद्रात्सुखजित्यापखगाः क्रमेण ॥ खरार सौख्येषु युतास्तथैव लग्नेश्वरे चंद्रसुतेन युक्ते ॥
॥२३॥ पापग्रहारिः फ सुताष्टमस्था वंशस्य विच्छेदकरो थ हीनः ॥ निशाकरे लग्नगते सजीवे तत्सप्तमे भूमि
सुते शनौ वा ॥२४॥ पापग्रहा वंधुगताश्च सर्वे वंशस्य विच्छेदकरो त्र जातः ॥ लग्नांत्यपुत्राष्टमराशियुक्तैः
पापग्रहैर्वंशविनाशहेतुः ॥२५॥ शुभेतरा रंध्रविलग्नरिःफे वंशस्य विच्छेदकरः सुते ज्ञे ॥ हा राशिस्थिते सो
मसुते सशुक्रे पापेसु खेदे व गुरौ सुतस्थे ॥२६॥ रंध्रेशशांकात्सहिते तु पापैः वंशस्य विच्छेदकरो त्र जातः
॥ पापे विलग्ने सुखगे शशांके लग्नेश्वरे पंचमराशियुक्ते ॥२७॥ वलैर्विहीने यदि पुत्रनाथे वंशस्य विच्छेदकरो
हि जातः ॥ हीरेण शशांके तनुभावयुक्ते मूढान्विते मदगृहे सुरेज्ये ॥२८॥ त्रिकोणगैः पापखगैश्च सर्वैः प्रा

स॰ विं॰ गे च पुत्रस्य सुखवृद्धिनाशः ॥ चंद्रात्मजे पंचमराशियुक्ते लग्ने सुखे वाथ दिपापयुक्ते ॥ २९ ॥ शुभेतरैः पंच
२९ मभागयुक्तेर्न दृष्टयुते पुत्रसुखं वहितेन ॥ जातो यदि स्यात् हि तिसूनु लग्ने रंध्रेशनीपंचमगेरवौ वा ॥ ३० ॥ पुत्रा
दिलाभं सुतनयो वदंति कालांतरे शोभनदृष्टियोगात् ॥ लग्नेशनौ देवगुरौ तुरंध्रे व्यये कुजे पुत्रलाभस्थि
रेण ॥ ३१ ॥ बुद्धिस्थानाधिपे सौम्ये शुभदृष्टिसमन्विते ॥ शुभग्रहाणां केंद्रे वा बुद्धिमान्नीतिमान्भवेत् ॥ ३२ ॥
परमोच्चांशके बुद्धिस्थाननाथे यदीक्षिते ॥ शुभग्रहाणां मध्यस्थे नीव बुद्धिं समादिशेत् ॥ ३३ ॥ कारके व
लसंपूर्णे तदीशे शुभवीक्षिते ॥ वैशेषिकांशके वापि० ॥ ३४ ॥ बुद्धिस्थानाधिपस्थांशराशीशे शुभवीक्षिते
॥ वैशेषिकां० ॥ ३५ ॥ कारकस्थितराश्यंशनाथे केंद्रत्रिकोणगे ॥ बुद्धीश्वरेणसंदृष्टे तीव्र० ॥ ३६ ॥ शुभग्रहाणां
मध्यस्थे बुद्धिराशौ शुभान्विते ॥ गुरौ केंद्रत्रिकोणे वा बुद्धिमार्गविशारदः ॥ ३७ ॥ बुद्धिस्थानाधिपे सौम्ये बुद्धिरा
शिगते गुरौ ॥ शुभग्रहाणां मध्यस्थे भावे बुद्धिं विनिर्दिशेत् ॥ ३८ ॥ बुद्धिस्थानेश्वरे केंद्रे शुभग्रहसमन्विते ॥
उच्चग्रहसमायुक्ते ग्रहणादिपटुर्भवेत् ॥ ३९ ॥ मंदेंद्वादिसमायुक्ते नाथकारकखेचरे ॥ शुभग्रहेणसंदृष्टे
धारणादिपटुर्भवेत् ॥ ४० ॥ गोपुरांशके वापि धारणायां पटुर्भवेत् ॥ परेंगितज्ञो मेधावी कारकस्थित रा॰ म॰
भागपे ॥ ४१ ॥ केंद्रत्रिकोणसंयुक्ते कारकग्रहवीक्षिते ॥ ४२ ॥ नाथकारकसंयुक्तस्वांशभागपतौ शुभे ॥ च २९

39

CC-0. In Public Domain. Digitization by eGangotri

तुष्टये त्रिकोणे वा शुभदृष्टेंगितज्ञकृत् ॥४२॥ पंचमे पापसंयुक्ते तदीशे पापसंयुते ॥ क्रूरषष्ट्यंशके वा
पि बुद्धिनाशो भवेन्नरः ॥४३॥ नीचमूढारिगेहस्थे पापखेचरवीक्षिते ॥ क्रूरषष्ट्यंशसंयुक्ते बुद्धिं ॥४४॥
पंचमे मंदसंयुक्ते लग्नेशे मंदवीक्षिते ॥ तदीशे पापसंयुक्ते बुद्धिजाड्यं समादिशेत् ॥४५॥ मंदमांद्युसं
युक्ते पंचमे शुभवर्जिते ॥ तदीशे पापसंदृष्टे विस्मृतिः प्रायशो भवेत् ॥४६॥ बुद्धिर्विस्मृतिपूर्वं स्यात्का
रके शुभसंयुते ॥ तदीशे पापसंयुक्ते क्रूरषष्ट्यंशके पि वा ॥४७॥ सौम्ये तु बुद्धिभावस्थे गुरुशुक्रे निरी
क्षिते ॥ तादृशे बुद्धिनाथे वा सर्वेषां बुद्धिदो भवेत् ॥४८॥ ऊहापोहसमर्थः स्यात्तदीशे गोपुरांशके ॥ कार
कस्थितराशिस्थे लग्नानाथेन वीक्षिते ॥४९॥ राजमंत्री भवेज्ज्ञातो वाक्पतौ बलसंयुते ॥ बुद्धीश्वरेण सं
युक्ते गोपुरांद्यंशकान्विते ॥५०॥ आगामिसूचको मंत्री कारके केंद्रकोणगे ॥ भृगुसौम्यसमायुक्ते दृष्टे
ताभ्यां शुभांशके ॥५१॥ त्रिकालज्ञो भवेन्मंत्री वैस्वांशमृदंशसंयुते ॥ गोपुरांद्यंशके वापि शुभांशे शुभवी
क्षिते ॥५२॥ पुंग्रहे पुंगृहं प्राप्ते पुंभावे पुत्रनायके ॥ सुपुत्रजनकं विद्यात्तं नरं नात्र संशयः ॥५३॥ स्त्रीरा
शौ स्त्रीगृहं प्राप्ते स्त्रीभागे पुत्रनायके ॥ दारिकाप्रथमं विद्यात्तदंशो षष्ठमादिशेत् ॥५४॥ कारकस्थि
तराशेर्वा पंचमे बिंदुसंख्यया ॥ नीचमूढारिगेहानां बिंदूंस्त्यक्त्वा सुतान्वदेत् ॥५५॥ पुत्रस्थानेशकिर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स॰ चिं॰ ३० णा पुत्रभावं शकाद्वदेत्॥ रश्मिजालैर्युरो वीक्षितल्लोके षांद्वदेत्तथा॥५६॥ लग्ने पुत्रेश्वराभ्यां तु मित्रत्वे
नैव मित्रता॥ शत्रुत्वे शात्रवं प्रोक्तं समत्वे समता भवेत्॥५७॥ लग्नपुत्रेश्वरौ खेटौ परस्पर निरीक्षितौ॥
परस्पर गृहांशस्थौ पुत्रशुश्रूषाकारयेत्सुतः॥५८॥ लग्नपस्यपतिका पुत्रनाथे लग्नान्विते पिवा॥ लग्नेश्वरे
सुतर्क्षे वा पितृवाक्यवशानुगः॥५९॥ पुत्रस्थानेश्वरे दुःस्थे लग्नेशेनापि वीक्षिते॥ सद्वृक्षे कुजराहुभ्यां नि
त्यं पितृविद्वेषकः॥६०॥ पंचमे गुरुशुक्राभ्यां सक्षिप्रा सहिते यदा॥ एतेषां भवने वापि सोयं भोजयिता
भवेत्॥६१॥ द्वितीयेशे तृतीयस्थे पंचमेशे सुखेगते॥ शुभोद्ध खेट संयुक्ते जातो भोजयिता भवेत्॥६२॥
अन्नदानपरो नित्यं पंचमेशे शुभंगते॥ शुभग्रहैः समायुक्ते भुक्तीशे केंद्रसंयुते॥६३॥ हृदये पापसंयु
क्ते तदीशे पापवीक्षिते॥ पापग्रहाणां मध्यस्थे हृद्गतं रोगमादिशेत्॥६४॥ तत्राथे नाशभावस्थे नाशस्थानेश
संयुते॥ नीचमूढारिगेहस्थे हृद्गतं०॥६५॥ तदीशस्थांशराशीशे क्रूरषष्ट्यंशसंयुते॥ क्रूरग्रहेणसंदृ
ष्टे हृद्गतं शल्यमादिशेत्॥६६॥ ॥अथ षष्ठभावफलं॥ ॥अरिभवनादरिचोरहतविघ्नकेशनाभ्युदररे
शान्॥ मधुरादिषड्रसहंस्यान्ग्रहराम्मुदितान्वदेत्प्राज्ञः॥१॥ षष्ठेश्वरे क्रूरयुते विलग्ने रंध्रस्थिते वा व्रण
रः शरीरे॥ कर्मस्थिते ताद्दश खेचरेंद्रे संगाग्रहै गेशुभदृष्टियुक्ते॥२॥ पित्रादिभावादपि योजनीयं भावे राम॰ ३०

CC-0. In Public Domain. Digitization by eGangotri

॥

शातत्कारकदृष्टियोगात् ॥ बलाबलेनापि विकल्प्य सर्वं ते वांछां गां तत्फलयथं तितन्वः ॥३॥ शिरोर्कीदेर्मु
खंकंठश्रोत्रनासाचतुष्टयकं ॥ स्कंधौ पार्श्वौ हृदो पादौ अपरौ कुक्षिमादिशेत् ॥४॥ लग्नेशभ्नपुत्रशशांक
पुत्राः सहस्थिताः सौम्यगृहे त्वभेवा ॥ अपानरोगं स्वयवापवित्रं प्रस्पंति षष्ठं मुनयो वदंति ॥५॥ शशांक
तत्पुत्रविलग्ननाथाः सराहु वः केतुयुतास्तडाके ॥ पैत्यं तु कुष्ठं मुनयो वदंति शुभेक्षितास्तत्र भवेत्तदानीं
॥६॥ विनाविलग्नाधिपतिं ग्रहेषु लग्नस्थिते त्वत्र तु कुष्ठभाक्स्यात् ॥ पित्रादिकानां फलमेवमाहुर्मुनीश्वराः
कारकभावनाथैः ॥७॥ पैत्यं तु कुष्ठं कुजसंयुतेषु नैत्यं भवेन्मेहसमन्वितेषु ॥ रक्तं तदा सूर्यसमन्वितेषु
ग्रहोत्करेषे नियतं तदाहुः ॥८॥ लग्नेशषष्ठाधिपती दिने शयुक्तौ ऽम्बरं चंद्रसमन्वितौ चेत् ॥ ज्वलेन गंडं हि
ति स्तु दृष्टे युद्धेन वा स्फोटकराशिभिर्वी ॥९॥ वित्तेन रोगे रात्बुधेन युक्तेन निर्व्याधिको ऽजीव समन्वितौ चे
त् ॥ शुक्रेण भार्या विपदं वदंति मंदेन नीचानिलरोगमाहुः ॥१०॥ सराहुकेतू यदि सर्पपीडा चोराग्निभिर्वा
तभयात्समारः ॥ षष्ठेश्वरश्चेंद्रस्तु तेन युक्तः सायुर्विलग्ने स्वयमत्र शिश्नं ॥११॥ छिन्नत्व सौ सौम्यदृशावि
हीने सभ्र मिपुत्रे यदि लिंगरोगात् ॥ कामेश्वरः शुक्रयुतोरि पुस्थः कलत्र खंडत्वमुदीरयंति ॥१२॥ षष्ठे
शलग्नाधिपती समं दोकेंद्रत्रिकोणे यदि वंधनं स्यात् ॥ सराहुकेतू यदि केंद्रकोणे वदंति तज्ज्ञा निगडं त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स.चिं.
३१

शानी ॥१३॥ चित्रादितत्कारकभावनाथैः चिंत्यादिकानां फलमेवमाहुः ॥ तत्तद्दशाणां परिपाककाले स्वंतर्द
शायामथवा फलंति ॥१४॥ धर्मे शनौ वा सगुरौ स्थितौ ये करच्छिदो केंन्निधने व्यये वा ॥ विधौ कलत्रे निधना
न्विते वा कुजेन युक्ते यदि वाप्तजीवे ॥१५॥ कर्मस्थिताश्चेद्यदि राहुमंदसौम्याः पदच्छेदयुतो नृजातः ॥ शुक्रे
ज्यदृष्टे द्विवसाधिनाथे सारे शनौ वा फणिनाथयुक्ते ॥१६॥ क्रूरादिषष्ठ्यंशसमन्विते वा विच्छेदनं तच्छिर
सो वदंति ॥ मंदे विलग्ने मदने सराहौ कर्मान्विते भार्गवनंदने वा ॥१७॥ कुम्भे शशांके मदराशियुक्ते विच्छिन्न
हस्तः स भवेत्पदेन ॥ भस्तनुलग्ने यदि वा तदंशे सूर्यान्विते कुम्भनिशाकरे तु ॥१८॥ फणीन्द्रचंद्रात्मजसं
युते र्करश्म्याभिभूते तेषु दरस्य भेदं ॥ मंदोदये सौम्यदृशा विहीने सर्पार्कयुक्ते यदि वा सचंद्रे ॥१९॥ शाखे
णाकुहेर्द्दलनं वदंति जातस्य दर्शी मुनयो महांतः ॥ क्षीणे शशांके फणिनाथदृष्टे सारे शिरस्तस्य निकृंत
नं स्यात् ॥२०॥ लग्नेशनौ भूमिसुते स्वगेहे शौर्ये च तुर्ये सबुधे सितेऽर्कस्वः ॥ षष्ठाष्टमव्यये चंद्रे लग्नानाथेन
वीक्षिते ॥ मंदमांद्यगुसंयुक्ते तस्य दुर्मरणं वदेत् ॥२१॥ नीचारातिविमूढांशे मंदे पापान्विते क्षिते ॥ क्रूर
नक्षत्रसंयुक्ते तस्य दुर्मरणं भवेत् ॥२२॥ रंध्रेश्वरस्थितस्यांशे पाशसर्पादिसंज्ञके ॥ द्रेकाणे निगडे वापि
दुर्वधान्मरणं भवेत् ॥२३॥ मंदमांद्यगुसंयुक्ते रंध्रेशस्य त्रिभागपे ॥ तथाविधे र्कपुत्रे वा दुर्वधान्मरणं भ

राम.
३१

५८

CC-0. In Public Domain. Digitization by eGangotri

वेत्॥२४॥ षष्ठाष्टमे शे भौमे वा विक्रमे शसमन्विते॥ मंदमांधगुसंयुक्ते क्रूरांशे युद्धतो मृतिं॥२५॥ युद्धे
नमरणं अथ्याष्ठे नियुक्ते त्रिभागपे॥ कुजेनवीक्षिते युक्ते भौमद्रेष्काणे तदृशके॥२६॥ रविभौमौ तदान्योन्यं
परस्परनिरीक्षितौ॥ परस्परगृहांशस्थौ द्वंद्वयुद्धान्मृतिं वदेत्॥२७॥ अष्टमे बहवः पापा भौमराशिक
संगताः॥ क्रूरषष्ट्यंशकयुताः संघे तन्मरणं वदेत्॥२८॥ नीचमूढारिगेहस्थाः सौम्याः सर्वपराजिताः
॥पापांशगाः पापयुताः संघे०॥२९॥ संघः स्यान्मरणं तस्य शनिराहुदिनाधिपाः॥ रंध्रे शवीक्षिताः सर्वे क्रू
रांशा मूढसंज्ञिताः॥३०॥ रोगस्थानगते सूर्ये तद्भावे पापसंयुते॥ पापदृष्टियुते भानौ पैत्तिकाद्व्रणमा
दिशेत्॥३१॥ तथा भृते निशानाथे क्रूरदृष्टे तदंशके॥ वातार्दितो भवेज्जातो रक्तपित्तार्दितः कुजे॥३२॥
श्लेष्मवातार्दितः सौम्ये तथा भृते विशेषतः॥ जीवे तु विद्रधिर्वाच्यः शुक्रे मूत्रातिसारभाक्॥३३॥ तथा
भृते शनौ गुल्मरोगो वात्र विशेषतः॥ राहुकेतुसमायुक्ते बाधा पैशाचिकी मता॥३४॥ चंद्रे षष्ठे कुजयु
ते भ्रांतिः पांड्वादिरोगकृत्॥ सारे चंद्रे रवियुते विसर्पीः शूलरोगकृत्॥३५॥ षष्ठे कुजे बुधयुते भृगुचंद्र
निरीक्षिते॥ क्रूरांशकसमायुक्ते क्षयरोगं वदंति हि॥३६॥ शन्यासहिते षष्ठे रविराहुनिरीक्षिते॥ लग्ने
श्वरे हीनबले दीर्घरोगी भवेन्नरः॥३७॥ षष्ठे शनौ सगुलिके रव्यारकाभिवीक्षिते॥ शुभैर्नदृष्टे युक्ते वा श्वा
सकासक्षयादिकृत्॥३८॥ जलराशिगते चंद्रे षष्ठे तद्भवनाधिपे॥ जलर्क्षस्थे विरादृष्टे मूत्रकृच्छ्रादिकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वदेत् ॥३९॥ षष्ठे चंद्रे शनैर्दृष्टे व्यये पापे विलग्नभे ॥ पापांशकसमायुक्ते पीनसं रोगमादिशेत् ॥४०॥ वलहीने
ऽरिस्थानाधिपे लग्नस्थे वा धरासुते ॥ मूर्द्धा निर्मुखरोगो वा गुल्मो विद्रधिभाक् भवेत् ॥४१॥ षष्ठेश्वरस्थितौ शो
शेरव्याधौस्यान्तयाभवेत् ॥ फलं पूर्वोक्तमप्यत्र क्रमात्तस्य विनिर्दिशेत् ॥४२॥ शत्रुस्थानाधिपे केंद्रे पापग्र
हनिरीक्षिते ॥ षष्ठे वा पापवाक्युक्ते शत्रुपीडां विनिर्दिशेत् ॥४३॥ लग्नेशे शत्रुराशिस्थे नरीशेलसमाश्रिते ॥
मंदमांद्यगुसंयुक्ते शत्रुपीडां विनिर्दिशेत् ॥४४॥ पापग्रहेणसंदृष्टे वलहीने रिनायके ॥ पापांतरगते वापि श
०॥४५॥ शत्रुस्थानाधिपे दुःस्थे नीचमूढारिसंयुते ॥ लग्नेशे वलसंयुक्ते शत्रुनाशं वदेद् बुधः ॥४६॥ शुभग्रहेण
संदृष्टे शत्रुस्थानाधिपे यदा ॥ शुभान्विते शुभक्षेत्रे तेन मैत्रं विनिर्दिशेत् ॥४७॥ लग्नेशाद्वलहीने तु शत्रुस्था
नाधिपे यदा ॥ शुभान्विते शुभैर्दृष्टे शत्रुणा मैत्रमादिशेत् ॥४८॥ लग्नेशे षष्ठभावस्थे षष्ठेशे नानिरीक्षिते
॥ तौ वा विलग्नभावस्थौ ज्ञातिपीडां विनिर्दिशेत् ॥४९॥ गुरुशुक्रौ विलग्नस्थौ षष्ठभावेश्वरान्वितौ ॥ शन्यार
फणिसंदृष्टे ज्ञातिपीडां विनिर्दिशेत् ॥५०॥ लग्नाधिपे शुभयुते षष्ठे चंद्रे यवाशुभे ॥ केंद्रत्रिकोणगे सौम्ये
ज्ञातिभिः सह जीवनं ॥५१॥ ज्ञातयो वहवः संति षष्ठेशे देवपूजिते ॥ शुभान्विते शुभैर्दृष्टे मंदे शारिसमन्विते
॥५२॥ ज्ञातिक्षयं विजानीयात् षष्ठेशे पापसंयुते ॥ क्रूरांशनीचमूढारी शुभदृग्योगवर्जिते ॥५३॥ पारावता
दिभागस्थे लग्नेशे शुभवीक्षिते ॥ ज्ञातीशे वलहीने वा तस्मादुत्कर्षतां वदेत् ॥५४॥ भाग्येशे षष्ठराशिस्थे षष्ठे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शेन निरीक्षिते ॥ षष्ठे शेमंद भौमाभ्यां युते चौराग्निपीडनं ॥५५॥ तद्रीशे गोपुरांशस्थे दिवसेशेन वीक्षिते
॥ लग्नेशे वत्सरे सप्तत्रिंशति नामुपकारकृत् ॥५६॥ षष्ठे सौम्ये शुभे दृष्टे तद्रीशे शुभसंयुते ॥ पापग्रहाणाम
प्यस्थे स्वपदं शास्त्रियो भवेत् ॥५७॥ ऊपरं शास्त्रियो नित्यं षष्ठे जीवे शशांकजे ॥ क्षेत्रे तयोर्वा संप्राप्ते स्वहं शास्त्रि
समन्विते ॥५८॥ दैवेज्ये षष्ठभावेशे शुक्रे वातस्य नायके ॥ मधुरादिप्रियो नित्यं गोपुरांशकान्विते ॥५९॥
शुक्रे षष्ठेस्त सौम्ये वा शुभदृष्टे शुभांशके ॥ बलान्विते शुभांशस्थे नित्यं मधुरभाग्भवेत् ॥६०॥ पापग्रहे रा
संदृष्टे बुधे मधुरवर्जितः ॥ बुधेन युक्ते शुक्रे ऽरौ लवणभाक्स नरो भवेत् ॥६१॥ शुक्रे षष्ठे भौमदृष्टे भौमक्षे
त्रेतदन्विते ॥ दिवसेशेन वा दृष्टे लवणे ॥६२॥ षष्ठेशे भौमसंयुक्ते राहुकेतुनिरीक्षिते ॥ भौमक्षेत्रेगते
वापि विप्रलंभादिचौर्यभाक् ॥६३॥ राहुकेतुसमायुक्ते षष्ठे पापनिरीक्षिते ॥ क्रूरांशके तद्रीशे वा विप्र॰
॥६४॥ पिचाशीनामिदं योज्यं तत्तद्भावप्रकारकैः ॥ नास्तिकाय न वक्तव्यं वक्तव्यं सुजनाय वै ॥६५॥ अध्या
यः पंचमः प्रोक्तः पंचमभाववाचकः ॥ विचित्रार्थसमायुक्तो वेंकटेशेन धीमता ॥६६॥ ॥ इति सर्वार्थचिं
तामणौ पंचमोध्यायः ॥ ॥ अथ सप्तमभावविचारः ॥ ॥ युवतिपदाद्दाहं भार्यापतिस्वपदाधिगुडक्षीरं ॥
आगमगमनमदाग्निं ब्रूयान्मन्त्राशयं च नष्टधनं ॥१॥ शुक्रे कलत्रे त्वतिकामुकः स्याद्बुधेन्यदाराभिरतो गुरौ तु
॥ स्वदाररक्तो दिननाथपुत्रे कुदाररम्यः सुपतौ सुदारः ॥२॥ कुजे वकुस्त्री पुरतः कुलघ्नी भानौ कुटुंबी पर

=दृष्टेद

स॰वि॰ ३२

दारस्थकः॥ लग्ने स्थिता वित्तकलत्रशत्रुनाथाः सशुक्रा यदि पापयुक्ताः॥३॥ जातः परस्त्रीषु रतः कुमार्गी
शुभेक्षितश्चेन्न तथा भवेत्सः॥ लग्नारिदौ पापयुतौ यदि स्यात् जातः परस्त्रीषु रतः कुमार्गी॥४॥ लग्नेश्व
रशत्रुकुटुंबनाथे पापैर्युते वा यदि वान्यराशौ॥ स्वारी वा पापे यदि दारनाथे जातः परस्त्रीषु रतः कुदृष्टी
॥५॥ सराहुकेतौ यदि दारनाथे पापेक्षिते वा व्यभिचारयोगः॥ कर्मेशवित्तेशकलत्रनाथा मानस्थिता जा
रसुतं हरंति॥६॥ एकोग्रहस्तेषु चतुर्थराशौ जातः परस्त्रीगमनं प्रयाति॥ पुत्रेश्वरे दारपतौ वलाढ्ये दृष्टे यु
ते वा त्वरिनायकेन॥७॥ जातो न पत्नी यदि तत्कलत्रे जारात्सुतः स्यात्कुभखेटकेषु॥ दारेश्वरे पापयुते कु
टुंबे भौमेन दृष्टे यदि जारपुत्रः॥८॥ धीधर्मनाथौ सकलत्रनाथौ दुःस्थानगौ हीनवलौ शुभेन॥ दृष्टे सुते
दारवकुत्वयोगे त्वपुत्रयोगं मुनयो वदंति॥९॥ ह्रीरौ राशांके यदि पापयुक्ते दारस्थिते त्वन्यकलत्रगामी
॥ लग्नेसपापे यदि दारनाथे जातः परस्त्रीषु रतः कुमार्गी॥१०॥ सुतेशदारभं याते तदीशे पापसंयुते॥ शु
क्रौ वलविहीनश्चेद्भार्या गर्भे हान्नीयते॥११॥ नीचेभ्रंगो वा यदि वा शशांके नीचस्थिते वा तु निदारहानिः॥
उद्धधनाग्न्यमरणं वदंति दारेश्वरे पापभुजंगयाते॥१२॥ द्रेष्काणभागे विषभस्थलग्ना मांद्यस्थिते
दारपतौ सराहौ॥१२॥ स्वर्क्षे कुटुंबाधिपतौ कलत्रनाथे यदा त्वेककलत्रभावस्यात्॥ नाभ्यांसमेते ग्रेहना

राम॰ ३२

CC-0. In Public Domain. Digitization by eGangotri

यकेवी कलत्रसंख्यां प्रवदंति संतः॥१३॥ कलत्रनाथस्थितराशिनाथसंयुक्तखेटै रपिवा च्यमेतत्॥१४॥
शन्यारफणिसंयुक्ते कलत्रेशे यदा भवेत्॥ क्रूरषष्ठ्यंशगे वापि कलत्रमरणं भवेत्॥१५॥ शुभग्रहे
णसंयुक्ते कलत्रेश रिनीचगे॥ कलत्रेशे वक्रगुणे तुंगवक्रादिहेतुभिः॥ वहुभार्यं नरं विंद्यात् दुःस्थमुद्वेग
ते यवा॥१६॥ भार्याद्वयं वदेत्तत्र लग्नेशेना शराशिगे॥ कलत्रे पापसंयुक्ते कुटुंबे शे तथाविधे॥१७॥ पा
पे कलत्रराशिस्थे विवाहद्वयमादिशेत्॥ कारके पापसंयुक्ते नीचराश्यंशगे भृगौ॥१८॥ पापग्रहेण
संदृष्टे विवाहद्वयमादिशेत्॥ कलत्रकारकः शुक्रो ज्ञो गुरुर्वा यवा भृगुः॥१९॥ मध्ये वलिष्ठो यस्तेषां
तस्मात्सर्वं निरूपयेत्॥ कलत्रे वा कुटुंबे वा पापदृग्योगसंभवे॥२०॥ तद्रीशो वलहीने तु कलत्रांतर
भाग्भवेत्॥ सप्तमे वाष्टमे पापे व्यये भूसुनंदने॥ अदृश्यपदिनाथेन कलत्रांतरभाग्भवेत्॥२१॥
वित्ते पापवहुत्वे तु कलत्रे वा तथाविधे॥ तद्रीशे पापसंदृष्टे कलत्रत्रयभाग्भवेत्॥२२॥ लग्ने कुटुंबे
दारे वा पापखेचरसंयुते॥ दारेशे नीचमूढा ह्रो कलत्रांतरभाग्भवेत्॥२३॥ नीचमूढारिभागस्थे ल
ग्नेशे दारपे यथा॥ क्रूरषष्ठ्यंशगे वापि कलत्रं॰॥२४॥ दारेशास्थनवांशेशे नीचमूढारिभागगे॥ पा
पांतरे पापदृष्टे क॰॥२५॥ एवं कुटुंबनाथेन कारकस्यांशपेन वा॥ पापांतरे दारगहे तन्नाथे पि कलत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हा॥२६॥ लग्नेश्वरात्कर्मगते सोमपुत्रे बलान्विते॥ दारेशाद्धिकर्मे चंद्रे बहुस्त्रीसहितो भवेत्॥२७॥
व्ययार्थेशौ तृतीयस्थौ गुरुणा च निरीक्षितौ॥ भाग्यनाथेन वा दृष्टौ बहु॰॥२८॥ केंद्रत्रिकोणगौ दारेशस्वा
मिनौ स्ववर्गगे॥ कर्माधिपेन वा युक्तौ बहु॰॥२९॥ लाभदारेश्वरौ युक्तौ परस्परनिरीक्षितौ॥ बलाढ्यौ
वा त्रिकोणस्थौ बहु॰॥३०॥ भाग्येशो दारराशिस्थो दारेशो सुखभंगते॥ भावेशो लाभनाथो वा केंद्रे बहुक
लत्रभाक्॥३१॥ सुखेशे केंद्रराशिस्थे जातो बहु॰॥३२॥ दारेशसंयुक्तनवांशनाथयुक्तांशनाथे सति
सौम्ययुक्ते॥ पारावतांशादियुते बलाढ्ये जातः शतस्त्रीसहितो नरः स्यात्॥३३॥ कुटुंबनाथस्थितरा
शिनाथसंयुक्तषष्ट्यंशपतौ च केंद्रे॥ मृदंशके गोपुरभागयुक्ते जातः शतस्त्रीद्वियुतोनयुक्तः॥३४॥ त
त्कारकस्थांशपयुक्तराशिनाथस्थितांशाधिपतौ च केंद्रे॥ मृदंशके गोपुरभागयुक्ते जातस्य वाच्या
त्रिशती तु भार्या॥३५॥ दारेशे गोपुरांशस्थे कर्मेशे दारराशिगे॥ तथाविधे कुटुंबेशे दशसंख्यकलत्रभाक्
॥३६॥ एवं पुत्रादिभावानां कलत्रादिकमादिशेत्॥ दारेशे पापसंयुक्ते दारे वा पापसंयुते॥३७॥ दारेशस्थां
शपे पापे कुस्त्रीभाक्स नरो भवेत्॥ क्रूरषष्ट्यंशगे दारनाथे कुस्त्रीयुतो भवेत्॥३८॥ नीचांशे नीचसं
युक्ते दारनाथे च कारके॥ कुस्त्रीयुतो भवेत्क्रांतः शुभदृग्विवर्जिते॥३९॥ दारेशे शुभसंयुक्ते शुभख

चरवीक्षिते ॥ शुभग्रहाणां मध्यस्थे सत्कलत्रादिभाग्भवेत् ॥४०॥ दारेशे शुभराश्यंशे कारके वा तथा विधे
॥ कर्मेशे बलसंयुक्ते सत्कलत्रसमन्वितः ॥४१॥ स्वोच्चे मित्रे स्ववर्गे वा गोपुराद्यंशके भृगौ ॥ षष्ठ्यंशे वा शुभा
ग्रस्थे सत्कलं ॥४२॥ गुरुणा सहिते दृष्टे दारनाथे बलान्विते ॥ कारके वा तथा भावे पतिव्रतपरायणा ॥४३॥ क
लत्रेशे गुरौ वापि भृगुसौम्यनिरीक्षिते ॥ गुरुयुक्ते कलत्रे वा धर्मशीला पतिव्रता ॥४४॥ कलत्राधिपतौ कें
द्रे शुभग्रहनिरीक्षिते ॥ शुभांशे शुभराशौ वा पत्नी स्यात्तु पतिव्रता ॥४५॥ कलत्रेशे रवौ वापि पापराश्यंश
संयुते ॥ पापान्विते पापदृष्टे पत्नी पापपरायणा ॥४६॥ भानौ कलत्राधिपतौ वलाढ्ये शुभान्विते शोभनरा
शिभावे ॥ शुभग्रहेणापि निरीक्षिते वा लग्नेशमित्रे पतिभक्तियुक्ता ॥४७॥ दारेश्वरे वा कुमुदात्मबंधौ पापा
न्विते पापनिरीक्षिते वा ॥ पापांशके पापग्रहांतरस्थे कुमार्गचारी कठिनापराधा ॥४८॥ सौम्यांशके सौम्य
ग्रहान्विते वा मित्रोच्चगेहे मृदुभागयुक्ते ॥ चंद्रे कलत्राधिपतौ च युक्ते पुण्या सशीला सुचरित्रयुक्ता ॥४९॥
दाराधिपे हीनवले धराजे क्रूरादिषष्ठ्यंशसमन्विते वा ॥ नीचारिमूढे विहगारिभावे दुष्टान्यसक्ता पति
कर्कशीला ॥५०॥ मित्रोच्चवर्गे यदि दारनाथे शुभान्विते सौम्यदृशा समेते ॥ पारावतांशादिगते वलाढ्ये न
रापि पत्युर्गुणमार्गवर्त्ती ॥५१॥ दाराधिपे सोमसुते सपापे नीचारिमूढे यदि नाशभावे ॥ पापांतरे पापदृ

स॰ चिं॰
३५

शासमेते जाता कुलघ्नी पशुनाशकारी॥५०॥ सत्पुत्रसौख्यान्वितधर्मशीला व्रतोपवासादिविशुद्धदेहा॥ सौम्ये कलत्राधिपतौ बलाढ्ये मित्रोच्चवर्गे यदि गोपुरांशे॥५१॥ भृगोः सुते दारपतौ सपापे पापेक्षिते नीचमदारिगेहे॥ क्रूरादिषष्ट्यंशसमन्विते वा वेश्या समाना कठिना हि चौरा॥५४॥ शुक्रे कलत्राधिपतौ बलाढ्ये शुभान्विते शोभनखेचरांशे॥ मित्रोच्चवर्गे स्वगृहे मृदुस्ये वा वाटकी पुत्रवती गुणाढ्या॥५५॥ जाराति दुष्टा कुलदूषणी स्यान्मंदे कलत्राधिपतौ सपापे॥ नीचांशके नीचगृहे रिपोर्गेहे पापेक्षिते पापवियच्चरांशे॥५६॥ परोपकारी द्विजदेवभक्ता स्त्री ब्रह्मवादी गुरुदृष्टियुक्ते॥ शुभेक्षिते धर्मरता सुशीला मंदे कलत्राधिपतौ बलाढ्ये॥५७॥ सराहुकेतौ मदने न्यसक्ता पापेक्षिते पापरता कुशीला॥ क्रूरांशगे भर्तृविषप्रदा स्यात् क्रोधाकोपवाशान्वितकर्कशा स्यात्॥५८॥ दारेश्वरे सन्निहिते विलग्ननाथस्य वा स्वेप रिणीतिमाहुः॥ लग्नात्कलत्राक्षुभखेचरेंद्रे समीपराशौ यदि तत्र थैव॥५९॥ लग्ने कुटुंबे यदि दारभावे शुभान्विते शोभनवर्गयुक्ते॥ तदीश्वरे शोभनदृष्टियुक्ते बाल्ये विवाहादिकमाहुरार्याः॥६०॥ पारावतांशादिगते कलत्रनाथे कुटुंबाधिपतौ बलाढ्ये॥ तद्दशभावे तनुभावनाथे बाल्ये विवाहं मुनयो वदंति॥६१॥ भाग्यं विवाहात्परतो वदंति शुक्रे स्वगेहे चोपचयान्विते वा॥ कुटुंबपे तादृशभागयुक्ते लग्नेश्वरे वा शुभदृष्टियोगे॥६२॥ त्कारके दारपतौ कुटुंबनाथे

=शुभाद्येऽ

राम॰
३५

४५

CC-0. In Public Domain. Digitization by eGangotri

विलग्नाधिपतौ च दुःस्थे ॥ नीचारिमूढांशगते सपापे भाग्यं विवाहात्प्रविनाशमेति ॥ ६३ ॥ क्रूरादिषस्वंश
समन्विते पि तत्कारके तादृशखेचरेन्द्रे ॥ शुभान्विते शोभनदृष्टियोगे नाशात्परं भाग्यमुपैति जातः
॥ ६४ ॥ क्रूरे कलत्रे शयुते त्रिकोणे तत्कारके पापसमन्विते वा ॥ कुटुंबराशौ यदि वात्र माने दूरे विवाहं कथ
यंति संतः ॥ ६५ ॥ माने सपापे यदि वा कुटुंबे भाग्ये यथा पापयुते कलत्रे ॥ क्रूरांशके क्रूरनिरीक्षिते वा दूरे
वि० ॥ ६६ ॥ पुत्रादिलाभे बुधमेवमाहुस्तं चिंतयित्वा प्रवदेत्सुतादीन् ॥ लग्नेश्वराद्धीनबले कलत्रनाथे रि
भागांशयुते विमूढे ॥ ६७ ॥ नीचांशके नीचसमन्विते वा निकृष्टजातौ हि कलत्रलाभः ॥ लग्नेश्वरात्पूर्ण
बले कलत्रनाथे शुभांशे शुभदृष्टियोगे ॥ ६८ ॥ वैशेषिकांशे परमोच्चभागे उत्कृष्टजातौ हि कलत्रला
भः ॥ लग्नेश्वरे हीनबले कलत्रनाथात्सपापे यदि नीचभागे ॥ ६९ ॥ नाशस्थिते वा त्ववरोहभागे कलत्र
जातेः स्वयमेव हीनः ॥ तस्माद्बलाढ्ये तु विलग्ननाथे त्वारोहभागे परमोच्चभांशे ॥ ७० ॥ केंद्रत्रिकोणे यदि वा
स सौम्ये श्रेष्ठः कलत्रात्स्वयमत्र जातः ॥ कलत्रनाथाद्यदि वा कलत्रराशेः कुटुंबाधिपते यदि द्वा ॥ ७१ ॥ बले
तु साम्ये समजातिमाहुः स्त्रियं सुशीलां पतिपंक्तिचित्तां ॥ लग्नेश्वरस्यापि कलत्रनाथे शत्रौ नदी या स्वि
हृशानुभर्तारः ॥ ७२ ॥ मित्राणि ते तस्य कुलोद्भवाश्च मित्रे विलग्नाधिपतेस्तदानी ॥ दारेश्वरस्यापि विलग्नना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पेशाखौ तदीयाख्त्वर यस्तु तोन्ये ॥७३॥ कलत्राधिपतेर्वर्गे राशेर्वाकारकस्य वा ॥ सर्वोत्तमबलस्यैव तेषां म
ध्ये विनिर्दिशेत् ॥७४॥ सुगुणरूपसंपन्ना तस्मिन्गुर्वंशे वीक्षिते ॥ पापेक्षिते पापयुक्ते कुरूपा दुर्गुणा भ
वेत् ॥७५॥ कलत्रनाथस्थितभं तदीयराशिं कलत्रस्य विदुर्महांतः ॥ तत्स्वामिनी चंद्यदिवा कलत्रराशिं
तदंशाश्रितयेतदीयं ॥७६॥ कलत्रराशित्रितयेषु वास्या तदीशसंयुक्तभकोणराशौ ॥ कलत्रराशिं स
मुद्दाहरंति प्रोक्तान्यराशौ यदि नास्ति युक्तः ॥७७॥ गोसिंहकन्यालिषु जन्मराशिः स्त्रीणां भवेद्गुन्मनि
वाल्यपुत्रः ॥ शुभग्रहेणाक्रमिते युते यु सुतान्वदेत्तत्र बहून्गुणाढ्यान् ॥७८॥ वंध्यासंगोमदे भानौ चंद्रे
दासीसमाः स्त्रियः ॥ कुजे रजस्वलासंगो वंध्यासंगश्च कीर्तितः ॥७९॥ बुधे वेश्यावेश्या हीना वा वणिक्स्त्री वा
प्रकीर्तिता ॥ गुरौ ब्राह्मणभार्या स्यात् ऊर्ध्विणीसंगमो भवेत् ॥८०॥ हीना वा पुष्पिणा वा स्यान्मंदराहुफ
णीश्वरैः ॥ राहोश्च गर्भिणीसंगः स्फुटपापकुजयाशनैः ॥८१॥ एवं सुखस्थिते रेते रीढक्त्री संगमुच्यतां
॥ सूर्याद्यैः सुखगैर्वीर्यो वाद्गृनं गृहनिर्णयः ॥८२॥ वनं गृहं च कुड्यं स्याद्विहारो देवतालयं ॥ जलेहरिग
ऊस्थानमिति स्थानं निरूप्यते ॥८३॥ पापेयुक्ते चतुर्थके केंद्रे च तुष्यान्मेषुनं वदेत् ॥ पापेर्दृष्टेषु सर्वेषु केंद्रे
ष्वेवं विनिर्दिशेत् ॥८४॥ केंद्रकोणपापयुते पशुवन्मैथुनं वदेत् ॥ मंदे पापान्विते वापि समांशे तादृशं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वदेत् ॥८५॥ मंदे सूर्ये सुखे भौमे पशुवन्मैथुनं वदेत् ॥ राहौ कलत्रे भौमे वा सुखे ताद्दशा मैथुनं ॥८६॥ मंदे शेभृ
गुसंदृष्टे भृगुणा सहिते यथा ॥ भृगुक्षेत्रगते वापि भगचुंबनमाग्भवेत् ॥८७॥ कर्मेशे मंदसंदृष्टे भौमक्षे
त्रगते यथा ॥ भृगुणा सहिते वापि भगचुंबनमादिशेत् ॥८८॥ कुजे क्रूरा स्तना मंद राहू रोलंबनस्तना ॥ क
ठिनौ कुचा भानौ शेषे स्थूलोन्नमस्तना ॥८९॥ पापैर्नैकेन सहिते वेलक्रूरा स्तना भवेत् ॥ दारेशे पापखेटे
दाशुभे वा ताद्दशास्तना ॥९०॥ शुभद्वयेन सहिते दारेशे पितथा विधे ॥ शुभस्तना भवेत्पत्नी पापयोगे न्यथा
भवेत् ॥९१॥ अतिस्थूलस्तना पत्नी सशुभे दारनायके ॥ जलग्रहे जलर्क्षस्थे गुरुणापि निरीक्षिते ॥९२॥ रवौ
वा भूमिपुत्रे वा मंदमांद्यगुसंयुते ॥ दाराधिपे पापभागे भगदैर्घ्यं विनिर्दिशेत् ॥९३॥ तदीशो गुरुशुक्रौ वा
शुभांशासहितौ यदा ॥ समंभगं भवेत्तस्याः पापयुक्तौ तु दैर्घिकं ॥९४॥ शनिचंद्रविदां मध्ये यद्येकस्मिन्म
देश्वरे ॥ क्रूरंभगं समादिष्टं स्त्रियामेवं विनिर्दिशेत् ॥९५॥ कलत्रेशे जलर्क्षस्थे कारके वा तथा विधे ॥ ज
लर्क्षे सरभावे वा पूर्णचंद्रनिरीक्षिते ॥९६॥ चंद्रे जलर्क्षे दारस्थे जलस्थभृगुवीक्षिते ॥ जलर्क्षस्थे विदा
दृष्टे स्त्रीगुह्यस्यार्द्रता भवेत् ॥९७॥ पूर्णेशशांके दारस्थे जलराश्यंशके पि वा ॥ जलस्थगुरुसंदृष्टे सततं ल
र्द्रता भवेत् ॥९८॥ परमोच्चांशके शुक्रे जलराशिगते पि वा ॥ भानौ वाऽऽरयुते वापि मेषुना देवता द्दशं ॥९९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दारेशे शुक्रराशिस्थे दारे वा शुक्रसंज्ञके ॥ शुभग्रहेण संयुक्ते त्वनाईं गुह्यमादिशेत् ॥१००॥ पापक्षेत्रे पापम
ध्ये दारेशे पितथाविधे ॥ पापदृग्योगसंजाते त्वनाईं गुह्यमादिशेत् ॥१॥ सप्तमेशे गुरौ दृष्टे शोभनांशस
मन्विते ॥ सौम्यांशे सौम्यसंदृष्टे स्वपदध्यायभाग्भवेत् ॥२॥ सप्तमस्थे बुधे दृष्टे गुरुणा बलसंयुते ॥
भुक्तौ सेनापि संदृष्टे स्वप० ॥३॥ दारस्थे भृगुपुत्रे वा दृक्चंद्रनिरीक्षिते ॥ पापैर्युक्ते दृष्टे वा स्वप० ॥४॥ र
वौ वा भूमिपुत्रे वा सप्तमेशे शुभेक्षिते ॥ बुद्धिस्थानगते वापि कराचि दृषिस्वपभाक् ॥५॥ पापे सप्तमभा
वस्थे तदीशे पापसंयुते ॥ क्रूरषष्ठ्यंशके वापि द्युतस्वपादिहीनभाक् ॥६॥ चंद्रे गुरौ वा दारेशे जलराश्यंश
संभवे ॥ जलग्रहेण वा दृष्टे हीरपानादिभाग्भवेत् ॥७॥ सप्तमेशस्थितांशेशे शुभदृष्टिसमन्विते ॥ शुभ
ग्रहांशके वापि गुडक्षीरादिभाग्भवेत् ॥८॥ बहवः सप्तमे पापाः षष्ठे वा रंध्रभेऽपि वा ॥ क्रूरषष्ठ्यंशसं
युक्ता नरककुंडं विनिर्दिशेत् ॥९॥ इति सप्तमभावस्थानि श्रितार्थविचित्रयुक् ॥ षष्ठाध्यायो मयाप्रो
क्तो वेंकटेशेन शर्मणा ॥१०॥ ॥ इति सर्वार्थचिंतामणौ षष्ठोध्यायः ॥ ॥ मरणं जीवनमरणं गुह्यस्था
नं च मरणहेतंश्च ॥ अत्र सुखं मरणदेशं परिभवमपि चिंतयेत्प्राज्ञः ॥१॥ रंध्रेश्वरे पापयुते त्वपरा
शावल्पायुरस्येति वदंति षष्ठे ॥ तत्राधिलग्नेश्वरयोगजाते त्वल्पायुरस्येति वदंति संतः ॥२॥ स्वक्षेत्र सं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थे यदि रंध्रनाथे दीर्घायुराहुर्मुनयो महांतः॥ मंदेन वा चिंत्यमशेषमायुः स्वक्षेत्रमित्रोच्चगृहस्थिते
न॥३॥ रंध्रेश्वरेणापि युते विलग्ननाथे स्थिरे वा व्ययराशियुक्ते॥ षष्ठांत्यपे वाय दिलग्नयुक्ते दीर्घा
युरस्येति शुभेक्षितश्चेत्॥४॥ कर्मेश्वरेणापि विचिंत्यमायुर्दीर्घं शुभः स्वोच्चयुते न तेन॥ केंद्रस्थितैः
कर्मविलग्नरंध्रनाथैस्तथैवायुरुदाहरंति॥५॥ त्रोक्तग्रहे व्योमचरैस्त्रिभिर्वा सभानुजैः केंद्रगतैस्तथै
व॥ स्वक्षेत्रकोणादिगतैर्विशेषाद्वदंति दीर्घायुरुदारचित्ताः॥६॥ चतुरस्रे शुभैर्युक्ते लग्नेशे शुभसंयु
ते॥ गुरुणा दृष्टिसंयोगे पूर्णमायुर्विनिर्दिशेत्॥७॥ केंद्रान्विते विलग्नेशे गुरुशुक्रसमन्विते॥ ताभ्यां नि
रीक्षिते वापि दीर्घमायुर्विनिर्दिशेत्॥८॥ त्रिषडायगताः पापाः शुभाः केंद्रत्रिकोणगाः॥ लग्नेशे बलसंपू
र्णे पूर्णमायुर्विनिर्दिशेत्॥९॥ षट्सप्तरंध्रभावेषु शुभेषु सहितेषु च॥ त्रिषडायेषु पापेषु पूर्णं०॥१०॥
रंध्राधिपे विलग्नस्थे गुरुशुक्रेक्षितेयुते॥ लग्नेशे केंद्रराशौ वा दीर्घ०॥११॥ उच्चाश्रिते स्त्रिभिः खेटैर्ल
ग्नरंध्रेशसंयुते॥ रंध्रे पापविहीने स्ते दीर्घं०॥१२॥ रंध्रस्थिते स्त्रिभिः खेटैः स्वोच्चमित्रस्ववर्गगैः॥ लग्नेशे
बलसंयुक्ते दीर्घ०॥१३॥ पारावतादिभागस्थाः पापाः सर्वे शुभास्तथा॥ केंद्रत्रिकोणनिलयाः पूर्ण०॥१४॥
षष्ठाष्टमे व्यये पापे लग्नेशे दुर्बले यदि॥ अल्पायुरनपत्यो वा शुभदृग्योगवर्जिते॥१५॥ क्रूरषड्वर्गगे वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पिरं प्रेरो भानुजेऽपि वा ॥ पापान्विते पापदृष्टे त्वल्पमायुर्विनिर्दिशेत् ॥१६॥ अन्यत्र तु लग्नगते पापे शुभदृष्टिविवर्जि-
ते ॥ बलहीने विलग्नेशे त्वल्पमायुर्विनिर्दिशेत् ॥१७॥ यया यौ पापसंयुक्तौ शुभदृष्टिविवर्जितौ ॥ क्रू-
रषष्ठ्यंशगो वापि स्वल्पं० ॥१८॥ आयुर्योगा मिश्रिता ये स्वल्पमध्यचिरायुषां ॥ द्वात्रिंशत्पूर्वमल्पायु-
र्मध्यमायुस्ततो भवेत् ॥१९॥ सप्तत्याः प्राक्ततः पूर्णमायुरेवं वदंति हि ॥ अल्पायुर्दिननाथस्य शत्रौ
लग्नाधिपे यदा ॥२०॥ समत्वे मध्यमायुः स्यान्मित्रे दीर्घायुरादिशेत् ॥ बलहीने विलग्नेशे जीवे केंद्रत्रि-
कोणगे ॥२१॥ षष्ठाष्टमे व्यये पापे मध्यमायुरुदाहृतं ॥ शुभे केंद्रत्रिकोणस्थे शनौ बलसमन्विते ॥२२॥
षष्ठे वाप्यष्टमे पापे मध्यमायुरुदाहृतं ॥ लग्ने केंद्रे त्रिकोणे वा मध्यमायुश्च मिश्रिते ॥२३॥ अल्पायुर्यो-
गजातानां विपत्याकौ मृतिप्रदः ॥ मध्यमे प्रत्यरिदशा मृतिं दद्याद्विशेषतः ॥२४॥ वधभे सा दशा कष्टा
पूर्णायुर्योगसंज्ञके ॥ योगायुरिति निश्चित्य जातस्यैवं विनिर्दिशेत् ॥२५॥ आयुर्विलग्नाधिपती बलेन
हीनौ धरासुनुग्रलेशयुक्तौ ॥ युद्धे मृतिं तस्य वदंति तज्ज्ञाः शस्त्रेण वातन्मरणं विशेषात् ॥२६॥ रंध्रांग-
नाथौ यदि वारिपुस्थौ राहून्वितौ केतुयुतौ समंदौ ॥ तद्भुक्तिकाले व्यथवा विपाके शस्त्रेण चौरैर्मरणं प्र-
याति ॥२७॥ रंध्रांगपौ वाहननाथयुक्तौ तस्मान्मृतिं तस्य वदंति तज्ज्ञाः ॥ मृतिं त्वजीर्णाद्गुरुसंयुतौ तौ दे-

हे शशीवौ रिपुगा वजीणीत्॥२८॥ लग्नेश्वरे वाहननाथयुक्ते वागीश्वरेणापि युते त्वजीर्णान्॥ देहेश्वरे वा
हनवित्तभावनाथान्विते वा मरणं त्वजीर्णात्॥२९॥ रंध्रेशयोगान्मरणं दशायामंतर्दशायामथवा वदंति
॥पित्रादिभावाधिपयोगदस्या पित्रादिकानां मरणं तथैव॥३०॥ भुक्तंपगपौ भानुसुतेन युक्तौ दुःस्थानगौ वा
विषभक्षणेन॥ राहुध्वजाभ्यां सहितौ च दुःस्थाबुद्धंधनान्मस्य मृतिं वदंति॥३१॥ षष्ठेश्वरे भानुसुते सर
कुकेतौ मृगाद्वीति मुदाहरंति॥ जीवेन युक्ते गजभीतिमस्य जातस्य चंद्रेण युते श्वभीतिं॥३२॥ सूर्यान्विते
ता दृशा भानुसुते मृगात्स शृंगाच्छुनकात्स भौमे॥ षष्ठस्थिते भानुसुतेपि चैवं विनाश्वमुंगे स्वगृहं सखेटे॥
॥३३॥ सुखेशभाग्येशविलग्ननाथास्त्रिकोणगाः केंद्रगताश्च सर्वे॥ भुक्तौ यदा तत्परिपाककाले पित्रा सहै
वानुमृतिं तु मातुः॥३४॥ रंध्रेशशांके फणिनाथयुक्ते हीने लपस्मारयुतः समांदे॥ तत्र स्थिते हीनबले शशांके
पिशाचपीडा च जले विपत्ति॥३५॥ भौमाहिमंदान्यतमेन युक्ते हीणे शशांके निधनस्थितेपि॥ दुःखे त्वपस्मार
भयान्मृतिः स्यान्निशाचवाधा द्यथवा मृतिस्स्त॥३६॥ रंध्रेसराहौ यदि वाससकेतौ चातुर्थिकापीडनमाकुरस्य॥
रंध्रेश्वरेणापि युते तथैव क्रूरारिदिषस्पश युते ति सत्पे॥३७॥ नीचस्थिते वासरनायके वा षष्ठाष्टमस्थे यदि पापदृष्टे
॥ राज्ञां प्रकोपान्मरणं पितुश्च नत्पीडया वित्तविनाशमेति॥३८॥ कर्मविदारस्य योगाः॥ ॥ लग्नात्कुंभे कर्मणिभ

स.चिं.
३९

मिपुत्रे पापान्विते मातुलमृत्युमाहुः॥ मंदेन युक्ते यदि पुत्रमृत्युं चंद्रे हितेन्मातृमृतिं सपापे॥३९॥ पितुर्मृतिं वा
सरन्नायके न न संशयः पापदृशा समेते॥ पापद्वयेनापि युतौ विलग्ने निशाकरौ मृत्युमुपैति बाल्ये॥४०॥ अस्ते
शशांके परिवेषयुक्ते पापेक्षिते वा मरणं च सद्यः॥ व्ययाष्टमे तो येषु विलग्नचंद्रे तातं जनित्री सुतमातुलांश्च
॥४१॥ पदक्रमेणापि निहंति तांस्तु शुभैर्न दृष्टे सहितेन दोषः॥ लाभे शुभे वा यदि मंदभौमफणीद्रयुक्ते पि
तुरत्ययाय॥४२॥ पापेक्षिते भूमिसुते कलत्रे भ्रातः समृत्युं समुपैति रंध्रे॥ सोन्त्ये धरासूनुयुते सपापे पापे
क्षिते सोदरनाशमाहुः॥४३॥ अस्ते शशांके यदि मातृमृत्युं पापान्विते पापदृशा समेते॥ भानौ पितुर्मृत्युमुदाहृ
रंति मंदारकेतुश्चैः सहिते सुतस्य॥४४॥ तृतीयषष्ठस्थितखेचरेंद्रैः पापग्रहे रंध्रगते स्वसौम्यैः॥ शिशोर्मृ
ति [redacted] धाकुमुहात्मबंधो चतुर्थरंध्रस्थितपापखेटैः॥४५॥ लग्नेर्कचंद्रौ व्ययगाश्च पापाः शि
शोर्मृतिं शोभनदृष्ट्यभावे॥ अस्ते रवौ चंद्रयुते विलग्ने पापान्विते तत्सुतमृत्युमाहुः॥४६॥ दिनेशचंद्रौ व्ययगौ
तदानीं मंथो भवेत्सौम्यदृशा विहीनो॥ युक्ते तयोरन्यतरेण रिःफे कालो भवेत्सौम्यदृशा विहीने॥४७॥ दिने
शचंद्रौ व्ययगौ तदीये लग्नस्थिते देहविनाशमाहुः॥ सुखेश्वरे रंध्रगते व्यये वा पापान्विते पापदृशा समेते॥
॥४८॥ दुःस्थेन्दुनीयाधिपतौ सचंद्रे स्तन्यं परस्त्री पिबेत्स बालः॥ लग्नाधिपे पूर्णबले सुखेशभाग्येश्वरौ ना

राम.
३९

49

CC-0. In Public Domain. Digitization by eGangotri

शगतौ विहीनौ ॥४९॥ जातस्य जन्मावसरे तस्थानी पितुश्च मातुर्निधनं वदंति ॥ नाते शतत्कारक खेचरेंद्रौ दुःस्थौ
तयोः पुत्रसुखं न दृष्टं ॥५०॥ केंद्रे त्रिकोणे यदि तौ विहंगौ वदंतु योः पुत्रसुखं न दृष्टं ॥ पितुर्निशायां मरणं
वदंति भाग्येशसूर्यार्कसुताः कृतस्थाः ॥५१॥ षष्ठे व्यये रणा पितु ताः स्तथैव चंद्रे रणहीनास्तु दिवा मृतिः स्या
त् ॥ सुखस्थितैः खेचरनायकैर्वा मातुर्मृतिः स्याद्दयने तु तस्मिन् ॥५२॥ नीचेत्रदीयान्वितराशिकाले
मातुर्मृतिः स्याद्दयने तु तस्मिन् ॥ द्वित्र्यादियोगाद्दयने हि तत्र व्यत्यासतो वा प्रवदंति संतः ॥५३॥ नाशेच
रे वा पितृभावनाथे दूरस्थितस्तत्कुजनको पिवाच्यः ॥ स्थिरे भयस्थे पितृभावनाथे समीपतस्तत्कुजनकः स्थि
तः स्यात् ॥५४॥ केंद्रेचरे केंद्र यदि वा राशांके सुतो हहेन्त्यितरोनतत्र ॥ द्विदेहराशौ यदि तौ चकेंद्रे तयोर्मृति
र्वा दहनं द्विकालः ॥५५॥ बलेन युक्ते पितृभावनाथे शशांकदेहेश चतुर्थनाथाः ॥ बलेन हीना यदि तत्कुजन्मा
गंडाद्विपत्तिं समुदाहरंति ॥५६॥ रंध्रे तु पापवाकुल्ये गुह्ये रोगं विनिर्दिशेत् ॥ शुभग्रहेण संदृष्टे न दोषस्त
त्र निर्दिशेत् ॥५७॥ रंध्रे शुभे क्षिते तेन संयुते च सुखं भवेत् ॥ स्थलोत्रं पापसंबंधे मृद्यत्रं शुभवीक्षिते ॥५८॥
रंध्रेशे पापसंयुक्ते पापदृष्टे तदंतरे ॥ पापहेत्रेयवा रंध्रे जातः परिभवान्वितः ॥५९॥ शुभग्रहाणां संबंधे रंध्रे
परिभवो न हि ॥ चरे रंध्रे मृतिर्दूरे तदीशे चरराशिगे ॥ शनौ वा चरराशिस्थे चरांशस्थे तथा भवेत् ॥ स्थिरे रंध्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स.चिं.
४०

+१गा४

तदीशेपि स्थिरराशौ तदंशके ॥६१॥ राशौ वा स्थिरराश्यंशे स्वगृहे मरणं भवेत् ॥ रंध्रे द्विदेहराश्यादौ मार्गे मरणं
मादिशेत् ॥६२॥ ॥ अथ नवमभावफलं ॥ ॥ शुभभवनाकुरुभाग्यं पित्र्यो वा दयस्तपःप्राप्तिः ॥ गुरुस्थानं सं तं
सद्भोग्यं स्नानयोगमपि विद्यात् ॥१॥ चिंतनीया गुरुस्वामी पितृभाग्यादि मातुलाः ॥ नवमे स्वामिसौम्या
द्ये शुभाः एते न्याय्यानुभाः ॥२॥ चंद्रे सपापे यदि धर्मराशौ भृगोः सुते वा गुरुदारगामी ॥ धर्माधिपे ताद्दशखेचरेण
युते सपापे गुरुदारगामी ॥३॥ धर्माधिपस्यांशपतौ तथैव युक्ते तदा ताद्दशदारगामी ॥ वयोधिकस्त्रीगमनं
वदंति चंद्रे सपापे यदि धर्मराशौ ॥४॥ हीनेऽतिहीने शोत्थ यवा तदंशे शुभे ते तथैवं गुरुदारगामी ॥ धर्माधिपे नीच
गते तदंशे शुक्रेण युक्ते गुरु० ॥५॥ धर्मेश्वरे सौम्ययुते तदंशे वैशेषिकांशे त्व यवा तदीशे ॥ क्रूरादिषष्ट्यंशा
विवर्जिते स्यात्ततस्तु धर्मे हृदबुद्धिशुभः ॥६॥ गुरौ वा भृगुपुत्रे वा स्थो नवमे चांशसंयुते ॥ धर्माधिपे बलयु =केशुभेप
ते धर्माध्यक्षो नरो भवेत् ॥७॥ गुरुशुक्रबुधांशस्थे धर्मनाथे शुभेक्षिते ॥ शुभग्रहाणां मध्यस्थे धर्मभाक्स न
रो भवेत् ॥८॥ सौम्यान्विते धर्मगृहे तस्मिन्पापांशसंयुते ॥ क्रूरषष्ट्यंशके वापि दंभाद्धर्मे परिग्रहः ॥९॥ ना
पकारकभावानामंशे शुभसमन्विते ॥ शुभांशे शुभसंदृष्टे सुचिंत्यो धर्मसंयुतः ॥१०॥ धर्मे पापे पापभाक्ष
स्यात्तदीशे पापसंयुते ॥ क्रूरषष्ट्यंशके वापि पापमध्यगतेपि वा ॥११॥ राहुमंदयुते धर्मे क्रूरांशे गुलिके

राम.
४०

CC-0. In Public Domain. Digitization by eGangotri

क्षिते॥तदीशे क्रूरराश्यंशे त्वति क्रूरादिकं भवेत्॥१२॥पितृस्थानेश्वरे सौम्ये कारके शुभसंयुते॥भावे वा शु
भसंयुक्ते पितृसौख्यं विनिर्दिशेत्॥१३॥पारावतादि भागस्थे तन्नाथे कारकेपि वा॥स्वोच्चमित्रांशके वापि पि
तृ०॥१४॥सौम्यांतरस्थे तन्नाथे गुरुशुक्रबुधेक्षिते॥तेषामेकेन संयुक्तेपि०॥१५॥गोपुराद्यंशसंयुक्ते कार
के नाथवीक्षिते॥पापैरनीक्षिते युक्तेपि०॥१६॥पापदृष्टे सपापे वा कारके भावनायके॥पापांतरगते वापि पि
तृदुःखं०॥१७॥क्रूरनीचांशकस्थे वा भावनाथे च कारके॥मंदमांद्यगुसंयुक्ते पितृदुःखं०॥१८॥सौम्ये तदीश्वरे
वापि नीचशत्रुसमन्विते॥क्रूरषष्ट्यंशके वा पितृदुःखं०॥१९॥पितृस्थानेश्वरांशेशसंयुते नवभागपः॥क्रू
रनीचारिभागस्थः पितृ०॥२०॥लग्नेशात्पितृभावेशे संपूर्णबलसंयुते॥कारके वा शुभैर्दृष्टे जातः पितृवशा
नुगः॥२१॥पितुर्जन्माष्टमे जातस्तदीशलग्नगेपि वा॥तेनैव पितृकार्याणि कर्मशेषं समापयेत्॥२२॥पितृ
कर्मगृहे जातः पितृतुल्यगुणान्वितः॥पितृजन्मतृतीये हि जातः पितृधनाश्रितः॥२३॥पितुः षष्ठाष्टमे जा
तः पित्रोः शत्रुर्भवेन्नरः॥पितुर्धर्माय वित्तेषु जातः पितृवशो भवेत्॥२४॥पित्रष्टमेशानिहे त्रितये
यस्तु जायते॥स करोति पितुर्दीक्षां पुत्रपौत्रसमन्वितः॥२५॥पितुर्जन्मांत्यभेशाहे त्रितये यस्तु जाय
ते॥स करोति पितुर्दुःखं दूरदेशगतो भवेत्॥२६॥भाग्याधिपे विलग्नेदुश्चिक्ये कर्मगे वापि॥बलवान्सौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्भमध्ये वंये घांते मानवा धन्याः ॥२७॥ त्रिकोणकेंद्रे यदि भाग्यनाथे सौम्येक्षिते सौम्ययुते वलाढ्ये ॥ पारावतांशा
दिगते शुभांशे जातो धनाढ्यो बहुभाग्ययुक्तः ॥२८॥ धनाधिपे लाभगते तदीशे भाग्यस्थिते तद्भवनाधिपे र्थे ॥
कर्माधिपेनापि युते च दृष्टे जातो महाभाग्ययुतो नरः स्यात् ॥२९॥ तृतीयराशेरधिपेन युक्ते भाग्याधिपे सौ
म्यदृशा समेते ॥ शुभान्विते शोभनखेचरांशे भ्रातुर्हि नाम्ना भाग्यमुपैति जातः ॥३०॥ पुत्रेश्वरे वा यदि भाग्यरा
शौ भाग्याधिपेनापि युते च दृष्टे ॥ तत्कारके वा यदि पुत्रभावे जातः सुताद्भाग्यमुपैति चित्तं ॥३१॥ ज्ञातिस्था
नाधिपे भाग्ये भाग्येशे ज्ञातिभं गते ॥ ज्ञातिकारकसंयुक्ते ज्ञातिभाग्यमुपैति सः ॥३२॥ कलत्रकारकाद्देवं
तत्स्थाने शाद्वदेत्तथा ॥ भाग्याधिपस्य शत्रुश्चेछत्रुराश्यधिपस्तथा ॥३३॥ तदीशे भाग्यसंबंधे शत्रुभाग्य
मुपैति सः ॥३३॥ भाग्याधिपे विनाशस्थे शत्रुनीचारिवीक्षिते ॥ क्रूरांशे नीचराश्यादौ भाग्यहीनो भवेन्नरः ॥३४॥
बहुपापसमायोगे भाग्यहीनो तदीश्वरे ॥ लग्नेशे वलहीने वा भाग्य॰ ॥३५॥ षष्ठाष्टमांत्यनाथेन युते नाथे च तत्
तत्फलं ॥३६॥ गुरुशुक्रेक्षिते युक्ते भाग्ये तन्नायके पि वा ॥ लग्नेशे र्यपतौ धीरो भाग्यप्राप्तिः पुनर्भवेत् ॥३७॥ क्रू
रराश्यंशके भाग्यनाथे शुक्रेऽपवीक्षिते ॥ भाग्ये लग्नेशसंदृष्टे भाग्यनाशं करोति सः ॥३८॥ लग्नेशे भाग्यरा
शिस्थे भाग्येशे लग्नमाश्रिते ॥ लाभभाग्येशसंयुक्ते भाग्यवर्द्धं पुनर्भवेत् ॥३९॥ कर्मेशे भाग्यराशिस्थे भा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्येशे बलसंयुते ॥ गुरुशुक्रयुते दृष्टे जपध्यानसमाधिमान् ॥४०॥ कर्मेशयुक्तराश्यंशराशीशेषच संयुते ॥ तदीशे भाग्य
संबंधे जप० ॥४१॥ देवलोकांशकस्थे वा कर्मेशे भाग्यपे पि वा ॥ पारावतांशके सौम्यदृष्टे ब्रह्मणि निष्ठभाक् ॥४२॥ दानस्था
नाधिपे स्वोच्चे शुभग्रहनिरीक्षिते ॥ तत्स्थाने शुभसंयुक्ते दानकृत्स नरो भवेत् ॥४३॥ पारावतादिभागस्थे दानेशे गुरु
वीक्षिते ॥ लग्नेशे भृगुसंदृष्टे महादानकरो भवेत् ॥४४॥ दानाधिपेन संदृष्टे लग्नेते न्नायकेपि वा ॥ तस्मिन्केंद्रत्रिकोण
स्थे महा० ॥४५॥ सिंहासनांशके दाननाथे लग्नेशवीक्षिते ॥ कर्मेशेनापि संदृष्टे महा० ॥४६॥ भाग्ययोगे तु संप्राप्ते दानयो
गतया भवेत् ॥ राजयोगे यवाप्राप्ते नेतरेषां तया भवेत् ॥४७॥ इतरेषां संजाते दानयोगः कथं भवेत् ॥ भाग्ययोगे नरो ज्ञा
तो दानस्य तु सहायकृत् ॥४८॥ ज्ञातः पुरोहितो वात्र ब्रह्मवंशसमुद्भवः ॥ दानाध्यक्षः स जातः स्याद्भूपभेद विकल्पनात् ॥
॥४९॥ चतुर्थे दानभावेशे कर्मेशे केंद्रमाश्रिते ॥ व्ययेशे गुरुसंदृष्टे महादानकरो भवेत् ॥५०॥ भाग्येशेनापि संदृष्टे स्वोच्च
स्थे सोमनंदने ॥ लाभेशे केंद्रभावस्थे महा० ॥५१॥ लग्नेशे लाभराशिस्थे कर्मेशे बलसंयुते ॥ दानाधिपेन संदृष्टे दानग्र
हणमिष्यते ॥५२॥ सुतेशे भाग्यराशिस्थे कर्मभाग्यपसंयुते ॥ लग्नेशेनापि संदृष्टे दानप्राप्तिर्न संशयः ॥५३॥ भाग्येशे
कर्मनाथेन दृष्टे केंद्रत्रिकोणगे ॥ परमोच्चांशके वापि दान० ॥५४॥ गुरुस्थाने शसंयुक्ते नवांशाधिपतौ यदा ॥ गुरुशु
क्रेक्षिते वापि गुरुभक्तियुतो भवेत् ॥५५॥ गुरुस्थाने सौम्ययुते गुरुसंबंधसंयुते ॥ तदीशे मृदुभागस्थे गुरुभ० ॥५६॥

CC-0. In Public Domain. Digitization by eGangotri

अध्यायः सप्तमः प्रोक्त आयुर्धर्मादिवाचकः ॥ नानार्थसारसंयुक्तो वेंकटेश्वरशर्मणा ॥ ५७ ॥ ॥ इति सर्वा
र्थचिंतामणौ सप्तमोध्यायः ॥ ॥ अथ दशमभावः ॥ ॥ दशमात्स्महृन्निमाज्ञां कीर्तिं वृष्टिं प्रवासवृत्तीदीन्
॥ मानं कर्म जीवं जानुस्थानं च निर्दिशेद्बुधान् ॥ १ ॥ कर्माधिपे हीनबले सपापे कर्मादिवै कल्पगुणांतितन
ज्ञोः ॥ कर्मेशवागीशशशांकपुत्रा वीर्यान्विताश्चेत्करा भवंति ॥ २ ॥ शुभग्रहैर्दृष्टिसमन्वितास्ते वीर्यान्वि
तैर्यत्र विशेषमाहुः ॥ दुःस्थाः शशांकात्मजजीवशुक्राः पापेक्षिताः कर्मविनाशदाः स्युः ॥ ३ ॥ नाशस्थिता
स्तत्र तदीशनाथास्तद्युक्तराशेरधिपाश्च नाशं ॥ राहौ च माने यदि वा त्रिनेत्रे भागीरथीस्नानमुशंति तज्ज्ञाः
॥ ४ ॥ माने च मीने यदि वा ससौम्ये भौमान्विते वा भविता च मुक्तिः ॥ जलक्षेत्रगे पूर्णशशांकजीवे मानास्थि
ते गांगजलाहिपतः ॥ ५ ॥ नाशस्थितस्तत्र तदीशनाथास्तेद्युक्तराशेरधिपाश्च नाशं ॥ माने धने शुक्रयुते स
जीवे केंद्रे स्वगे तादृशतोयपतः ॥ ६ ॥ माने स्थिरे शुक्रयुते च केंद्रे स्वोच्चस्थिते तादृशतोयपतः ॥ शुभे स्थिरे
केंद्रगते जलर्क्षे सौम्येक्षिते ता• ॥ ७ ॥ व्यये बुधे वा यदि वा तदीशे स्वोच्चस्थिते तादृशपुण्यभाक्स्यात् ॥ चंद्रे
तृतीये जलराशियुक्ते सौम्येक्षिते तादृशपुण्यभाक्स्यात् ॥ ८ ॥ बुधे सजीवे यदि वा सभौमे प्राकारकन्यं
डपगोपुरादीन् ॥ मानस्थिते तद्गृहनाथयुक्ते करोति जीर्णोद्धरणादि मत्र ॥ ९ ॥ करोति कूपादितडागभूमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कर्मेश्वरे गोपुरभागयुक्ते॥मृद्वंशके वा शुभदृष्टियुक्ते भाग्येश्वरे वापि निरीक्षिते वा॥१०॥चंद्रात्मजे कर्म
गते तदीशे भाग्यस्थिते पापविवर्जिते स्मिन्॥सौम्येक्षिते शोभनभागयुक्ते यज्ञस्य कर्त्ता स भवेत् दानी॥
॥११॥कर्माधिपे [redacted] स्मिन्यदि सोमपुत्रे स्वोच्चस्थिते वा यदि धर्मराशौ॥विवर्जिते स्याक्षिविरा
रूपापे यज्ञ०॥१२॥कर्माधिपे स्वोच्चगते सपापे नीचांशगे नाशगते पि तस्मिन्॥विघ्नो भवेत्तस्य मखस्य नूनं क्रू
रादिषष्ट्यंशगते पि चैवं॥१३॥तुंगस्थिते सोमसुते तदीशे स्वोच्चान्विते सोमसुतेन दृष्टे॥शुभेक्षिते वा सवुधे
सुराशौ यज्ञ०॥१४॥आज्ञास्थानाधिपे सौम्ये शुभदृष्टियुते पि वा॥शोभनांशगते वापि ज्ञातस्थानाधिपो भवे
त्॥१५॥आज्ञास्थानं गते सूर्ये भूमिपुत्रेण वा युते॥केंद्रान्विते तदीशे पि क्रूरमाज्ञां करोति सः॥१६॥आ
ज्ञाधिपे मंदयुते रंध्रनाथेन संयुते॥क्रूरांशे केंद्रराशौ वा क्रूरमा०॥१७॥राहुमांदियुते माने रंध्रे राहौ ध्वजे
पि वा॥नीचस्थधर्मभावेशे क्रूरा०॥१८॥मानाधिपे केंद्रयुते शुभयुक्ते क्षिते पि वा॥क्रूरषष्ट्यंशसंयुक्ते सौम्या
माज्ञां करोति सः॥१९॥शशांके कर्किसंयुक्ते गुरुशुक्रनिरीक्षिते॥पारावतादिभागस्थे स कीर्त्तिसहितो
भवेत्॥२०॥तदीशे शुभसंयुक्ते शुभमध्यगते पि वा॥शुभग्रहाणामंशे वा सत्की०॥२१॥कीर्त्तिस्थानाधिपे
सौम्ये स्वोच्चमित्रस्ववर्गगे॥सौम्यषष्ट्यंशके वापि सत्की०॥२२॥तदीशे देवलोकस्थे सिंहांशे शुभनायके॥

=कीर्त्ति३

वलपूर्णेविलग्नेशेसत्कीर्त्ती॥२३॥पापग्रहाणांसंवंधेमानेनाथेवलह्रये॥क्रूरषष्ठ्यंशसंयुक्तेस्वसत्कीर्त्ति
युतोभवेत्॥२४॥अपकीर्त्तियुतोजातःकर्मस्थेस्वरवौशनौ॥पापांशकेपापदृष्टेपापमध्यगतेपिवा॥२५॥
शुभग्रहाणांसंवंधेमानेतन्नायकेपिवा॥स्वोच्चेवास्वगृहेवापिजातोमानीदृढव्रतः॥२६॥इंगितज्ञोभिमा
नीस्यान्मानेजीवेयवाशुभे॥तदीशेशुभसंवंधेशुभमध्यगतेपिवा॥२७॥पापेमानेपापदृष्टेतदीशेनीचरा
शिगे॥पापषष्ठ्यंशकेवापिमानहीनोभवेन्नरः॥२८॥मानाधिपेचरांशस्थेसंचारसहितोभवेत्॥स्थिरांशे
स्थैर्यमुद्दिष्टंमृगयाचाद्विदेहभे॥२९॥षष्ठेशेकर्मराशिस्थेकर्मेशेमंदसंयुते॥केंद्रत्रिकोणगेवापिदासी
दासान्विनिर्दिशेत्॥३०॥कर्माधिपस्थांशपतौकानिसंवंधसंयुते॥षष्ठाधिपस्यसंवंधेवहुदासान्विनिर्दि
शेत्॥३१॥शुभग्रहेणसंदृष्टेकर्मराशौतदीश्वरे॥भानुपुत्रेणसंयुक्तेवहुदा॰॥३२॥कर्मनाथेनवाभुक्तिश्रे
पत्नीन्विनिर्दिशेत्॥तत्रपापसमायोगेजानुदेशेव्रणस्यमादिशेत्॥३३॥ ॥अथसन्यासयोगः॥ ॥ग्रहैश्चतुर्भिः
सहितेतदीशेत्रिकोणगैःकेंद्रगतैस्तुयुक्तैः॥चतुर्ग्रहैःकर्मगतैःप्रव्रज्यामाप्नोतिजातःकथितोमुनीन्द्रैः॥३४॥
नवीक्षितश्चेदितरग्रहैस्तुलग्नाधिपःपश्यतिभानुपुत्रं॥लग्नाधिपंवायदिभानुपुत्रःसन्यासयोगोहिवलेन
हीनः॥३५॥शनेर्द्रेकाणेकुमुदात्मवंधौमंदेक्षितेतादृशयोगमाहुः॥मंदांशकेभूमिसुतांशकेवामंदेक्षिते

चंद्रस्तु तेतथैव॥३६॥ सन्यासयोगाधिपतौ सराहौ क्रूरांशके वा गुलिकेन युक्ते॥ सन्यासवैकल्पमुदाहरं
ति भंगो भवेत्तस्य शुभैर्विहीने॥३७॥ ॥अथ लाभभावफलं॥ ॥आयेनार्थावाप्तिं पदावपि वाक्कर्णे च॥ज्ञा
तावपि चुककुज्ञान्ज्येष्ठान्भ्रातृनाभ्यान्॥१॥ लाभेश्वरे केंद्रगते त्रिकोणे वा समन्विते॥ लाभे वा
पापसंयुक्ते धनलाभमुदीरयेत्॥२॥ धनाधिपे लाभगते लाभेशे धनमागते॥ तावुभौ केंद्रगौ वापि ध
॥३॥ शुभमध्यगते लाभे तदीशे वा तथाविधे॥ पारावतादिभागस्थे धं०॥४॥ लाभेशयुक्तराशीशे शुभग्र
हनिरीक्षिते॥ शुभग्रहाणां मध्यस्थे धं०॥५॥ लाभनाथसमायुक्ते नवांशाधिपतौ शुभे॥ वित्ताधिपेन सं
दृष्टे धं०॥६॥ लाभाधिपसमायुक्ते त्र्यंशभागपतौ शुभे॥ कर्मेश्वरेण संदृष्टे धं०॥७॥ पापग्रहाणां संबंधे
धनहानिं विनिर्दिशेत्॥ लाभेश्वरोक्तदिग्भागाद्धनप्राप्तिं विनिर्दिशेत्॥८॥ लाभराशयुक्तदिग्भागात्सर्वोत्त
मबलादपि॥ बलाबलवशेनैव धनाप्तिं निर्दिशेद्बुधः॥९॥ लाभेशे पापसंबंधे प्रोक्ता तद्धानिरन्यतु॥ लाभे पापे
तऊहे वा नार्थहानिं विनिर्दिशेत्॥१०॥ कर्णस्थानेश्वरे सौम्ये शुभदृष्टिसमन्विते॥ कर्णाधिपे बलवति कर्णा
योर्भूषणं भवेत्॥११॥ पापग्रहाणां संबंधे तन्नाशो न भविष्यति॥ लाभेशात्सोदरेशाद्वा कर्णसौख्यं विनि
र्दिशेत्॥१२॥ तदीशे शुभसंबंधे कर्णसौख्यं विनिर्दिशेत्॥ तदीशे पापसंबंधे कर्णरोगं विनिर्दिशेत्॥१३॥

CC-0. In Public Domain. Digitization by eGangotri

कुयाच्छ्रेष्ठं स्वलाभेन शुभपापवशादपि॥ शुभग्रहाणां सर्वं यो दीर्घमायुर्विनिर्दिशेत्॥१४॥ पापान्विते पापदृष्टे तद्वा
निं प्रवदंति हि॥ लाभराशेश्चदिग्भागाद्धनलाभं समुदीरयेत्॥१५॥ तद्राशिनाथदिग्भागाद्द्रव्यप्राप्तिं समुदीरयेत्॥ ला
भराशिवशादेवं चिंतयेन्मतिमान्नरः॥१६॥ ॥व्ययभावः॥ ॥व्ययभवनाद्धापमखिलं पतनं नरकवैकल्यं॥
वामाक्षिचरणशुंगशायनस्थानं च निर्दिशेत्प्राज्ञः॥१॥ व्यये पापसमायुक्ते तदीशे पापखेचरे॥ पापग्रहेक्षते संदृ
ष्टे पापमूलाद्धनव्ययः॥२॥ मंदमांद्यगुसंयुक्ते व्यये वा तत्फलाधिपे॥ क्रूरांशकसमायुक्ते पाप०॥३॥ व्ययाधि
पसमायुक्ते नवभागपतौ शुभे॥ शुभांशे शुभमध्यस्थे धर्ममूलाद्धनव्ययः॥४॥ गुरुशुक्रौ व्यये वापि बुधचंद्रौ तु
मे स्थितौ॥ पारावतादिभागस्थौ धर्म०॥५॥ व्ययाधिपे त्रिकोणस्थे केंद्रे पापनिरीक्षिते॥ क्रूरषष्ट्यंशके वापि पा
पमूलाद्धनव्ययः॥६॥ पापेन कर्मनाथेन व्ययेशे दृष्टिसंयुते॥ शत्रुनीचारिभागस्थे पाप०॥७॥ शुभेन कर्मना
थेन दृष्टियुक्ते व्यये स्थिते॥ स्वोच्च मित्र स्ववर्गस्थे धर्ममूलाद्धनव्ययः॥८॥ व्ययेशे बलहीने वा शत्रुनाथयुतेक्षि
ते॥ गुलिकादिसमायुक्ते शत्रुमूलाद्धनव्ययः॥९॥ व्ययेशे दारनाथेन बलहीनेन तेन तु॥ दृष्टे युते वा क्रूरांशे स्त्री
हेतोर्धननाशनं॥१०॥ लाहृशे व्ययनाथेस्मिन् दृष्टे युक्ते यथा भवेत्॥ तथाविधे न भौमेन भ्रातृमूलाद्धनव्ययः॥११॥ राम·
पुत्रभावेश्वरेणापि बलहीनेन संयुते॥ दृष्टे व्ययेशे क्रूरांशे पुत्रमूलाद्धनव्ययः॥१२॥ पितृनाथेश्वरेणापि कारके ४४

54

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गापि वा युते ॥ व्ययेशे दृष्टिसंबंधे पितृमरणाद्धनव्ययः ॥१३॥ एवं मातृपरवे देन युते दृष्टे व्ययाधिपे ॥ क्रूराधिपे मां
दियोगे मातृमरणाद्धनव्ययः ॥१४॥ वलहीने च रिःफे शे क्रूरराश्यंशके पि वा ॥ नीचांशके नीचराशौ देहवैकल्य
मादिशेत् ॥१५॥ वक्रपापसमायोगे व्ययेतद्भवनाधिपे ॥ मंदमांद्यगुसंयुक्ते देहनाशादिमादिशेत् ॥१६॥ व्य
येशे पापराश्यंशे क्रूरांशे क्रूरसंयुते ॥ पापग्रहेण संदृष्टे नरके निपतिष्यति ॥१७॥ नरके पतनं ब्रूयाद्राहु
मांदियुते व्यये ॥ षष्ठाधिपेन संदृष्टे रंध्रनाथेन वा युते ॥१८॥ व्ययेशयुक्तषष्ठंशे क्रूरराश्यादिसंज्ञके ॥ क्रू
रग्रहेण संदृष्टे नरके पतनं भवेत् ॥१९॥ चंद्रार्कयोर्यो वलवांस्तद्युक्तांशपनायकः ॥ गुरुर्वा चंद्रशुक्रौ वा स्व
र्भौमौ सौरस्सूर्यजौ ॥२०॥ देविकं पितृलोकं तु तिर्यक्नरकमेव च ॥ तेषां तत्क्रमेणैव त्रिलोके श्रेष्ठमु
च्यते ॥२१॥ उच्चस्थे श्रेष्ठलोकः स्यान्नीचस्थे नीचमादिशेत् ॥ समस्थिते समप्राप्तिरित्याहुश्च महर्षयः
॥२२॥ शुभे स्वोच्चे व्यये वापि सौम्यखेचरवीक्षिते ॥ देवलोकादिभागस्थे स्वर्गप्राप्तिर्भविष्यति ॥२३॥ देवे
शे कर्मराशिस्थे व्ययराशिगते पि वा ॥ शुभग्रहेण संदृष्टे स्वर्गप्राप्तिर्भविष्यति ॥२४॥ नेत्रेशे शुभसंयुते
शोभनांशसमन्विते ॥ शुभस्य योगसंबंधे तन्नेत्रस्य शुभं वदेत् ॥२५॥ अन्यथा चेद्वदेन्नाशं पापयोगे पि
तत्तथा ॥ तत्र पंचादिकं सर्वं धनभावे प्रदर्शितं ॥२६॥ गुरुशुक्रबुधास्तत्र वाहनं निर्दिशेद्बुधः ॥ वाहनो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स.चिं. ४५

॥२७॥

क्रमादिकं सर्वं तद्दिशापि विचिंतयेत् ॥ शुभग्रहाणां संबंधे व्यये तद्भावनायके ॥ डोलांदुमं चंप्रवदेच्छयनादि
सुखं तथा ॥ २८ ॥ व्ययेशे स्वोच्चराशिस्थे शुभवर्गसमन्विते ॥ शुभग्रहेक्षसंदृष्टे पर्यंकशयनं वदेत् ॥ २९ ॥
विचित्रमंचशयनं व्ययेशे परमोच्चगे ॥ भाग्यनाथेन वा दृष्टे मणिरत्नविभूषितं ॥ ३० ॥ पापग्रहाणां संबंधे
व्यये तद्भावनायके ॥ क्रूरांशे क्रूरसंदृष्टे शयनादिसुखं नहि ॥ ३१ ॥ व्ययेशः पापखेटोपि स्वोच्चमित्रस्ववर्ग
गः ॥ तस्यनायोपि तत्स्थाने शयनादिसुखं वदेत् ॥ ३२ ॥ नीचे व्यये बालग्रेशे शत्रुनाथेन वीक्षिते ॥ मंदमां
द्युसंयुक्ते शयनादिसुखं नहि ॥ ३३ ॥ पंचमे भृगुसंयुक्ते चंद्रेणसहिते यवा ॥ ताभ्यां दृष्टे यवा पुत्रे स्त्रीदेवो
पास्तिमादिशेत् ॥ ३४ ॥ पंचमे पुंग्रहयुते पुंदेवोपास्तिमादिशेत् ॥ पंचमे भानुसंबंधे सूर्यशंकरभाजिनं ॥
॥ ३५ ॥ चंद्रे तथाविधे जाते यक्षिणीदेवता भवेत् ॥ स्कंदो वा भैरवो वापि भौमसंबंधवीक्षिते ॥ ३६ ॥ उपास्या
शारदा सौम्ये विष्णुर्वा सात्विको गुरौ ॥ चामुंडा संप्रमे शुक्रसंबंधे तु विनिर्दिशेत् ॥ ३७ ॥ शनौ प्रेताशनी प्रोक्ता
श्मशाननिलया भवेत् ॥ राहुकेतुयुते तत्र परपीडनदेवताः ॥ ३८ ॥ उच्चक्षेत्रेषु खेटेषु स्वोच्चे मित्रांशकेपि वा ॥
तद्देवभजनं स्वार्थं परार्थं तन्यथा भवेत् ॥ ३९ ॥ सौम्योक्षितेषु सर्वेषु शुभदृग्वादिगतेषु च ॥ तद्देवसौम्यता वा
च्याक्रूरेषु क्रूरता भवेत् ॥ ४० ॥ द्वित्र्यादिग्रहयोगेन तद्देवभजनं भवेत् ॥ लग्नाधिपस्य मंत्रेशे मित्रे तन्मंत्रमा

राम. ४५

CC-0. In Public Domain. Digitization by eGangotri

दिशेत् ॥ ४१ ॥ शत्रुत्वे शत्रुभूतः स्यात्समत्वे सममता भवेत् ॥ लग्नाद्द्वादशराशीनां फलं प्रोक्तं मयाधुना ॥ ४२ ॥
संगृह्य सारमखिलमध्यायस्त्वष्टमो भवेत् ॥ ४३ ॥ ॥ इति सर्वार्थचिंतामणौ अष्टमोध्यायः ॥ ॥ नत्वा तं मनसा
मतं गवदनं श्रीवेंकटेशः सतां श्रीमान्व्ययभृत्सुरात्मजवरो होराविदां प्रीतये ॥ ज्योतिःशास्त्रमहार्णवप्रतरणोत्सं
गृह्य शास्त्रातराद्वहून् जातकशास्त्रमार्गफलदं योगावलीवाख्यं ब्रुवे ॥ १ ॥ ऊहापोहविशारदः पटुमतिः श्रीतुंडदेशो
द्भवः श्रीमत्काश्यपवंशजो गुरुकृपालब्धप्रसादो भुवि ॥ त्रिस्कंधार्थविदां विनायकपुरे जातः प्रशिष्यः कविर्जंव
न्नायपदारविंदरसिकः स्कंधत्रयीममिमित् ॥ २ ॥ द्वितीये द्वादशे पार्श्वद्वये खेचरसंयुते ॥ एतद्योगत्रयाभावे केम
द्रुमः इहोच्यते ॥ ३ ॥ नीचांशकगते चंद्रे भाग्येशेनानवीक्षिते ॥ पापेन केन चिद्युक्ते योगः केमद्रुमो भवेत् ॥ ४ ॥ कृष्णप
क्षे निशायां तु चंद्रे बलविवर्जिते ॥ राहुणेते पापिनावा योगः० ॥ ५ ॥ नीचराश्यंशकस्थेन खेचरेणासमायुते ॥ कृष्णप
क्षे निशायां तु यो० ॥ ६ ॥ चंद्राद्दष्टमगे पापेवीक्षिते क्रूरखेचरैः ॥ कृष्ण० ॥ ७ ॥ दिवाकरकरैर्लुप्ते चंद्रे पापांशसंयुते ॥
नीचस्थितेन खेटेन दृष्टे के० ॥ ८ ॥ राहुणादिपीडिते चंद्रे परिवेषसमन्विते ॥ क्रूरैर्निरीक्ष्यमाणे तु योगः केमद्रुमो भ
वेत् ॥ ९ ॥ पापैर्युक्ते चतुःकेंद्रे चंद्राद्वाथ तदंशतः ॥ परिदृष्टे यवा चंद्रे यो० ॥ १० ॥ पराजितेन सौम्येन दृष्टो रात्रिक
रो यदि ॥ राहुणा पीडिते वापि यो० ॥ ११ ॥ शत्रुराश्यंशके चंद्रे नीचशत्रुनिरीक्षिते ॥ नीचासन्नेपि वा चंद्रे यो० ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

केंद्रत्रिकोणगश्चंद्रो नीचराश्यंशकस्थितः॥ षष्ठे ऽष्टमे व्यये जीवे निशानाथात्तथा भवेत्॥१३॥ उच्चस्थोपि
निशानाथो नीचखेचरसंयुतः॥ तदंशकगतो वापि यो०॥१४॥ चरराश्यंशके चंद्रे तस्मिन्पापांशके स्थि
ते॥ शत्रुणा वीक्षिते चंद्रे यो०॥१५॥ केंद्रे शीतकरे युक्ते त्वथवा शुभसंयुते॥ नैव केमद्रुमो योगो गुरुद
ष्टे तथाविधः॥१६॥ अत्युच्चगुरुणा दृष्टे चंद्रे शुभसमन्विते॥ पूर्वपक्षे द्वितीयत्र्यंशे नैव केमद्रु
मो भवेत्॥१७॥ शुभमध्यगतश्चंद्रस्त्वेकराशिगतो यदि॥ वेचसां स्वामिना दृष्टे नैव०॥१८॥ स्वाधिमित्रां
शके चंद्रे दृष्टे देवेंद्रमंत्रिणा॥ उच्चासन्ने गते चंद्रे नैव०॥१९॥ योगे केमद्रुमे प्राप्ते यस्मिन्कस्मिंश्च जातके॥
राजयोगा विनश्यंति हरिं दृष्ट्वा यथा द्विपाः॥२०॥ गुणवान्व्याधिरहितः प्रभुः ख्यातिसमन्वितः॥ महा
कीर्त्तिर्महाधीरः सुकुमारो महादृढः॥२१॥ विजयासक्तचित्तश्च परोपहितकृद्भवेत्॥ सुनफायां ध
नैर्युक्तस्तेजस्वी मतिमान्भवेत्॥२२॥ स्वबलार्जितधनो राजावातसमो विद्या॥ बुद्धिकीर्त्तिसमायु
क्तऊहापोहपटुर्भवेत्॥२३॥ योगे दुरुधुरे जातो भोगी स्याद्राजवल्लभः॥ उत्पन्नविभवो धीमान्सात्विकः प्रियद
र्शनः॥२४॥ मेधावी बंधुशीलश्च सुखवाहनवित्तयुक्॥ बहुपुत्रार्थसंयुक्तो राजभाग्यसमन्वितः॥२५॥ स्वोच्चे पू
र्णफलं ब्रूयात्स्वत्रिकोणे तथाविधं॥ मित्रक्षेत्रे तु पादोनं समक्षेत्रे तदर्द्धकं॥२६॥ पादं फलं शत्रुगेहे स्मृतं

CC-0. In Public Domain. Digitization by eGangotri

नीचाति शत्रुभे ॥ ॥इति केमद्रुमफलं ॥ ॥मलिनो दुःखितो निःस्वः प्रेष्यः स्यात्पारदारिकः ॥२७॥ खलश्च
राजवंश्योपि शिश्नोदरपरायणः ॥ अर्के केंद्रेषु च सर्वेषु निशानाथो यदि स्थितः ॥२८॥ योगस्तत्र्यैधमाख्यः
स्यात्समःपणफरे स्थितः ॥ आपोक्लिमे वरिष्ठः स्याद्विनयार्थविशारदः ॥२९॥ स्वाधिमित्रांशगश्चंद्रो दि
वाऽतीय यदा भवेत् ॥ वागीश्वरेण संदृष्टः हेनवान्यादिहाद्धिकृत् ॥३०॥ रात्रौ तथाविधश्चंद्रो दृष्टो दानवमंत्रि
णा ॥ वित्तवान्सुखभुग्भोगी कामी विषयपारगः ॥३१॥ किं कुर्वंति ग्रहाः सर्वे चंद्रकेंद्रे बृहस्पतौ ॥ मत्तमातंग
यूथांस्त्र हरत्येकोपि केसरी ॥३२॥ चंद्राधिष्ठितराश्यंशात्केंद्रे गुर्वर्कसोमजाः ॥ तिष्ठंति चेद्यदा जन्म यो
गोयं केसरी भवेत् ॥३३॥ गुरुशुक्रौ विदः सर्वे पश्यंति राशिनं यदा ॥ अनस्तगास्तनीचास्ते यो० ॥३४॥ चं
द्रे सौम्यार्थशुक्राणामन्योन्यं केंद्रसंभवे ॥ तेषामेकतमे स्वोच्चे यो० ॥३५॥ सौम्यदेवेज्यशुक्राणां राश्यंशे चंद्र
संयुते ॥ तेषामेकेन संदृष्टे यो० ॥३६॥ उच्चकेंद्रगतश्चंद्रो गुरुशुक्रनिरीक्षितः ॥ पूर्वपक्षे यदा जन्म यो० ॥३७॥
चापमीनांशगे चंद्रे गुरुशुक्रनिरीक्षिते ॥ पूर्व० ॥३८॥ केसरियोगजातो भूपालो वंधुमान्गुणान्वितश्च ॥ व
कुतुरणमीशो नाथो यामंत्रवित्समाचारः ॥३९॥ यस्य जन्मसमये राशिलग्नात्सङ्क्रहो भवति कर्मणि
स्थितः ॥ तस्य कीर्तिरमला भुवि तिष्ठेद्यावदंतमविनाशितसंपत् ॥४०॥ लग्नाद्वा चंद्रलग्नाद्वा दशमेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भसंयुते॥ योगोयममलानामकीर्त्तिराचंद्रतारका॥४१॥ लग्नांशाद्दशमेसौम्येचंद्रांशाद्वाविशेषतः॥ अ-
मलाकीर्त्तियोगोयंजयशीलोभवेद्भुवि॥४२॥ चंद्राधिष्ठितराश्यंशाद्वलग्नाद्वलग्नांशकादपि॥ दशमेदृष्टि
संपन्नेगुरुशुक्रविदांयदा॥४३॥ अमलाकीर्त्तियोगःस्यात्कीर्त्तिविक्रमनायकः॥ दशमाद्दशमेसौम्ये
चंद्राद्वलग्नाद्विशेषतः॥४४॥ अथवाशुभसंदृष्टे अमलायोगईरितः॥ परन्तुएवंदितपापैर्भूपालोह्यायु
ष्मान्महाभोगी॥ अमलायोगेजातोभवेत्सुरभक्तोमहोत्साही॥४५॥ इतियोगार्णवे श्रीकंठवेंकटेश्वरशा
र्मेण॥ त्रिस्कंधार्थविदांसम्यक्प्रथमाध्यायवर्णितं॥४६॥ ॥इतियोगार्णवे प्रथमोध्यायः॥ ॥सूर्या
द्वितीयंवेशिःस्याद्द्वादशेवोशिसंज्ञितं॥ पुरतःपृष्ठतोर्कस्यग्रहयोगेत्रजन्मनि॥१॥ योगःस्यादुभयोना
मचरीयरसमन्वितः॥ जातोनरःस्याच्छुभवेशियोगेविद्वान्विवेकीधनिकःप्रदाता॥ वाचाटकोवाप्य
धुरोथपालोविमत्सरोवीतभयोमहात्मा॥२॥ दीर्घांगःकृशनखीमहान्दृढमतिर्वाकुशलतापोन्नतिःश्लक्ष्ण
ःसत्पुरतःक्रियासुनिपुणोवेशांतविद्धार्मिकः॥ शीतालुर्मनुजोटनोपरहितोनानाक्रियादक्षकोना
नाकर्मविशारदःपरमतिर्वोशौशुभस्यास्पदं॥३॥ यज्वाभवेत्सुरभक्तिमान्पटुमतिर्विद्याविनोदप्रियो
भूपालोविजितेंद्रियोवहुधनःस्त्रीसंचयस्याधिपः॥ वाग्मीकोडरादानकृत्क्षितिभुजांनायोथवाशास्त्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कष्टानाष्टपरेंगितज्ञवचनो वद्धूर्यदेशाधिपः॥४॥ अन्यायार्जितवित्तवान्वधरुचिर्हीनप्रियो दुर्जनो मा
यावी परनिंदकः कलिरुचिर्दुष्टात्मशास्त्राधिकः॥ दीर्घांगो विकृताकृतिश्चलमतिर्विद्यार्थभाग्योज्झयो
लोके स्या [redacted] दपकीर्त्तिर्दुःखितमना वेशो कृयी चाशुभे॥५॥ वोशोजातो यो नरो भाग्यहीनो विद्याही
नो वंधुभिस्त्यक्तकार्यः॥ मूर्खः कामी दंतके शे विकारी दुर्दीरः स्याद्द्वेषितः कुत्सितश्च॥६॥ व्याध्यर्दितश्चैव लो
दुःखितः स्यात् क्लीवः शूरो वंधुभिर्दूष्यमाणः॥ भिक्षाशी स्यात्कामचारोथ कोपी किंविद्भाग्यो विप्रलंभो
पवास्यात्॥७॥ लग्नाद्ये शुभखगे शुभायोग ईरितः॥ उभयस्थैर्ग्रहैः सौम्यैर्योगः कर्त्तरिकः शुभः॥८॥
पापग्रहयुतेरिष्फे त्वशुभायोग ईरितः॥ लग्नपार्श्वगतैः पापैः पापकर्त्तरिसंज्ञकः॥९॥ शुभायोगे जा
तो धनवान्वनिताहृत्तो निश्चयशीलः॥ नित्योद्युक्तश्चपलो भोगालुस्समञ्जसो धनाध्यक्षः॥१०॥ अशुभा
योगे जातो मायावचनः शठोतिसंतापी॥ क्षीणायुरल्पबुद्धिश्चंचलभावः कविकलाहीनः॥११॥ कर्त्तरियो
गे शुभे देवलवान्स्वकुलाधिको महोत्साही॥ कर्त्तरियोगे पापे परदेशरतो विषाहितास्त्र धनः॥१२॥
षट्सप्ताष्टमसंस्थैर्लग्नात्सौम्यैर्न पापदृष्टियुतैः॥ लग्नाधियोग एवं पापैः शुभविवर्जितैः
स्यात्॥१३॥ लग्नाधियोगे बहुशास्त्रवेत्ता विनीतिविद्याधिवलाधिकारी॥ मुख्यश्च निष्कापटिको नरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स.वि. ४८ सौम्ये लोके प्रसिद्धो बलवान्कविः स्यात्॥१४॥ नीचास्तलीनखेटैः शोकं यत स्वभावतः फलंति॥ पापक
ते लधियोगे पापी पुण्यो भवेच्छुभैः खेटैः॥१५॥ सौम्यैः स्मरारिरन्ध्रखने ष्वधियोगइं दोस्तस्मिंश्चमूपसचि
वक्षितिपालजन्म॥ संपन्नसौख्यविभवा हतशात्रवश्च दीर्घायुषो विगतरोगभयाश्च जाताः॥१६॥ सौ
म्यैर्युते चेल्केंद्रे गुरुद्वषष्ठे यवा न तौ॥ यस्मिन्कस्मिन्भे -- योगः पर्वतसंज्ञकः॥१७॥ विलग्ननाथस्थितराशिना
यः केंद्रत्रिकोणोपगतो यदि स्यात्॥ मूलत्रिकोणे यदि वा स्वतुंगे योगो भवेत्पर्वतनाम पूर्वः॥१८॥ लग्नात्प
नाथानुपरस्परं वा केंद्रस्थितौ मित्रनिरीक्षितौ चेत्॥ धन व्यये यौ यदि वा स्वतुंगे यो०॥१९॥ पर्वतयोगे जातो
भूपालो धर्मवान्विनीतश्च॥ ग्रामपुरनगरकर्त्ता लोके सुतवान्युगांतकीर्त्तिश्च॥२०॥ श्रीमान्पर्वतसंभवो
विजयप्रकु----

राम० ४८

58

CC-0. In Public Domain. Digitization by eGangotri

शुभैः केंद्रगतैः सर्वैर्मालायोगः स उच्यते ॥ क्रूरैः केंद्रगतैः सर्वैः सर्पयोग इति स्मृतः ॥५॥ मालायोगे समु
त्पन्नो ज्ञानार्थसुखवान्भवेत् ॥ परक्लेशेश्च संतुष्टो यस्यायुर्भुजगोद्भवः ॥६॥ लग्नकेंद्रगतैः सर्वैर्योगो
मंगलकारकः ॥ मध्यकेंद्रस्थितैः सर्वैर्मत्स्ययोग उदाहृतः ॥७॥ आपोक्लिमगतैः सर्वैः क्लीवयोग उदा
हृतः ॥ मंगलाख्ये नरो जातो नित्यं कल्याणकारकः ॥८॥ वाङ्मी प्रजावान्धीरश्च दीर्घमायुश्च विंदति ॥ म
त्स्ये जातः प्रवासी च वंधुस्नेहभयावहः ॥९॥ अस्थिरार्थोल्पपुत्रश्च दुष्टमार्गे धृमानसः ॥ ॥ क्लीवे दुःखी
प्रवासी च नीचः स्त्रीकलहप्रियः ॥ अल्पायुरल्पबुद्धिश्च प्रायो देशांतरे मृतिः ॥१०॥ लग्नादिषड्भवनगै
ग्रहैः पद्म उच्यते ॥ तत्रोद्भूतो धनाध्यक्षः सर्वेभ्यः सारसंग्रही ॥११॥ उदयात्मजपर्वं बुधस्थैर्वा राहोर्यो
ग उच्यते ॥ क्षेत्रवित्तं सुखं ज्ञानं लभते नात्र संशयः ॥१२॥ द्वित्रिवंधुगतैः सर्वैर्ग्रहैः कंटक उच्यते ॥ तत्र जातो धनी विद्वान्
मध्यमायुर्न संततिः ॥१३॥ लग्नाद्व्ययस्थैर्हलयोगमाहुः शृंगाटकं लग्ननवात्मजस्थैः ॥ लग्नास्तगैस्तत्र शकटं वदंति वंधा
स्परस्थैर्विहगाख्ययोगं ॥१४॥ हलोद्भवः क्रोधपरोतिनिस्वो हीनांगजीवी च कृषीवलश्च ॥ शृंगाटके मारुतकोपदेही
महानुभावोतिधनो विज्ञातः ॥१५॥ शकटस्तु रिवर्त्तते निशं शकटजः सकलवंधुविवर्जितः ॥ हीनदारसुतपुत्रसंश्रयः
पापमूर्त्तिरलसो विकलाक्षः ॥१६॥ विहगोदितमानवो सुखी विविधार्थग्रहणोद्युतत्परः ॥ अनिवारितविक्रमो रणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बहुवासः प्रियसंश्रयो यतः ॥१७॥ धर्मायोद्यवंधुभेवुसहितैः धांत्वः समस्तैर्ग्रहैर्दलं व्याघ्रैर्विषमर्क्षगैश्च सकलैश्च
केंमुनींद्रा जगुः ॥ धीमान्धांत्वसमुद्भवो गुणनिधिर्वीर्यान्वितो ज्ञानवान्चक्रे सर्वगुणालयो नरपतिः साम्राज्यमा
सेवते ॥१८॥ एकादिराशिसंयुक्तैः संख्यायोगा यथाक्रमं ॥ गोलो युगः शूलसंज्ञः केदारः पाशसंज्ञितः ॥१९॥ दामि
नी वल्लकी चेति योगाः सप्त पृथक्पृथक् ॥ एतेषामुक्तयोगानां फलं वक्ष्ये पृथक्पृथक् ॥२०॥ दरिद्रो व्याधितः को
पी दुःखी निःस्वः कृशी पुनः ॥ हीनो गुरुत्ववुद्धिश्च गोलजः पुरुषो भवेत् ॥२१॥ पाखंडको धनैर्हीनो न्याय स्त्री पुत्र
वर्जितः ॥ मिष्टाशी पापनिरतो युगेजातो हि मानवः ॥२२॥ शूले कोपपरो नित्यं तीक्ष्णः स्याद्धनवर्जितः ॥ हिंस्रः
शास्त्रयुतः शूरः समरे लब्धहासकः ॥२३॥ केदारे कृषिकृद्भोगी वंधूनामुपकारकः ॥ सुखी धनी सत्यवा
दी चलचित्तः प्रतापवान् ॥२४॥ पाशे धनार्जनपरो गुणी वाचाटको भवेत् ॥ वहुपुत्रार्थसंपन्नो लोके प्रख्या
तिसंयुतः ॥२५॥ दामिन्यामुपकारी च सर्वथा स्वार्थवित्सुखी ॥ प्रभुत्वगुणसंपन्नो धार्मिकः प्रियदर्श
नः ॥२६॥ वीणायोगे जातो विद्वान्विविधार्थभोगसंपन्नः ॥ स्वकुलश्रेष्ठो मतिमान्निपुणो गीतप्रियो
महोत्साही ॥२७॥ ॥ इति तृतीयः ॥ ॥ वर्गोत्तमगते चंद्रे लग्ने वा चतुरादिभिः ॥ ग्रहैर्निरीक्षिते तस्मिञ्जा
तो नरपतिर्भवेत् ॥१॥ अधिन्यो लग्नगश्चंद्रः सर्वग्रहनिरीक्षितः ॥ करोति पृथिवीपालं निर्जिताराति

CC-0. In Public Domain. Digitization by eGangotri

मेउलें॥२॥शत्रुनीचग्रहं त्यक्त्वा कुटुंबस्थः स भार्गवः॥लग्नेश्वरो वलीयस्य स नरः पृथिवीपतिः॥३॥नीचां
शकान्परित्यज्य त्र्यादिकेन्द्रोच्च संस्थिताः॥तेषामेको विलग्नस्थः कुरुते पृथिवीपतिं॥४॥स चंद्रभौमे ल
ग्नस्थे धर्मकर्मगते यथा॥गुरौ वलान्विते सूर्ये जातो नरपतिर्भवेत्॥५॥द्वित्रौ कः स्वामिनो मंत्री भवेप
स्पन्तुधं यदि॥शिरस्त्राणासनं तस्य धारयंति नृपाः सदा॥६॥अतिमित्रांशगश्चंद्रो दृष्टो दानवमं त्रि
णा॥निशायां कुरुते राज्यं नान्यग्रहनिरीक्षितः॥७॥स्वांशेधिमित्रभागे वा दृष्टो देवेंद्रमंत्रिणा॥तारी
महीपतिं कुर्याद्दिवसे वस्तुसंश्रयः॥८॥अर्केंदौ सुखगो यस्य मंदे दशमभस्थिते॥रक्तोदये यदा जा
तः पृथिवीशो न संशयः॥९॥सिंहस्थे सूर्योदये यस्त शुक्रांशक विवर्जिते॥कन्यागते बुधे जातो नीचोपि पृ
थिवीपतिः॥१०॥मीने मीनांशके लग्ने शुक्रे जातो नृपो भवेत्॥कुलीरे चंद्रजीवाढ्ये तस्मिंल्लग्ने नृपो भवे
त्॥११॥लग्नात्मजास्पदस्थो वा कुजमंदौ यदा तदा॥संपूर्णचंद्रभाग्यस्थे जातो राजा भविष्यति॥१२॥अ
तिमित्रगृहे केंद्रे जन्माधिपति विलग्नपतियुक्तः॥पश्यति वलपरिपूर्णो लग्नं स्यात्पुष्कलो योगः॥१३॥पु
ष्कलयोगे ये जाता जायंते भूमिपालका नित्यं॥क्षितिपतिवंशे जाता मुकुटछत्रान्विता भूपाः॥१४॥जन्मा
धिपतिः केंद्रे वलपरिपूर्णः करोति भूपेशं॥तन्मित्रयुक्तदृष्टो नीचकुलस्योपि राजा स्यात्॥१५॥लग्नाधि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स.चिं० ५० पतिः स्वोच्चे परशत्रुमङ्गलांछनं नृपं कुरुते ॥ बहुगजतुरगबलौघैः कंपितविपक्षमाहवे विभवं ॥१६॥ लग्नं
विहाय केंद्रे सुकलापरिपूरिते निशानाथे ॥ भार्गवगुरुसंदृष्टे जातो राजा भवेन्नियतं ॥१७॥ विदधाति सा
र्वभौमं लग्नाधिपतिः स्वतुंगगः केंद्रे ॥ सुत्कारिणी च भागं नान्यग्रहसंयुतो भवेन्नित्यं ॥१८॥ चापाजसिं
हराशिषु लग्नस्थो भूमिजो महीपालं ॥ जनमति मित्रैर्दृष्टः स्वबाहुबलनिर्जितारिपक्षं च ॥१९॥ अश्विन्यनु
राधासु स्थितः श्रविष्ठासु पार्थिवं भौमः ॥ कुरुते दशमोपगते लग्नस्थो वा रवौ जननीचराशिस्थे ॥२०॥ जी
वनिशाकरसौम्याः पंचमदुश्चिक्यधर्मगा वक्रा ॥ यदि भवंति तर्हि राजा कुबेरतुल्यो धनेनासौ ॥२१॥ य
द्येकोप्युच्चगतो मित्रैर्णा निरीक्षितो नृपं जनयेत् ॥ मित्रयुतो वा लग्ने धनधान्यसमन्वितो नृपो भवति ॥२२॥
एको वाप्युच्चगतो लग्ने स्वर्क्षे निशाकरे बलिनि ॥ नृपतिवंशे जातं राजानं लोकपूजितं जनयेत् ॥२३॥ उपच
यसंस्थैः सौम्यैः क्रूरैर्लग्नाश्रिते खमध्ये वा ॥ जातो भवत्यवश्यं धरणीशो दंडनायको वापि ॥२४॥ शशासने ल
ग्नलग्ने दिवाकरे सहिंदुना भूमिसुते खमध्यगे ॥ लाभे व्ययेवा भृगुजे बलान्विते देवेंद्रतुल्यो नृपतिः प्रजा
यते ॥२५॥ आयारिसहजसहितैः पापैर्यदि जन्मपक्षशुभदृष्टः ॥ भवति नराधरणीशः समस्तजनवंदि
तः साधुः ॥२६॥ मृगोदये भूमिसुते सुनिर्मले शनैश्चरे [illegible] धर्मगृहे व्यवस्थिते ॥ दिवाकरे सप्तमगे सहिं राम० ५०

50

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दुर्नावलस्वभावोन्नपतिःप्रजायते॥२७॥आरोढःस्थिताःसर्वे एव ग्रहेंद्राःशुक्रे सौम्ये स्वोच्चराशौ विलग्ने॥
जातःपुमान्भाग्ययोगेवरंति स्त्रीणांचैवंत्वन्यथाजन्मनिस्यात्॥२८॥भाग्येजातोयोनरःपंडितोसौक
त्यागवांश्चार्थवान्सत्यवांश्च॥गांधर्वविद्यागरमंडलवारणानामीशोविलग्नभवनोपगतेशुभेस्या
त्॥२९॥राजयोगेषुयेमर्त्याहीनजाताश्चपार्थिवाः॥राजवंशोद्भवास्तेषुभवेयुर्भूमिपालकाः॥३०॥ ॥इति
चतुर्थोध्यायः॥ ॥वंधु४कर्म१०गृहाधीशावन्योन्यंकेंद्रमाश्रितौ॥लग्नाधिपेवलवतियोगःकाहलसंज्ञकः॥१॥
वंधुस्थानाधिपेस्वोच्चेस्वर्क्षेमूलत्रिकोणगे॥कर्मेशेनयुतेदृष्टेयोगःकाहलसंज्ञकः॥२॥विलग्ननाथस्थितरा
शिनाथतद्राशिनाथोयदितुंगयुक्तः॥निशाकरात्केंद्रगतोथवास्याद्योगोमहान्काहलसंज्ञकःस्यात्॥३॥काह
लजातोभूपालोवंधुमान्विनीतश्च॥ग्रामपुरनगरकर्त्तालोकेश्रुतवान्सुगांतकीर्त्तिःस्यात्॥४॥दुर्गाणांनायको
राजावकुरेशपुराधिपः॥सात्विकोधर्मशीलश्चभेरीशंखपणारवः॥५॥विद्याविनयसंपन्नोरूपवान्विजितेंद्रियः॥
आढ्यधरोमहाभोगीयोगेस्यात्काहलेनरः॥६॥द्वौनीचगौयदिस्यातांनफलंतीहकाहलाः॥सप्तराशिगतैःसर्वै
र्लग्नात्खेटैर्मुनीश्वरैः॥मालायोगस्तथंप्रोक्तोमौक्तिमालाशुभाधिकैः॥७॥तथाभूतेग्रहैःसर्वैर्द्वितीयाद्यस्य
जायते॥योगोरत्नावलीमालानीचगोनास्तिचेद्ग्रहः॥८॥विक्रमादिगतैःसर्वैःखेचरैर्द्वेयदातदा॥योगोविक्रममाला

स॰चिं॰ ख्योद्वेषु भौकेंद्रमाश्रितौ ॥९॥ रसातलादिगैर्व्योमचरैः सर्वैर्दितुंगगैः ॥ अनन्तनीचगैर्वंधु मालायोगस्त्वयं भ-
५१ वेत् ॥१०॥ एवं सुताद्बुद्धिमाला षष्ठाद्वारिध्रमालिका ॥ सप्तमात्काममालाख्या रंध्राद्दौर्भाग्यमालिका ॥११॥ न-
वमाद्धर्ममालास्याद्दशमात्कीर्त्तिमालिका ॥ विजयाख्या महामाला योगो लाभाद्व्ययेवदेत् ॥१२॥ रिष्फात्पतन-
मालास्यात्फलं वक्ष्ये पृथक्पृथक् ॥ ॥ आद्ये महात्मा धनधान्ययुक्तो विद्याधिपः स्याद्भुवि कीर्त्तियुक्तः ॥ चंडप्रचं-
डो वक्रुदेशनाथो गजौघवाजौघस्फुटवाद्यघोषः ॥१३॥ नित्यापि भाक्स्यात्पितृभक्तियुक्तो वीरो महात्मा गण-
कप्रधानः ॥ विमृद्धपकारी विमलो भवेद्यो राजाभवेद्धार्मिकवंशवर्त्ती ॥१४॥ विद्वान्सुवक्ता विनयस्वभावो रोगा-
र्दितो भोगयुतो नरेशः ॥ युद्धे बलाढ्यः सुपराक्रमी स्यात्तृतीयमालाजननो तिधीरः ॥१५॥ भोगी स्याद्बहुदेशभा-
ग्यरसिको देवप्रतिष्ठापको भूदेवानुमतिस्थितो विजयधीः सौभाग्यसौख्यान्वितः ॥ अन्यैर्भूपतिभिर्दिगं-
तरगतैः संस्तूयपादाम्बुजं विद्याबादविनोदगोष्ठिकुशलः श्रीविष्णुभक्तो महान् ॥१६॥ ज्ञातो विद्वान्मंत्रवि-
न्मांत्रिको कपट्यः शूरो नेता धार्मिकः शास्त्रकर्त्ता ॥ लोके ख्याता कीर्त्तिमान्भूमिनाथो युद्धा भोगी भूसुरैः स्तूयमानः
॥१७॥ कृषिकृद्विज्ञानसमन्वितः स्याद्वारिध्रमालीजननो नरोसौ ॥ संत्यक्तशीलो विधनश्च क्रूरः कामी ख- राम॰
लः कामपरो विहीनः ॥१८॥ विद्याबादविनोदगोष्ठिरसिको देवप्रतिष्ठापको भूदेवानुमतस्थितो बहुगुणो वक्ष्य ५१
.६१

CC-0. In Public Domain. Digitization by eGangotri

देशाधिपः॥सामंतप्रभुभिर्दिगंतरगतैः संसेव्यमानो नृपो भोगी स्यान्नृपवंशभो विमलधीः स्त्रीणां विशेषा
त्यतिः॥१९॥दीर्घायुर्दुर्जनवर्जितो नरवरः सामंतभूपाधिपो यज्वा दानपरो महान्नृपरतस्तु लोके नृपः कीर्त्तिमा
न्॥आमध्याह्न॰ दन्य॰ त्तिचपलः स्त्रीनिर्जितो वेदवित्कामी कामपरायणः कलिरुचिः सर्वार्थविद्दूषकः
॥२०॥योगे स्याच्छुभमालिके गुणनिधिर्यज्वा धनी धार्मिको वाचाटो विनयप्रियो तिसुमतिर्लोकप्रसिद्धो म
हान्॥चार्वंगः प्रियवाक्प्रपंचरसिको भूमंडलाधीश्वरः शान्त्या पालितलोकितो नृपवरः स्त्रीणां विशिष्ट
ःपतिः॥२१॥योगे जातः कीर्त्तिमालाख्यसंज्ञे धनी कामी भाग्यभाग्देशनाथः॥स्त्रीभिः पुत्रैर्बंधुभिः पूज्य
मानो विद्वान्शास्त्रे शिक्षितः ख्यातिकोपी॥२२॥धर्मिष्ठो बलवान्कुलीननृपवरः स्त्रीणां विशिष्टः पतिर्योगे
स्याद्विजयाख्यके क्षितिपतिर्देवप्रतिष्ठापकः॥नानाशास्त्रविशारदः पटुमतिर्नानाक्रियादक्षको भोगी का
मपरायणो विमलधीर्वंद्यो देशाधिपः॥२३॥योगे स्यात्पत्तनाख्यके व्ययपरो देवप्रतिष्ठापको दीनांकः क्र
यविक्रयेति कुशलो धर्मी महाबुद्धिमान्॥आशायुर्विनयान्वितो बधरुचिर्देशाधिपे वंदितो विख्यातो भु
वि भूमिपो नयगुणैः संस्तूयमानो द्विजैः॥२४॥लग्नेशे केंद्रभावस्थे स्वोच्चराशिगते पि वा॥योगो यं चामरो
नाम गुरुणा यदि वीक्षितः॥२५॥शुभग्रहद्वये लग्ने मानेवाननुसंस्थिते॥सप्तमे नवमे वापि योगश्चामर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संज्ञकः॥ स्थानातृतीयैकादशे सौम्ये बुद्धिस्थानगते बुधे॥ लग्नाधिपे बलयुते योगश्चामरसंज्ञकः॥२७॥ व
र्गोत्तमगते सूर्ये लग्ने शीर्षोदये भं गते॥ केंद्रत्रिकोणगे सौम्ये यो०॥२८॥ योगे जातश्चामरे राजपूज्यो वि
द्वान्वाग्मी पंडितो दैवमानाढ्यः॥ सर्वज्ञः स्याद्दशाद्याधिकारी जीवेन्मर्त्यः सप्ततिं वत्सराणां॥२९॥ राज
वंशे तु यो जातो नृपो भवति निश्चयात्॥ मृदंगभेरीशंखानां रवैः कोलाहलो भवेत्॥३०॥ द्विजश्चेत्तत्स
मो जातो भटश्चेद्दंडनायकः॥ वैश्यश्चेच्चामरे योगे धनी स्यात्कीर्तिमान्भवेत्॥३१॥ ॥इति योगार्णवे पं
चमोध्यायः॥ ॥रंध्रारिनाथावन्योन्यं केंद्रराशिगतौ यदि॥ लग्नाधिपे बलयुते शंखयोग इतीरितः॥१॥
जीवचंद्रौ यदान्योन्यं केंद्रकोणगतौ यदि॥ लग्नाधिपेन संदृष्टौ भौमः शंख इतीरितः॥२॥ समसंख्यौ शु
भौ पापावेकस्मिन्भवने यदि॥ केंद्रत्रिकोणगौ तौ चेद्योगः शंख इतीरितः॥३॥ शंखे जातो भोगवानर्थ
युक्तः स्त्रीणां भर्ता हेत्रवान्पुण्ययुक्तः॥ श्रीपुत्राणां लालको राजपूज्यो जीवेन्मर्त्यो वत्सराणामशीतिं
॥४॥ द्वितीये द्वादशे लग्ने सप्तमे ग्रहसंयुते॥ कर्माधिपे बलयुते भेरीयोग इतीरितः॥५॥ मंदात्षष्ठाष्ट
मे भौमे भौमात्षष्ठाष्टमे गुरौ॥ गुरोः षष्ठाष्टमे सूर्ये भेरी०॥६॥ जीवात्तृतीयगे सौम्ये शुक्राद्विष्णे गुरु राम०
यदि॥ पंचमे सप्तमे सौम्ये भेरी०॥७॥ भेरीयोगे वाद्यघोषैः समेतो मत्तेभानां वाजिनां संघघोषैः॥ सद्वि ५२

६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्रायं स्तूयमानोन्नृपालो दीर्घायुः स्याद्भूमिपालैः सवंद्यः ॥८॥ उच्चस्थितांशनाथे तु केंद्रकोणोच्चराशिगे
॥ लग्नाधिपे बलयुते मृदंगो नाम संज्ञया ॥९॥ पंचमेशस्थितांशस्य नाथे केंद्रोच्चसंयुते ॥ उच्चांशकगते वा
पि मृदंगं ॥१०॥ अमलकमलनेत्रो विस्फुरत्स्थूलगात्रो विनयगुणसमेतो देशनाथस्य मंत्री ॥ सहजनन
यदारैः संस्तुतः कामशीलः प्रभुरथ नृपतीनां देवभूदेवभक्तः ॥११॥ चंद्रात्त्रिकोणे देवेज्ये बुधाद्भौमे त्रि
कोणगे ॥ बुधाद्यामे गुरौ वापि शारदो योग ईरितः ॥१२॥ बुधस्थितनवांशस्य नाथे केंद्रादिसंयुते ॥ शु
भग्रहेण संदृष्टे शा° ॥१३॥ चंद्राधिष्ठितराश्यंशनाथो यत्रांशके स्थितः ॥ तदीशे शुभखेटैर्दृष्टे छा° ॥१४॥
विद्वान्सवक्ता विनयार्थयुक्तो ग्रामाधिपो मंडलनायको वा ॥ सर्वैर्जनैरर्चितपादपीठो योगे भवेच्छार
दसंज्ञके स्यात् ॥१५॥ भाग्यनाथस्थितांशेशो गुरुर्वा भृगुजोपि वा ॥ केंद्रकोणगतौ तौ चेन्मत्स्ययोग इ
तीरितः ॥१६॥ केंद्रनाथो यदंशे स्यात्तन्नाथः शुभसंयुतः ॥ स्वोच्चमित्रगतो वापि मत्स्य° ॥१७॥ सिंहास
नांशगे भाग्यनाथे केंद्रसमन्विते ॥ वरलग्ने यदा जन्म मत्स्य° ॥१८॥ कार्यज्ञः करुणाकरो गुणनिधिः कां
ताभिरामोन्नपश्चार्वंगः स्थिरधीर्मनोहरतनुर्विद्याविनोदप्रियः ॥ पुत्रैः स्त्रीभिरभिश्रितो बहुधनैः संयो
जितः सर्वदा राजाध्यक्षसमानदेशाधिभवः श्रीमत्स्ययोगोद्भवः ॥१९॥ लग्ने धने तृतीये च नवमे दशमे भवेत् ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स॰चिं॰
५३

कर्मात्पापशुभैर्युक्ते कूर्मयोग इतीरितः॥२०॥ तृतीयेकादशे जीवे स्वक्षेत्रे पंचमे भृगौ॥ लग्नाधिपे वि
लग्नर्क्षे कू०॥२१॥ सप्तमा दशमे जीवे तृतीयेकादशे रवौ॥ धर्मे चाथ मिथुने वा कू०॥२२॥ विख्यातकीर्तिर्भु
विराज्यभाग्यो धर्माधिकः सत्वगुणप्रधानः॥ नित्यं सुखी चागुणकारकर्ता श्रीकूर्मयोगे मनुजो नरेशः
॥२३॥ भाग्येशे धनभावस्थे धनेशे भाग्यभावगे॥ भाग्यपे कोणराशिस्थे खड्गयोग इतीरितः॥२४॥ कामे
शे वाहनस्थे तु सिंहांशे भाग्यनायके॥ रंध्रेशे पुच्छराशिस्थे खड्ग०॥२५॥ पितृपैतामहं राज्यं शासते म
नुजाधिपः॥ वंधुदारात्मजैर्युक्तः खड्गजातो महावीर्यवान्॥२६॥ ॥इति योगावलिवे षष्ठोध्यायः॥ ॥लग्ने
शे वलहीने तु रंध्रनाथेन वीक्षिते॥ स्फुर्यौ छिन्नकरे जीवे रेकयोग इतीरितः॥१॥ भाग्येशेन समायुक्तो
रंध्रस्थानाधिपो यदि॥ वलहीने तु कर्मेशे रेक०॥२॥ भाग्यनाथस्थितांशेशात्त्रु मूढः पराजितः॥ रविलुप्त
करे जीवे रेक०॥३॥ हिवुकेशस्थितांशेशो रविलुप्तकरो यदि॥ व्ययाधिपेन संदृष्टो रेक०॥४॥ नवमा
न्निधनाधीशो रंध्रपेन समायुतः॥ वीक्षितः षष्ठपेनापि रेक०॥५॥ षष्ठाष्टमव्ययेसौम्याः पापाः केंद्रत्रि
कोणगाः॥ लाभेशे वलहीने तु रेक०॥६॥ लग्नेशे नीचराशिस्थे धनेशे पितृपास्थिते॥ भाग्येशे रविलुप्ते
तु रेक०॥७॥ त्रयस्त्रखेचरा निम्ने रविलुप्तकरास्तथा॥ देहेशे वलहीने तु रेक०॥८॥ रविलुप्तकरो जीव

+धाः ५

राम॰
५३

63

CC-0. In Public Domain. Digitization by eGangotri

शुक्रौ स्यातां विलग्नपः॥ शुभे नरस्समायुक्तो रेकं॥९॥ पंचमाष्टमभावेशः पापखेचरसंयुतः॥ अस्तगो निम्नगो
वाथि रेकं॥१०॥ लग्नद्विधर्मकर्माय सुखपुत्रास्तविक्रमे॥ स्थितः स्थितौ स्थिताः खेटाः शत्रुग्रहनिरीक्षिताः॥
॥११॥ आहो वयसि मध्ये त्वेद रिद्रश्च क्रमाद्भवेत्॥ नवयोगा इमे प्रोक्ता ह्येषु स्थानेषु रेकदाः॥१२॥ निर्विद्यो वि
धनो दरिद्रसहितो रेकोद्भवः कामुकः क्रोधी दुःखितमानसो रुचिकरः सौभाग्यहीनो पदुः॥ भिक्षाशी मलि
नो विवादनिरतो मात्सर्यरोषान्वितो देवब्राह्मणनिंदकः प्रतिदिनं भाग्यादियोगो नचेत्॥१३॥ दुष्टात्मा
कुनखी कुमार्गनिरतो दारास्मृतौ धिक्कृतो बंधनामप्रकारदूषणपरो ह्यल्पायुराभिक्षुकः॥ मूको अंधोवधि
रः श्रमतुहृस्यः कामातुरो रोषवान्पंगुर्नेत्रविकारभावसहितो रेकोद्भवः स्यान्नरः॥१४॥ त्रिदशाधिपवं
द्यस्य राशौ जातो ह्निचेद्यदा॥ लग्नात्षष्ठांत्यगो जीवो जातो भिक्षाशनो भवेत्॥१५॥ केंद्रत्रिकोणगाः पापा
ः शुभाः केंद्राद्बहिः स्थिताः॥ स्थिरलग्ने द्विजातश्चे द्भिक्षुः स्यात्परपोषकः॥१६॥ पंगुः स्यात्परदारपोष
रहितो नित्यं कुमार्गे रतो वाचाटः परभाग्यवंचनपरो घूतप्रपाते रतः॥ देवब्राह्मणनिंदको विनयधी धै
र्यैर्विहीनः सदा सौभाग्यात्मज मित्रबंधुरहितो दारिद्र्ययोगे नरः॥१७॥ उच्चस्थोपि तुलांशे वा स्थितः कम
लबोधनः॥ सार्वभौमस्य पुत्रोपि नीचत्वमुपजायते॥१८॥ तुलायाद्दशमे भागे स्थितः कमलबोधनः॥ स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हस्त्रराजयोगानां फलं नीचत्वमाप्नुयात् ॥१९॥ त्रिंशोदानबेंद्रस्थनीचांशेष्वनुपस्थितः ॥ संप्राप्तमतुलं राज्यं क्षि
प्रं नाशयति ध्रुवं ॥२०॥ उल्कापाते व्यतीपाते निर्घाते केतुदर्शने ॥ अधिराजकुले जातो भिक्षान्नेनोपजीवति ॥२१॥
मानेरवौ मन्मथभे निशीथे गेहे शनौ सोदरभे कुजः स्यात् ॥ लग्नेचरे देवगुरौ धनस्थे जातो निशायां परकार्य
कृत्स्यात् ॥२२॥ भावसंधौ विलग्नेशे केंद्रे पापग्रहा यदि ॥ चरलग्ने यदा जातो प्रेष्ययोगस्तदा भवेत् ॥२३॥ मंदेंदु
गुरुविधुकाः संधिस्थाः केंद्रकोणगाः ॥ स्थिरलग्ने दिवाजातः प्रेष्य० ॥ ऐरावतांशके जीवे संधौ भृगुसुते तनौ ॥
उन्नतांशगते चंद्रे केंद्राद्बहिरवस्थिते ॥ कृष्णपक्षे निशायां तु प्रेष्य० ॥२५॥ कर्मसंधौ दिवानाथे रेहसंधौ गुरुर्यदि ॥
षष्ठसंधौ धरापुत्रे प्रे० ॥२६॥ पापांशकगते चंद्रे पापाधिष्ठितराशिभे ॥ जीवे सलग्ननाथे तु प्रे० ॥२७॥ आकोकेरंग
ते जीवे चतुर्थे सोमनंदने ॥ षष्ठाष्टमव्यये वापि प्रे० ॥२८॥ पापात्मा कलहप्रियः कठिनवाग्भ देवतादूषको विद्या
भाग्यविहीनदुष्टरसिको मात्सर्यकोपान्वितः ॥ मिथ्यावादविनोदवंचनपरः शिश्नोदरे तत्परः कारुण्याद्विरसो
नभिज्ञचतुरो योगे परप्रेष्यके ॥२९॥ ॥इति योगावल्यां सप्तमोध्यायः॥ ॥ केंद्रत्रिकोणसंस्थे तु भाग्येशे परमो
च्चगे ॥ लग्नाधिपे बलाढ्ये तु लक्ष्मीयोग इतीरितः ॥१॥ सिंहासनांशके शुक्रे भाग्येशे च तथा स्थिते ॥ पारिजातां
शके सूर्ये कर्मेशे बलसंयुते ॥ वाहनेशे स्वतुंगस्थे ल० ॥ आगुणाभिरामो बहुदेशनाथो विद्यामहाकीर्तिम
+जीवे ल० ॥२॥ पारावतांशके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नोभिरामः॥ दिगंतविश्रांतनृपालवंशो राजाधिराजो बहुदारपुत्रः॥४॥ पारावतांशके चंद्रे पारिजातं गते
भृगौ॥ उत्तमांशगते जीवे कुसुमो लग्नगोचरे॥५॥ स्थिरलग्ने भृगौ केंद्रे त्रिकोणेंदु [redacted] शुभेतरे॥ श्रेष्ठ
स्थानं गते भौमे योगोयं कुसुमो भवेत्॥६॥ दाता महीमंडलनाथवंशो भोगी महावंशसमुद्भवः स्यात्
॥ स्त्रीनेत्रपूज्यो जनमंडलेशो लोके महाकीर्तिधनानुभावः॥७॥ विलग्ननाथस्थितराशिनाथतन्नाथ
राशीशतदंशनाथः॥ लग्नेश्वरात्केंद्रगतो यदि स्यात् स्वोच्चस्थितो वा यदि पारिजातः॥८॥ भाग्याधिपस्थांश
पतिस्थितांशतन्नाथराशीशतदुच्चनाथः॥ केंद्रत्रिकोणोपगतो यदि स्यात् स्वोच्चस्थितो वा यदि पारिजातः
॥९॥ कुले महति संजातो भोगी स्यान्नृपतिर्भवेत्॥ पुत्रदारार्थसंयुक्तो दीर्घायुर्विजितेंद्रियः॥१०॥ स्वोच्चे कें
द्रगते जीवे स्वर्क्षे वा यदि कोणभे॥ पारावतादिभागस्थे योगः स्यात् सकलानिधिः॥११॥ सर्वदानपरो नित्यं
सर्वभूतदयापरः॥ वृद्धानुसेवी वाग्मी च कालज्ञानी भवेन्नरः॥१२॥ गुरौ मानेसुते सारे स्वर्गानौ केंद्रको
णगे॥ श्रेष्ठावतारयोगः स्याच्चरलग्ने हि जन्मचेत्॥१३॥ सूर्यात्केंद्रगते भौमे जीवात्केंद्रगतेथवा॥ चं
द्रात्केंद्रगते जीवे योगः स्याद्दवतारजः॥१४॥ केंद्रगो जीवशुक्रौ चेत् स्वोच्चे मंदे पकंटके॥ चरलग्ने परा जन्म
यो०॥१५॥ स्थिरलग्ने त्रिकोणस्थे दृष्टे देवेंद्रमंत्रिणा॥ तस्मिन् पापग्रहे केंद्रे स्वोच्चे स्याद्दवतारजः॥१६॥ लग्न

स॰ चिं॰ ५५

पस्थितराश्यंशनाथस्थांशपतिः स्वभे ॥ त्रिकोणकेंद्रतुंगे वा योगः स्यादवतारजः ॥१७॥ कर्मपस्थितरा
श्यंशनाथस्थांशपतिः स्वभे ॥ स्वोच्चत्रिकोणगे वापि यो० ॥१८॥ श्रीमत्स्यपाशांकुशपुंडरीकश्रीचक्रदं
डांकितपाणिपादः ॥ श्रीवत्सवक्षस्थलगात्रयष्टिः श्रीमान्महाकीर्तिगुणाभिरामः ॥१९॥ शास्त्रप्रव
क्तासकलागमज्ञो धर्माधिकारी नयनाभिरामः ॥ परेंगितज्ञः परकार्यकृत्स्यात्स्वकर्मसंस्थानपरोन
रोयं ॥२०॥ पुण्यश्लोकस्तीर्थचारी कलाज्ञः कामासक्तः कालकर्ताजितात्मा ॥ वेदांतज्ञो वेदशास्त्रानुका
री ब्रह्मज्ञः स्याद्दानवत्सर्वभूतः ॥२१॥ सिंहासनगते चंद्रे पारिजातं गते गुरौ ॥ ऐरावतांशके शुक्रे योगो
हरिहराजजः ॥२२॥ वित्तेशाद्धनरंध्ररिष्फभवनेष्वाग्नेयसौम्यग्रहाः कामेशात्सुखभाग्यरंध्रभवने
जीवाच्चंद्रात्मजाः ॥ देहेशात्सुखकर्मलाभभवने सर्पास्फुजिद्भूमिजाः प्रोक्तास्तत्पुरातनैर्हरिहर
ब्रह्माविधोगाह्वये ॥२३॥ ब्रह्मज्ञानपरायणो बहुमतिर्वेदांतविज्ञानयुग्मालाकांचनदेहकांतिनयनो
लोकाभिरामो गुणी ॥ कीर्त्याक्रांतजगत्त्रयो मृदुवपुः पुण्याधिकारी सदा नागैर्वाजिभटैर्वृतः समरकृच्छ्रे
ताकुमारो भवेत् ॥२४॥ परमोच्चगते शुक्रे त्वगाधं शशिनंदने ॥ चंद्रे गविद्विजाते तौ योगो यं कमलाकरः
॥२५॥ चतुःषष्टिकलाभिज्ञो गोपुरारामकृन्नरः ॥ कमलाकरयोगे स्यात्कीर्त्याक्रांतजगत्त्रयः ॥२६॥

राम॰ ५५

65

योगोयं परमानंदो लग्नेशस्थांशराशिपः ॥ स्वोच्चे स्वभे वा केंद्रे वा स्थिरलग्ने तु संभवे ॥ २७ ॥ गोदावरीरेवनदीप्रयाग
कावेरितीर्थैः कृतपूतदेहः ॥ पद्माग्गुली मानवलोकनाथो युगांतकीर्त्तिश्च महान्नुदात्मा ॥ २८ ॥ कीर्त्तिस्थानं गते स्व
र्ये विक्रमस्थे धरासुते ॥ द्वितीये द्वादशे शुक्रे योगो मल्लारिसंज्ञकः ॥ २९ ॥ यवाब्जवज्रांकितपाणिपादो वक्र्यथस
रान्वितकीर्त्तियुक्तः ॥ सम्मार्गवर्त्ती नयनांतरक्तो बलाधिकारी नयनाभिरामः ॥ ३० ॥ देवलोकं गते जीवे पारिजातां
शके विधौ ॥ सिंहासनांशके शुक्रे सतिमुक्तिर्भविष्यति ॥ ३१ ॥ लग्ने रवौ व्यये शुक्रे तृतीये रविनंदने ॥ स्वोच्चत्रिकोणगे
जीवे जीवन्मुक्तो भविष्यति ॥ ३२ ॥ लग्नेशे शुभसंयुक्ते केंद्रे जीवे भवे रवौ ॥ तृतीये कादशे राहौ कृतकृत्यो भवेन्नरः
॥ ३३ ॥ दशमे कादशे जीवे त्रिकोणे केंद्रकेपि वा ॥ लग्ने चरे शुभयुते कृ० ॥ ३४ ॥ परमोच्चगते भानौ पारिजातांशके वि
धौ ॥ सिंहासनगते जीवे कृ० ॥ ३५ ॥ आचार्यवर्यो निगमांतशास्त्रे विनिश्चितार्थः सुमतिः सुशीलः ॥ श्रीवैंकटेशा
धुविमानवानां चकार योगार्णवमत्र भक्त्यै ॥ ३६ ॥ ॥ इति योगार्णवे ष्टमोध्यायः ॥ ॥ अथ राजयोगजातभंगाध्या
यः ॥ ॥ षड्भिर्ग्रहै रुच्चसमन्वितैः स्याद्राजाधिराजो वकुरेशभर्त्ता ॥ उच्चस्थितैः पंचभिरत्र राजा शस्त्यन्वितो वा त्रगुरौ
विलग्ने ॥ १ ॥ कुंभे विलग्ने भृगुनंदने वा स्वोच्चस्थितैर्भूमिपतिश्चतुर्भिः ॥ उच्चस्थितैर्नीचवियुक्तभागैः क्रूरादिदृ
ष्यंशविहीनभागैः ॥ २ ॥ लग्ने हृषेतत्र युते शशांके षड्भिर्ग्रहै रुच्चयुतैर्नृपः स्यात् ॥ कस्मिन्ग्रहे स्वोच्चयुते तु सर्वैः

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स. वि०
५६

स्वक्षेत्रगैर्भूपतितुल्यजातः॥३॥ मूलत्रिकोणं कित राशिषु क्षेमित्रर्क्षगैर्वा यदि वक्रशुक्रैः॥ कस्मिन्ग्रहे स्वोच्च
युते त्वशेषैर्नीचांशहीनैर्नृपतुल्यजातः॥४॥ जनयति नृपमेको प्युच्चगो मित्रदृष्टः प्रचुरधनसमेतं मित्रयो
गात्सुसिद्धं॥ विबलमुपि सुखम्ह ढ्याधितावंधुतप्ता वधदुरितसमेताः शत्रुनीचर्क्षगेषु॥५॥ शुभं वर्गोत्तमे
जन्म वेशिस्थाने च सद्ग्रहे॥ अश्वन्येषु च केंद्रेषु कारकाख्य ग्रहेषु च॥६॥ हित्वार्कं सुनफानफादुरुधुराः स्वं
त्योभयस्थे ग्रहैः शीतांशोः कथितोन्यथातु बहुभिः केमद्रुमोन्यैस्त्वसौ॥ केंद्रे शीतकरेथवा ग्रहयुते केमद्रुमो
नेष्यते केचित्केंद्रनवांशकेष्वपि वदंत्युक्तिः प्रसिद्धा न ते॥७॥ लग्ने चंद्रे गुरौ सौरे व्योकर्मस्थे भूनंदने॥ स्वोच्चस्थ
र्के स्थिते मंदे नृपतुल्यो भवेन्नरः॥८॥ दशमेकादशोरिष्फे लग्नेवित्तसहोत्थभे॥ ग्रहास्तिष्ठन्ति चेत्सौम्यान्
प०॥९॥ केंद्रत्रिकोणगाः सौम्याः पापाः षड्लाभसोदराः॥ लग्नाधिपे बलवति नृ०॥१०॥ दृश्यते शुभ्यतेवा
पिचंद्रजेन दृष्ट्यस्थितः॥ स्थिरस्थाशासनं तस्य धारयंति नृपा नृपः॥११॥ नीचस्थितो जन्मनि यो ग्रहः स्या
त्तद्राशिनाथो पि तदुच्चनाथः॥ सचंद्रलग्नादि हकेंद्रवर्ती राजा भवेद्धार्मिकचक्रवर्ती॥१२॥ निशाक
रे केंद्रगते विलग्नात्स्वत्रिकोणे यदि जीवदृष्टे॥ शुक्रेण दृष्टे बलपूर्णदेहे जातो नरो भूपतिभा
ग्यतुल्यः॥१३॥ नीचस्थिता जन्मनि ये ग्रहेंद्राः स्वोच्चांशगा राजसमानभाग्याः॥ उच्चस्थिता क्षेत्रदयिनी

=पा. स्वनेहिरुष्मा२

राम०
५६
66

CC-0. In Public Domain. Digitization by eGangotri

वभागगा ग्रहा न कुर्वंति तत्रैव भाग्यं ॥१४॥ ग्रहा बलाढ्या यदि पूर्वषट्के स्वोच्चस्थिताः पूर्वभागेन्नपः
स्यात् ॥ तद्वत्परे पश्चिमभागयुक्ता मिश्रस्थिताश्चेद्दुभयत्र भाग्यं ॥१५॥ त्रेधा विभज्यैतु वयःप्रमाणं
खंडत्रयं तत्र वदंति संतः ॥ व्ययाधिके प्राथमिके च खंडे शुभग्रहाः शोभनमत्र दद्युः ॥१६॥ खंडे द्वितीये
वहवश्च सौम्यास्तत्रैव सौख्यं तु तृतीयखंडे ॥ खंडे तु यस्मिन्बहवश्च पापा नीचारिगा मूढसमन्विता
स्तु ॥१७॥ दुःखं भवेत्तत्र विशेषतस्तु राज्यात्परं भ्रंशमुदाहरंति ॥ एवं भवेच्छोभनखेचरेंद्रैः खंडान्वि
तैः शोभनकालमाहुः ॥१८॥ लग्ने गुरौ बुधे केंद्रे भाग्यनाथेन वीक्षिते ॥ लाभेशेनापि संदृष्टे नृपतुल्यो भ
वेन्नरः ॥१९॥ सप्तमे जीवसंयुक्ते त्रिकोणे वा समन्विते ॥ लग्नाधिपेन संदृष्टे नृ० ॥२०॥ केंद्रेशनो त्रिको
णे वा स्वोच्चे मूलत्रिकोणगे ॥ राज्याधिपेन संदृष्टे नृपनामसमन्वितः ॥२१॥ कर्मेशे रंध्रभावस्थे स्वो
च्चमित्रांशसंयुते ॥ पारावतांशके वापि राज० राजो भवेन्नरः ॥२२॥ नीचे गुरौ विलग्नस्थे रंध्रस्थे वा युध
मेये ॥ तथा विधांशसंयुक्ते राज० ॥२३॥ गुरौ व्ययेशनौ लाभे रवौ वा विक्रमाधिपे ॥ गुरौ व्यये विलग्ने
रो राज० ॥२४॥ पंचमे जीवसंयुक्ते चंद्रे केंद्रे बृहस्पतौ ॥ स्थिरलग्ने तरीशे तु राज्यस्थे नृपतिर्भवेत् ॥२५॥
पूर्वषट्के ग्रहाः सर्वे यस्य तिष्ठंति जन्मनि ॥ भाग्याधिपे धनस्थे वा सचंद्रे नृपतिर्भवेत् ॥२६॥ चंद्राधि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स०चिं०
५७

ष्ठितनराख्यं शनाथे केंद्रायको लाभे ॥ वुधात्केंद्रगते वापि राजराजो भवेन्नरः ॥२७॥ निशाकरः समौ
मस्तक विनेवा त्रिकमे पि वा ॥ पंचमे राहुसंयुक्ते ग० ॥२८॥ भाग्याधिपसमायुक्तः नवांशाधिपतौ सु
खे ॥ पुत्रस्थानगते वापि नृपश्रेष्ठो भवेन्नरः ॥२९॥ आरे सकर्मभावे रोग्रहास्तिष्ठंति चेत्क्रमात् ॥ ल
ग्नादि पूर्व षट्के स्मिन्राजराजो भवेन्नरः ॥३०॥ लग्ने च रेतद्दीशे पि च ररा शं शकान्विते ॥ भाग्येशे स्व
राशिस्थे पित्रीयादन्ता देशगः ॥३१॥ राजयोगादि संज्ञाते तथा वाच्यो न्यथा न हि ॥ उत्तमांशगते चंद्रे गु
रोनींचो शव र्जिते ॥ शुभषष्ठ्यंशके सूर्येन्नपतुल्यो भवेन्नरः ॥३२॥ त्रयो वा द्वौ खगौ वापि च त्वारो नीचसं
युताः ॥ शुभषष्ठ्यंशसंयुक्ताः स्वोच्चांशे वा धरापतिः ॥३३॥ नीचस्थितांशनाथस्तु खेटः केंद्रत्रिकोण
गः ॥ चरलग्ने तदीशेतु चरांशाशेन्नपो भवेत् ॥३४॥ मानेराशौ भवेमंदे भाग्यनाथेन वीक्षिते ॥ लग्ने शेनी
च खेटेन युतेन्नृपसमो भवेत् ॥३५॥ अंशतो भावतो वापि स्वोच्चमूलत्रिकोणतः ॥ राजयोगास्तु निर्दि
ष्टास्ते चां योगे वहुत्वता ॥३६॥ अथ जातकभंगाः ॥ ॥ जीवे स्वके तोय दिवा सराहौ चंडालता पापनिरीक्षि
ते वेत् ॥ नीचांशगे नीचसमन्विते वा जीवे द्विजश्चेदपि तादृशः स्यात् ॥१॥ भुजादिमंदैः सहिते ऽपूज्ये गु
के क्षिते वाशाधिप सनुदृहे ॥ भृगोपि चेद्विप्रसमानमेति विधीच सर्वा मधिगम्य जातः ॥२॥ मेषे शशां

रा०म०
५७

67

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

केरविसूनुदृष्टे भिन्नाशनी भूमिसुतेनयुक्ते ॥ निश्रीर्विलग्नस्य निशाकरस्य लुब्धो दिनेशात्मजदृष्टि
योगात् ॥३॥ शुभग्रहाणामवलोकनेन हीनाद्भवेत्तत्र समन्विताद्वा ॥ तत्कालहोराधिपतौ धराजे केंद्रे
शनौ चेद्यदि वा विलग्ने ॥४॥ शुभग्रहाणामवलोकहीने हास्यक्तभिन्नाशनदेहशीलः ॥ ॥पापमध्यगते वै
द्रे सप्तमे मन्दसंयुते ॥ श्वासक्षयप्लीहगुल्मविद्रधिं भजते नरः ॥५॥ वेश्मो समे देहशमे सचंद्रे वृकल्यमं
गे क्षितिजे कलत्रे ॥ परस्परं हैवेन वा शशुक्तौ शशांकसूर्यौ तनुशोषणं स्यात् ॥६॥ दिनेशचंद्रौ रविरा
शि युक्तौ चंद्रदृष्टौ वा यदि शोषणं स्यात् ॥ रंध्रादिवित्तांत्यगता ग्रहेंद्रा दिनेशचंद्रारयमाः क्रमेण
॥७॥ कुर्वंति जातं नयनेन हीनं तन्द्रायुक्तोपाद्वलसंयुतस्य ॥ लग्ने गुरौ भूमिसुते कलत्रे उन्मादभाक् तत्र
नरो हि जातः ॥८॥ उन्मादयुग्भ्रंशयुतो विलग्ने शनौ कलत्रे सकुजे त्रिकोणे ॥ लग्ने शनौ रिष्फगते दिने
शचंद्रे त्रिकोणे यदि वा धराजे ॥९॥ उन्मादबुद्धिः सजडोथवा स्याज्ज्ञातो हि चेच्चंचलबुद्धियुक्तः ॥ लग्ने त्रि
+ लो ३ कौ दिननाथचंद्रौ शौर्ये गुरौ केंद्रसमन्विते वा ॥१०॥ उन्मादबुद्धिः स भवेन्नरो दानी शन्यारवारो यदि जन्मका
ले ॥ केंद्रस्थितौ सौम्यनिशाकरौ वा सौम्येशहीनौ भ्रमसंयुतः स्यात् ॥११॥ केंद्रस्थिता मंदनिशाकरार्की
जडो भवेद्दन्यजस्तृपभोक्ता ॥ भाग्येश्वरे रिष्फगते तदीशे वित्तस्थि [redacted] ते भ्रातृगते च पापैः ॥१२॥

=पा॰ मांदी २ =पा॰ नभः ४

स॰ षिं॰ ५८ केमद्रुमेस्मिन्सभवे कुभोजी दुष्कर्मयुक्तोन्यकलत्रगामी॥ नीचे विलग्नाधिपतौ तदंशे षष्ठाष्टमस्थे यदि पा
पखेटैः॥१२॥ मेदे विलग्ने कुलनाशकः स्यात्स्यात्पुराकुः शुभदृष्टिहीने॥ सर्वे ग्रहे नीचसपत्नभागैः कर्मान्यगे
र्भिक्षुक एव जातः॥१३॥ होरेश्वरे रिःफगते तु माने क्रूरान्विते भौमयुते शशांके॥ जातोभिशस्तः परदेशवासी भि
क्षाशनी दुःखितदेहभाक्स्यात्॥१४॥ रंध्रस्थिताः पापगताश्च सर्वे निशाकरांशो यदि केंद्रयुक्तो॥ योगे गतश्चेत्संभवे
त्तदानीं जातो ह्यपस्मारयुतः सुतस्याः॥१५॥ समन्विताः सौम्यशशांकयुक्ताः केंद्रस्थिता भोगिनाथे विलग्ने॥ च
डालयोगे संभवेत्तदानीं जातो निजाचाररतः कर्महीनः॥१६॥ षष्ठाष्टमे भानुसुते सभौमे जातो ह्यपस्माररयुतो
नरः स्यात्॥ पापग्रहाः षट्व्ययरंध्रमेषु जीवे परिध्यन्वितकेंद्रहीने॥१७॥ जातः परभ्रंशसमन्वितः स्याच्छुभे
नैयुक्ता यदि दृष्टिहीनाः॥ माने स्थिता वा यदि वित्तराशौ पापास्तथा देवगुरौ चहीने॥१८॥ भाग्येश्वरे वांत्यगते स
पापौ जन्मोदये शौरविगोकुलघ्नः॥ विनष्टपुत्रार्थकलत्रभावस्याच्छुभैर्न युक्तो यदि वीक्षितो वा॥१९॥ शुभाशुभैः
केंद्रगतैः शशांको लग्नेश्वरेणापि निरीक्षितश्चेत्॥ सौरांशकेवी यदि संयुतश्चे ज्ञातः कुलश्रेष्ठ सकरो विदा
रः॥२०॥ गृहात्परिभ्रष्टविदारपुत्रो गुणेन हीनो यदि वा जडोसौ॥ केंद्रेशनौ लग्नगते शशांके जीवे व्ययेभिक्षुक राम॰
एव जातः॥२१॥ चंद्रान्सुते र्थे यदि लग्ननाथे रंध्रस्थितैः सौम्यखगेतरैर्वा॥ मानस्थिते राशिकरे तदानीं जात ५८

68

स्फजीवत्यतिहेयष्टस्या ॥२२॥ लग्नाधिपान्मृत्युषष्ठव्ययस्थैः पापैर्जातो जन्मभूमेर्हि भ्रष्टः ॥ नी
चारिभांशे यदि रेवष्टउपस्तं शशांके वासरनाथयुग्मे ॥२३॥ जातोति दुःखी सुतदारहीनः कुत्सुरसो जी
वति भाग्यहीनः ॥ उच्चस्थिते वासरनायके तु नीचांशयुक्ते यदि राजपुत्रः ॥२४॥ प्राप्नोति नीचत्वमि
नोदये स्यात्पापेक्षिते वा यदि निश्चितार्थः ॥ ॥ तुलांशरस्थामे भागे स्थितः पंकजवोधनः ॥ सहस्रराज
योगस्य फलं नीचत्वमाप्नुयात् ॥२५॥ भृगुपुत्रोपि नीचस्थो राजयोगविनाशदः ॥ उक्ता पातादिप्र
काशग्रहे जातोपि भंगगे ॥२६॥ नीचेभृगौ मंदहनवांशके वा व्यये स्थिते चंद्र रवी कलत्रे ॥ निरीक्षितौ भा
नुसुतेन चान्त्रजातः परप्रेष्यमुपैति नित्यं ॥२७॥ हीणे शशांके क्षितिजे कलत्रे लग्ने शनौ भ्रंशतदन्वि
तः स्यात् ॥ लग्ने शनौ कामगते शशांके शुक्रेक्षिते वा यदि वंध्यभर्ता ॥२८॥ चंद्रे व्यये वा यदि वा दिनेशे मं
दे त्रिकोणे मदरं शुभेक्षे ॥ मंदाक्षिरोगी स भवेत्तदानीं नीचारिशत्रुंशगतास्तथैव ॥२९॥ सुतौ वुगोप
परखगो विशेषाच्छिद्रे ष्टरि व्यारिगतैर्धृता स्यात् ॥ शुभग्रहाणामवलोकहीने त्वंधो भवत्येव शुभैर्न दोषः
॥३०॥ माने शशांके सवुधे कलत्रे शनौ द्वितीये विकलांगमेति ॥ जातिच्युति नीचसपत्नभागसंमन्विता
स्ते यदि विनिश्चितार्थः ॥३१॥ निशाकरे कार्मुकमध्यभागे मृगास्य कर्कीडय भागयुक्ते ॥ मंदारयुक्ते तदवे

CC-0. In Public Domain. Digitization by eGangotri

म॰ चिं॰
५२

क्रूरो वा कुष्ठी भवेत्सौम्यदृष्टिविहीने ॥३२॥ कुंभोरकुंभालिनवांशयुक्ते चंद्रे समांशे यदि गुह्यरोगी ॥ चं
द्रे सुखे तद्भवनांशयुक्ते पापान्विते स्याच्छ्रितकंठरोगी ॥३३॥ चंद्रे सपापे फणिनाथयुक्ते रिष्फे शुभेरं
अगते यवापि ॥ उन्मादभाक् तत्र स रोषतान्वजात स्फनित्यं कलहप्रियः स्यात् ॥३४॥ चंद्रे सगोककर्क
टराशियुक्ते पापान्विते त्वथविपरीतयुक्तः ॥ उन्मंडलस्थौ शशिभानुपुत्रौ पापान्वितौ सौम्यदृशा
विहीनौ ॥३५॥ हृत्शूलभाक् जातनरस्तु नित्यं तथैव तौ सप्तमराशियुक्तौ ॥३६॥ केंद्रेशनौ जन्मनाथे
नष्टे जीवे शशांके यदि वा दिनेशे ॥ विलग्नगे स्यात्परिभाग्यहीनः आम्नायचारो मुनयो वदंति ॥३७॥ व्य
ये शुभेशो यदि पापखेटे केंद्रस्थिते ज्ञानधनादिहीनः ॥ परान्नभुक् दुःखितदेहभाक्स्यात् कुभेन दृष्टे
कलहप्रियो वा ॥३८॥ केंद्रे गुरौ तज्ञ न केन कालेन कर्म वेदोक्तमथास्ति नास्ति ॥ पितुः सुतो वा यदि
वान्कुर्यात् ऊर्ध्वं तु तत्कर्म शुभे विहीने ॥३९॥ केंद्रे शशांके क्षितिसूनुयुक्ते रंध्रस्थितो वा यदि कश्चिद
स्ति ॥ यंवाहनाशाद्भीतिं स्युर्वानितद्वाः सुखस्थिते ही एवस्मिन्याकरे तु ॥४०॥ रवौ सुखे पापदृशा समेते
रहोऽस्य मातुः सुखहानिमार्याः ॥ रवेः शशांके नवमस्थिते तु अलेमतिस्तस्य पितुः स्तु वाच्या ॥४१॥ पापे
क्षितौ चंद्ररवी व्ययस्थौ ऽलेमतिस्तस्य पितुः स्तु वाच्या ॥ कुजादियुक्ते दिवसेशपुत्रे सुखेः शनैर्वा भ

राम॰
५२

६१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

= भृगौ ३

यमस्य वा च्यं ॥४२॥ नीचे भृगौ धर्मगते सपापे द्विजग्रहनीय द्विपापदृष्टे ॥ विकर्णतामेति फणींद्रयुक्ते
माने तथा भौमयुते शिशुघ्नः ॥४३॥ नीचे गुरौ वा सरनाथकेवा केंद्रस्थिते पापयुते शिशुघ्नः ॥ केंद्रे सपा
पे शुभदृष्टिमुक्ते रंध्रे गुरौ गोमगजातिहंता ॥४४॥ शशांकसौम्यौ दशमस्थितौ वा पापेक्षितौ पापसमा
गमौ वा ॥ नीचांशगो सौम्यदृशा विहीनो जातस्तु नित्यं खलु पक्षिहंता ॥४५॥ रंध्रे गुरौ नीचसमन्विते
वा गलोतमस्तु प्रवदंति तज्ज्ञाः ॥ चंद्रे व्यये वामरभे सशुक्रे जातस्य वामं नयनं हि नस्ति ॥४६॥ रंध्रे त्रिको
ले दिवसाधिनाथे जातस्य गेहे शिथिलीभयं स्यात् ॥ तस्मिन्नराणौ वा यदि वा सकेतौ पतनेन राणांनीक
कलासजातिं ॥४७॥ गौल्यादिवासादि शुशंति तज्ज्ञाः स्तत्रैव राहुं कुजकेतुकोमें ॥ तत्रस्थिते सोमसुतेम्ब
रंशां शुक्रे तु निद्रापतनं स्त्रियश्च ॥४८॥ तत्रैव मंदे पतनं नराणां वलावलास्विंत्य वदेत्तराणी ॥४९॥ वंध्या
स्त्रियाः संगमनं रवौ स्यान्मंदे शशांके भवने समानं ॥ रजस्वलासंगमनं कुजे तु वंध्यांगनासंगमनं चवा
च्यं ॥५०॥ बुधे तु वेश्यागमनं मदस्थे हीनांगनासंगमनं वणिज्ञां ॥ मंदे गुरौ ब्राह्मणभार्यया वा भृगौ तु ग
र्भान्वितभामिनी वा ॥५१॥ सासुष्मिणी जातिविहीनता वा गम्या भवेन्न शनि ध्वजाद्यैः ॥ राहौ मदे गर्भि
णि संगमः स्यात् कुलाच्च कुठारशनिनावदंति ॥५२॥ सुखस्थिते रीदृशसंगमस्तु वाच्यस्तदा व्योमचरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स॰चिं॰ ६० विशेषात्॥स्वर्क्षादिमित्रैर्विमचरैः सुखस्थैर्वीक्ष्यमाणयोः संगमनस्य शाला॥५३॥ वनं गृहे स्नानगृहे विहारस्थानं तु दे
वालयतोयभूमिः॥ हरीशाऊस्थानमतीव दुर्गस्थानं तु वा निर्जरतोयभूमिः॥५४॥ केंद्रे चतुष्के यदि पापयु
क्ते जातः पशूनां मिथुनं समेति॥ केंद्रत्रिके पापयुते यदि स्यात्पश्वादिवन्मैथुनमेति जातः॥५५॥ कृशास्त
ना भूमिसुते मृदुस्थूलवस्तना मंदपरांगी इकेतौ॥ काठिन्यमं श्रोर्द्धकुचा रवौ स्याच्छेषग्रहे रुत्तमकोम
लस्तना॥५६॥ चंद्रेक्षणांगे यदि जीरांगे हं तस्मिन्वलिष्ठे सुदृढं नवीनं॥ दुःस्थे यदि स्याच्छनिराहुकेतौ देहे
नतनं स्तन्नियमेन वाच्यं॥ धनाधिपौ लग्नपतेस्तु मित्रे धनं तदीयं द्विजदेवतार्थं॥५८॥ इति चिंताम
+ श्रोकं६ रोगौ राजयोगादिनिर्णयं॥ जातभंगादिकं चैव वर्वकटेशेन धीमता॥५९॥ ॥इति सर्वार्थचिंतामणौ नवमोध्या
यः॥ ॥अथायुर्योगाः॥ ॥केचिद्योगं प्रशंसंति दशां केचिद्वदंति हि॥ न ह्विना चायुषां ज्ञानं न शक्यं तु मनीषि
भिः॥१॥ त्रिविधश्चायुषां योगः स्वल्पायुर्मध्यमोत्तमः॥ द्वात्रिंशात्पूर्वमल्पं स्यात् तदूर्द्धं मध्यमं भवेत्॥२॥
आसप्ततिस्तदूर्द्धं तु दीर्घायुरिति संमतं॥ उत्तमायुः शतादूर्द्धं मुनेः शंसंति तद्विदः॥३॥ आद्वादशाब्दाज्जंत
नामायुर्निर्णयं न शक्यते॥ जपहोमचिकित्साद्यैर्बालरक्षां तु कारयेत्॥४॥ पित्रोर्दोषैर्मृताः केचित् केचिद्बालग्र
हैरपि॥ अपरे रिष्टयोगाच्च त्रिविधा बालमृत्यवः॥५॥ प्रबलेनैव वालानां पुष्टिवर्द्धनं॥ कथये दशदोषं तु तत्र राम॰ ६०

+ऊन्मतः१

७०

घोगानुरूपतः ॥६॥ अल्पायुर्लग्नपे भानोः शत्रौ मध्यं तु मध्यमे ॥ मित्रे लग्नेश्वरे तस्य दीर्घमायुरुदाहृतं ॥७॥
अल्पायुर्योगजातस्य विपद्दाये मृतिर्भवेत् ॥ जातस्य मध्यमे योगे प्रत्यरौ तु मृतिर्भवेत् ॥८॥ दीर्घायुर्योगजाता
नां वधभे तु मृतिर्भवेत् ॥ त्रिषु योगेषु सर्वेषु प्रत्येकं त्रिविधं भवेत् ॥९॥ अल्पायुरल्पमध्यं तु पूर्णायुस्त्रिविधं
स्मृतं ॥ मध्यमादल्पमध्यं तु पूर्णायुस्त्रिविधं भवेत् ॥१०॥ दीर्घायुषोल्पमध्यं तु पूर्णायुस्त्रिविधं भवेत् ॥ एवं न
वविधं प्रोक्तमायुर्धां तु विनिर्णयं ॥११॥ पंचम्यारदशाम्न्तु देया न्षष्ठी गुरोस्तथा ॥ शनेश्चतुर्थी मृत्युः स्याद्दशा
राहोस्तु सप्तमी ॥१२॥ विपत्पाकदशाकष्टा प्रत्यरीशदशा तथा ॥ वधभेशदशाकष्टा पापा स्यात्स्वशुभेक्षिता ॥
॥१३॥ नीचारातिविमूढस्य विपत्प्रत्यरिनैधना ॥ दशाद्द्युर्मृतिं तस्य पापैर्युक्ता विशेषतः ॥१४॥ राशिसंधिषु ये
जातास्ते बालामृतजीविनः ॥ पापदृष्टेयुतो वापि निःसंशयमृतिः स्मृता ॥१५॥ गंडांते षड्वो मर्त्यः पितृमातृ
वलांतनः ॥ यदि जीवेत्स्वर्गपालो गजवाजिसमन्वितः ॥१६॥ तृतीयगो भानुनिशाकरो वा क्रूरदृग्गो क्रूरनिरीक्षि
तो वा ॥ व्याधिं नरस्यापि वदंति तज्ज्ञास्त्रिवर्षमात्रं तु पितुर्वलांतत् ॥१७॥ चंद्रात्स्मरे वासरनाथभौमौ कुजोदये वा
मरणं दशायां ॥१८॥ उग्रदृष्टं काणजामित्रे यस्य स्याद्दारुणो ग्रहः ॥ क्षीणचंद्रे विलग्नस्थे सद्यो हरति जीवितं ॥१९॥
आपोक्लिमेस्थिताः सर्वे ग्रहा वलविवर्जिताः ॥ षण्मासं वा द्विमासं वा तस्यायुः समुदाहृतं ॥२०॥ विलग्नाधिपति

स॰ चिं॰ नौ वे निधने वार्कसंयुते ॥ षष्ठेकोणे जीवनं विद्यान्यत्र नाशो भविष्यति ॥२१॥ केन्द्रेषु दुःपूर्वं मध्याह्नुल्या
६१ ग्निपवननिर्घाताः ॥ रौद्रे सति च मुहूर्ते आग्नेय्यस्तस्य ऽयते जंतुः ॥२२॥ ग्रहणे परिवेषकाले जातः पाप
न्विते विलग्नस्थे ॥ लग्नेशे बलहीने जीवति पक्षत्रयं त्रिमासं वा ॥२३॥ अमावास्याधिप जन्मपतिर्लग्नप
तिश्चास्तमुपगतो यस्य ॥ जन्मावसाने मरणं तस्य भवेत्कतिपयाहेन ॥२४॥ संधिचतुष्टयका
ले जातो मृत्युसमाद्भिश्चेतकुः ॥ पापयुते वा दृष्टे शीघ्रं सौम्येरदृष्टयुते ॥२५॥ राहौ केन्द्रे पापयुक्ते
क्षितेवा हिमांशुनाशं याति सौम्येरदृष्टे ॥ पापैः केंद्रे वार्कस्य ग्नेत्रिकोणे सौम्ये ः षष्ठे वाष्टमे त्येव वालः ॥२६॥
जातः क्षीणे शीतगौ लग्नसंस्थे पापैर्दृष्टे नाशमाशु प्रयाति ॥ उच्चस्थे त्रैमेषराशिं च हित्वा राहुर्युक्तेस्ते =घा४
क्षपि ग्रालनाशः ॥२७॥ लग्नात्सप्तमौ पापयुक्तौ यदि स्तः सप्ताष्टस्थो वा विनश्येत्केरीन ॥ लग्नाद्वि
लेचाष्टमे पापचारैः सौम्ये क्षीणे त्वष्टमाद्रं च जीवेत् ॥२८॥ केन्द्रे ऽच्छिद्रात्यापयुक्ते रसौम्यैः स्वर्गयातः राम॰
श्रोच्यते वत्सरेण ॥ जन्माधिपे लग्नगे क्रूरयुक्ते पश्यत्यार्किश्चाष्टमे जीववर्ज्जे ॥२९॥ षष्ठे वर्षे हाह ६१
रेवाष्टमे वा संध्यौ राशेर्जातो वा मृत्युमेति ॥ षष्ठाष्टमे वा हिमगौ च यस्य क्षीणे त्वं ते पापयुते थवापि ॥३०॥

CC-0. In Public Domain. Digitization by eGangotri

सौम्यैर्दृष्टे त्वष्टमाहं च जीवेत्पापैः सौम्यैर्मिश्रिते स्त हृला स्वं॥ जीवे विलग्ने मिथुने तुलायां शुक्रे गावु
के राशिस्थ तुनाव॥३१॥ पापैर्दृष्टे मृत्युराशिस्थिते वा जीवेद्वर्षं चाष्टमं चैव बालः॥ ॥लग्ने हीनेशशि
नि निधनं रंध्रकेंद्रेषु पापैः पापांतस्थे निधनहिबुकघ्नशुक्रे च चंद्रे॥ एवं लग्ने भवति मरनं छिद्रसंस्थे
श्च पापै मीत्रासार्द्धं यदि च न शुभैर्वीक्षितः शक्तिमद्भिः॥३२॥ राहुग्रस्ते शीतरश्मौ विलग्ने क्रूरैर्युक्ते वा
ष्टमे मृत्यु निधुवे॥ मात्रा सार्द्धं चंद्रवद्भास्करे राशस्तो पापेनाशु मृत्युं प्रयाति॥३३॥ अस्तं गते दिनपतौ
रविजे विलग्ने भौमे यदापि निधनं प्रजाति तत्तीयात्॥ एवं स्थिते पि हिमगा वसुभे रदृष्टे राहुग्रहे च नि
यतं भवतीह चाष्टौ॥३४॥ बृहस्पति भौमगृहे ष्टम स्थः सूर्येन्दु भौमार्कज दृष्टमूर्त्तिः॥ अष्टे त्रिभिर्भा
र्गवदृष्टिहीनो लोकांतरं प्रापयति प्रसूतं॥३५॥ वक्री शनिर्भौमगृहं प्रपन्न श्छिद्रे च षष्ठे च चतुष्ट
ये वा॥ कुजेन संप्राप्तबलेन दृष्टो वर्षद्वयं जीवयति प्रजातं॥३६॥ सौरे स्मरस्थे यदि वा विलग्ने जलस्थ
लग्ने शशिहष्ठिके वा॥ सौम्येषु केंद्रोपगतेषु सद्यो जातस्य मृत्युर्यवनोपदिष्टः॥३७॥ नीचस्थ देव पू
ज्येतु भौमक्षेत्रगते यदा॥ संधित्रयेपि जातस्य मासान्मृत्युं प्रयच्छति॥३८॥ कर्कस्य संधौ तिथिरा
शिसंधावेकत्रितान्त्रसवस्त्रिधा स्यात्॥ जातश्च मृत्युं समुपेति सद्यः शुक्रेन्दु जीवे दितिनं द्विकोणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स॰चिं॰
६२

॥३९॥ बध्यांजातस्यार्कलग्ने कुजे वा गंडांते वा मृत्युयोगे पवापि॥ भौमे मोहं तिथ्याख्ये नांत रंध्रे रोगे न जीवे क्षितेचे
न्नेभवे त्रिंशांशा नां॥४०॥ भौमे मोदये तद्दिवसे कशंशे होरास्या— रपष भेशांशके॥ जातः सुखी ब्रह्मपदं प्रयाति र
सायनाद्ये रिःफमेव नास्ति शुद्धा॥४१॥ वर्गोत्तमे लग्नगते कुलीरे केंद्रे गुरौ भूमिसुते कलत्रे॥ सिंहासनांशे भृगु
जे विशेषाद्रसायनाद्यैरमितायुरेति॥४२॥ कन्यांशलग्ने सततं शुभे कलत्रे जीवे वयुगो पुरभागयुक्ते॥ स्वदृ
शाके वा दिननाथपुत्रे जातस्य संख्याऽत्युरूपैति लक्ष्मीः॥४३॥ देवलोकांशके शुक्रे केंद्रे स्थे धरणी सुते॥
सिंहासनांशके जीवे केंद्रे जातस्त्व संख्यकः॥४४॥ उत्तमांशे भृगौ केंद्रे शनौ पारावतांशके॥ स्वर्गलोके
गुरौ केंद्रे स्त्रोषधाद्यैर संख्यकः॥४५॥ गोपुरांशे गुरौ केंद्रे शुक्रे पारावतांशके॥ त्रिकोणोक कर्किलग्ने तु
युगांतं तु स जीवति॥४६॥ चापांशे कर्किलग्ने च तस्मिन्देवेन्द्रपूजिते॥ त्रिचतुर्भिर्ग्रहैः केंद्रे जातो ब्रह्म
पदं लभेत्॥४७॥ तृतीये कारकेशे शुक्रे गोपुरांशकान्विते॥ एवं वर्गोत्तमे लग्ने ब्रह्मलोकः परमं पदं॥४८॥
लग्ने कुजे गुरौ कामे कन्यायां भृगुनायके॥ चापे मेषांशके लग्ने जातो याति परं पदं॥४९॥ पंचमे बुधसंयुक्ते
गोपुरांशकान्विते॥ गुरौ घटे विलग्नेस्मिन्जातो ब्रह्मपदं लभेत॥५०॥ केंद्रे गुरौ लाभगते अर्कपुत्रे धने रवौ
मांदिस्युते कलत्रे॥ भाग्येश्वरास्ते तु युते त्रजातो युगांतकालं समुपैति मंत्रैः॥५१॥ त्रिकोणगे गोजीवबुधेषि

रा॰म॰
६२

72

शेषालग्ने दृष्टेन च युते धराजे ॥ निशाकरे गोपुरभागयुक्ते जातः सहस्रद्वयवर्षमेति ॥ ५२ ॥ पुष्ठे स्थिते जन्मपसाङ्गि
काले केंद्रे गुरौ वा राशिमे विलग्ने ॥ सारे कुजे भानुसुते सुखस्थे जातस्तु जीवेद्युतान्हसंख्या ॥ ५३ ॥ जीवमंदारसु
कालमृत्याप्येकेंद्रसंभवे ॥ त्रिकोणे वा यदा जाते जातस्त्वयुतवत्सरैः ॥ ५४ ॥ शुभैर्युक्ते चतुष्केंद्रे पापैः षट्त्रि
भवान्विते ॥ सिंहलग्ने यदा जातो जीवेत्षडयुतानि सः ॥ ५५ ॥ अथ मुनियोगाः ॥ ॥ कर्क्यादिस्थैर्ग्रहैः सर्वैः शुक्र
चंद्रादिभिर्यदा ॥ शन्यंतैः परमोच्चस्थैर्मुनितुल्यो भवेन्नरः ॥ ५६ ॥ शन्यादिभौमपर्यंतं लग्नादौ खचराः स्थिताः
॥ वैशेषिकांशसंयुक्ता जातास्त्वमरसंनिभाः ॥ ५७ ॥ आकल्पं जीवति नरो मृगे लग्ने कुजादितः ॥ रव्यंताः खचराः
सर्वे सोत्यैर्जीवेन्नजन्मनि ॥ ५८ ॥ मेषांत्यलग्ने सगुरौ मृगे वा निशाकरे गोधनुमध्यमांशे ॥ सिंहासनां
शे यदि वा धराजे जातस्त्वसंख्यान्नृपैति मंत्रैः ॥ ५९ ॥ स्थिरे रवौ सोमसुतेन युक्ते चंद्रे हबस्थे मिथुने च शु
क्रे ॥ गुरौ कुलीरे यदि वा विलग्ने शनौ तुलायां मुनिसाम्यमेति ॥ ६० ॥ देवलोकांशके मंदे भौमे पारावतांशके
॥ सिंहासने रवौ लग्ने जातो मुनिसमो भवेत् ॥ ६१ ॥ मेषलग्ने रवौ माने जीवे स्वोच्चसमन्विते ॥ त्रिषडायगते
पापे जातो मुनिसमो भवेत् ॥ ६२ ॥ इति चिंतामणौ श्रीक्रमसंख्यायुर्मनीषिणां ॥ यदुक्तं पूर्वकैः सर्वं तत्त
देवमयाश्रुता ॥ ६३ ॥ इति सर्वार्थचिंतामणौ द्वादशोऽध्यायः ॥ ॥ दशानुरोधेन फलं वदंति मुनीश्वरा ज्ञा

स.चिं.
६३

ते शुभाशुभं तत्॥ सारं समुद्धृत्य तदेव वक्ष्ये भेदं यथा विस्तरतो दशानां॥१॥ दीप्तः स्वस्थस्तु मुदितः शांतो
हीनोतिदुःखितः॥ विकलः खलश्च कोपीन वधा खेचरो भवेत्॥२॥ उच्चस्थः खेचरो दीप्तः स्वस्थः स्वर्क्षे तिमित्रभे
॥ मुदितो मित्रभे शांतस्त्वंन्यरे हीन उच्यते॥३॥ शत्रुभे दुःखसंयुक्तो विकलः पापसंयुतः॥ खलः पराजितो ज्ञेय
:कोपी स्यादर्कसंयुतः॥४॥ पृथक्पृथक्फलं तेषां दशाकाले विशेषतः॥ नत्वत्रामानुरोधेन परिपाके वदंति हि॥
॥५॥ पाके प्रदीप्तस्य धराधिपत्यं सुत्साह शौर्यं धनवाहनं च॥ स्त्रीपुत्रलाभं सुखबंधुपूज्यं क्षितीश्वरान्माननमेति
विघ्नं॥६॥ स्वस्थस्य खेटस्य दशाविपाके स्वस्थो नृपात्केश्व धनादिसौख्यं॥ विद्यायशः प्रीति महत्त्वतां च दारार्थभू
म्यात्मज धर्ममेति॥७॥ मुदान्वितस्यापि दशाविपाके वस्त्रादिभूगंधसुतार्थधैर्यं॥ पुराणधर्मश्रवणादिगानसेना
दिवाहनं वरभूषणानि॥८॥ दशाविपाके सुखधैर्यमेति शांतस्य भूपुत्रकलत्रयानं॥ विद्याविनोदान्वितधर्मशास्त्रं
वदर्थदेशाधिपपूज्यतां च॥९॥ स्थानच्युतिर्बंधुविरोधता च हीनस्य खेटस्य दशाविपाके॥ जीवत्यसौ कुत्सितहीनवृ
त्त्या पापको ज्ञैरोगनिपीडितः स्यात्॥१०॥ दुःखान्वितस्यापि दशाविपाके नानाविधं दुःखमुपैति नित्यं॥ विदेशगो बं
धुजनैर्विहीनश्चौराग्निभूपैर्भयमाभिशप्तः॥११॥ वैकल्यखेटस्य दशाविपाके वैकल्यतां याति मनोविकारं॥ पित्रादि
कानां मरणं विशेषात्स्त्रीपुत्रयानांबरचौरपीडां॥१२॥ दशाविपाके कलहं वियोगं खलस्य खेटस्य पितुर्वियोगं॥ शा

रा.म.
६३

तुर्ङ्गानां धनभूमिनाशमुपैति नित्यं स्वजनैश्च निंद्यः ॥१३॥ कोपान्वितस्यापि दशाविपाके पापं समायाति बहुप्र
कारैः ॥ विद्यायशः स्त्रीधनभूमिनाशं राजा च वित्तं हरते च रोगी ॥१४॥ ॥इति दीनादि दशाफलं ॥ ॥अथ दशाफलानि ॥
भानोर्द्दशायां परमोच्चगस्य नूनम्यर्थदारात्मजकीर्त्तिशौर्यं ॥ सन्माननं भूमिपतेः सकाशादुपैति संचाररविनोद
गोष्ठिं ॥१॥ उच्चान्वितस्यापि रवेर्दशायां गोवृद्धिधान्यार्थपरिभ्रमं च ॥ संचारमुग्रं बंधुजनै विरोधं देशादिदे
शं च रतिप्रकोपात् ॥२॥ एवं उ वेश्यागमनं क्षितीशादुपैति वित्तं रतिकेलिमानं ॥ मदं गन्भेरीरवमुत्कय
न-मन्योन्ययानं लभते मनुष्यः ॥३॥ आरोहिणीवासरनायकस्य दशा महत्त्वं कुरुते तु सौख्यं ॥ परोपका
रं सुतदारभूमिनो वाजिमातंगकृषिक्रियादीन् ॥४॥ दशावरोहादिननायकस्य कृषिक्रियाविलग्नदेहे
ष्ट नाशं ॥ वैराग्निपीडां कलहं विरोधं नरेशकोपं कुरुते विदेशं ॥५॥ नीचस्थितस्यापि रवेर्विपाके मानार्थ
नाशं क्षितिपालकोपात् ॥ स्वबंधुनाशं सुतदारमित्रैः पित्रादिकानामपकीर्त्तिमेति ॥६॥ अत्यंतनीचान्वितं
तस्य यदा येवि पत्तिमाप्नोति गृहायुतिं च ॥ विदेशयानं मरणं अरण्यं स्त्रीपुत्रगोभूमिकृषेर्विनाशं ॥७॥ म

लत्रिकोणस्थरवेर्विपाके स्त्रार्थदारात्मजबंधुसौख्यं ॥ राजाश्रयं गोधनमित्रलाभं सुस्थानयानादिकमेति
राज्यं ॥८॥ स्वक्षेत्रगस्यापि रवेर्दशायां स्ववंधुसौख्यं. कृषिवित्तकीर्तिः॥ विद्यायशः प्रार्थितराज्यपूजां स्वभूमिला
भं समुपैति विज्ञं ॥९॥ दशाविपाके त्वधिशत्रुगस्य रवेः प्रनष्टार्थकलत्रपुत्रः ॥ गोमित्रपित्रादिशरीरकष्टं
शत्रुत्वमायाति जनैः स्वसंघैः ॥१०॥ स्वशत्रुराशिस्थितसूर्यदाये दुःखी परिभ्रष्टसुतार्थदारः ॥ नृपाग्निचौ
रैर्विपदं विवादं पित्रोर्विरोधं च दशांत्यमेति ॥११॥ स्वमित्रराशिस्थितसूर्यदाये स्वमंत्यमित्रात्मजराजपू
ज्यं ॥ स्वगेहवासं स्वजनैश्च संगं यानादिभूषां वरताम्रलाभं ॥१२॥ अत्यंतमित्रर्क्षगतस्य भानोर्दशाविपा
के ह्यतिसौख्यमेति ॥ स्त्रीपुत्रधान्यार्थमनोविलासं तदा कथानां वरभूषणानि ॥१३॥ समर्क्षगस्यापि रवे
र्दशायां समं जनेस्याः कृषिभूमिधान्यं ॥ गोवाजियानां वरदेहसौख्यं. स्त्रीपुत्रदोषं रणपीडितः स्यात् ॥
१४॥ नीचान्वितस्यापि रवेर्दशायां नीचानुरक्त्याज्जनखीकुशीलः ॥ स्त्रीपुत्रधान्यार्थपशुक्षियादि मनोविः
कारं समुपैति हेयः ॥१५॥ उच्चान्वितस्यापि रवेर्दशायां मनोविलासं समनेकुयात्या ॥ तीर्थाभिषेकं हरिकीर्त

नंच प्राकारकृपादि पुराण वास्त्रं ॥१६॥ पापान्वितस्य द्युमणेर्विपाके नित्यं मनः क्लिश्यति देयबुद्ध्या ॥ कुभोज
नं कुत्सितवस्त्रयानं कुशीलपत्न्या वधनं कृशत्वं ॥१७॥ दिनाधिनाथस्य शुभान्वितस्य पाके सुखं भूमिधना
दि वस्त्रं ॥ इष्टैर्विलासं स्वजनैः समाजं कल्याणवाग्जालविनोदनेष्टिं ॥१८॥ पापेक्षितस्यापि सहस्रभा
नोर्दशाविपाके परमं तु दुःखं ॥ पित्रोर्विनाशं सुतदारकष्टं चौराग्निभूपालकृतं कृशत्वं ॥१९॥ क
रोति भानुः शुभवीक्षितश्च दिव्याय शः स्त्रीसुतवाग्विलासं ॥ कांतिं घनां पेरति केलिसौख्यं पित्रोः सु
खं भूपतिमाननं च ॥२०॥ केंद्रान्वितस्यापि दिवाकरस्य दशाविपाके नृपदंडदुःखं ॥ स्थानच्युतिं बं
धुवियोगमेति भंगः कृषेर्वित्तपरिभ्रमं च ॥२१॥ त्रिकोणसंयुक्तरवेर्विपाके बुद्धिप्रभं राजविमा
ननं च ॥ सौख्यादिहानिं निधनं पितुश्च कर्मादिवैकल्यमुपैति काले ॥२२॥ उच्चांशकस्य च दशाविपच्या
ति वृद्धिं. नित्यं ध्रुतासवजनितां महतीं श्रियं च ॥ नानाविनोदललितं रतिकेलिसौख्यं . स्त्रीवस्त्रलाभ
मनिशं पितृवर्गनाशं ॥२३॥ नीचांशसंयुक्तरवेर्दशायां भार्यार्थभूपुत्रविदेशयानं ॥ त्यक्तोजनै

स.चिं. बंधुविछत्तिं तस्करमनोविकारं ज्वरमेहरोगं ॥२४॥ आदौ स्वर्यदशायां दुःखं पित्तरोगकृत्सू(?) यश्चाधि
६५ गामं ध्येवसु धनहानिश्चांते विद्या महत्त्वं ॥२५॥ दशाविपाके धनहानिमेति षष्ठस्य भानो रतिदुःख
जातं ॥ गुल्मक्षयोद्भूतनपवित्ररोगं मूत्रादिकृच्छ्रं त्वथवा प्रमेहं ॥२६॥ रंध्रस्य भानोरपि वा दशायां दे
हस्य कष्टं त्वथवा पवित्रं ॥ वातुर्यिकिं नेत्रविकारकासं ज्वरातिसारं स्वपदच्युतिश्च ॥२७॥ भानोर्यदिश
त्रिशिगस्य च दशाक्लेशार्थहानिंकरं स्त्रीवध्वात्मजन्मभूमिनाशमथवापि वृत्तिविनाशंकसिं ॥ स्थानस्थान
परिभ्रमं विषदत्तं राज्ञां भयं पादरक्तविद्यावादविनोदगोष्ठिकलहं गोवाजिसंपीडनं ॥२८॥ पुत्रोत्प
त्तिविपत्तिमत्र कुरुते भानोर्धनस्थस्य वा क्लेशं बंधुवियोगदुःखकलहं वान्दूषतां क्रोधनं ॥ स्त्रीनाशं ध
ननाशनं नृपभयं न्दपुत्रयानां वरं सर्वनाशमुपैति तन्नमुमनुष्यावान्नेवेतन्फलं ॥२९॥ भानोर्विक्रम
युक्तस्य दशा धैर्यमहत्सुखं ॥ नृपमाननमर्थाप्तिं भ्रातृवैरं विपत्तथा ॥३०॥ सुखस्थितस्यापि रवेर्दशायां भो राम.
गार्थभूमन्यकसत्रहानिं ॥ नेत्रादिनाशं स्वपदच्युतिं वा यानच्युतिं चौररविपाग्निशस्त्रैः ॥३१॥ दारान्वितस्यापि ६५

रवेर्दशायां कलत्ररोगं त्वथवा मृतिं च ॥ कुभोजनं कुत्सितपाकजातं क्षीराज्यदध्यादिविहीनमन्नं ॥३२॥
कर्मस्थितस्यापि रवेर्दशायां राज्यार्थलाभं समुपैति धैर्यं ॥ उद्योगसिद्धिं यशसा समेतां जयं विवादे नृप
माननं च ॥३३॥ आयस्थितस्यापि दशाविपाके भानोर्धनाप्तिं सुतकर्मलाभं ॥ उद्योगसिद्धिं सुतदारः
सौख्यं यानादिवस्त्रांवरदेहसौख्यं ॥३४॥ संज्ञाध्यायेयस्य यद्द्रव्यमुक्तं कर्माजीवे यस्य यच्चोपदिष्टं ॥
भावस्थानालोकयोगोद्भवं च तत्तत्सर्वं तस्य योज्यं दशायां ॥३५॥ तुर्यस्थानवलाधिके कृषिधनं गोभूमि
यानां वरं सौख्यं राजसुमौनैवरधनैः संयुज्यते कांतिमान् ॥ तत्पाकेशयनांवरादिसन्मते सर्वोपकारं
महत्कीर्तिंभूषणमिष्टबंधुसहितं तीर्थाभिषेकं महत् ॥३६॥ रवौ यदा स्थानवलेन हीने तत्पाककाले
व समर्थनाशं ॥ स्थानच्युतिं बंधुविरोधतापं देशादिदेशं समुपैति दुःखं ॥३७॥ दिग्वीर्ययुक्ते दिवसेश्व
रे तु दिग्गं नराणां तद्धनादिसौख्यं ॥ तत्तद्दिशः प्राप्तयशोर्थभूमिं नो चेत्तथा तादृशमत्र नास्ति ॥३८॥ तत्का
समा वैकनुपेव लिष्टे रवौ विपाके कृषिभूमिवित्तं ॥ उद्योगसिद्धिं नृपमाननं च हीने रवौ कासवसेनना

स.वि.
६६

शं ॥३९॥ निःसमेति सर्वसुखैति काले रवौ तुङ्गे समधिकवीर्ययुक्ते ॥ यानार्थभूषांवरदेहसौख्यं हीने रवौ वै
रविषान्निभीतिं ॥४०॥ रवौ तु वेशधिकवीर्ययुक्ते स्वयेष्टिनाथागमनेति सौख्यं ॥ नृपस्य मानं सुतदार
सौख्यं कृष्यादियानां वरमत्रहीने ॥४१॥ रवौ खगानां बलदृष्टियुक्ते, त्वविंतयित्वा सकलं च सौख्यं ॥ त
द्वायतेन त्वपरिपाककाले ते नैव हीने सकलं विनाशं ॥४२॥ क्रूरादिषड्वंशरवेर्दशायां स्थानच्युतिं वान्
पचौरभीतिं ॥ कोपाधिकं तत्र शिरोरुगं च पित्तादिना शं त्वथवा नदीयं ॥४३॥ मृदंशषड्वंशरवेर्द
शायां, मृदन्नपानांवरभूषणाप्तिं ॥ नामृदयं राजसुपूजितं च, वेदान्तशास्त्रागमधर्मशास्त्रं ॥४४॥
पारावतांशे शकुनस्य भानोर्दशाविपाके महतीं च कीर्त्तिं ॥ वंशार्थदिक्षाधिपमाननं च, पुत्रादिसन्मि
त्रकलत्रसाम्नं ॥४५॥ स्वोच्चादिजन्यं फलमाहभानुः पश्चात्फलं स्वेचरदृष्टिजन्यं ॥ मध्ये फलं स्थानभ
वं तथैव पापग्रहाणामिह योजयंति ॥४६॥ भुजंगमध्यंशकुतस्य भानोर्दशाविपाके हि भयं विषाद्वा
॥ नृपाग्निपातिव्ययमनेकदुःखं, पाशादिषड्वंशकुतस्य चैवं ॥४७॥ स्वोच्चस्योपिदिनेशो नीचांशे चेत्

राम.
६६

२०

६६

CC-0. In Public Domain. Digitization by eGangotri

सत्रधनहानिः॥ स्वकुलजबंधुविरोधः पित्रादीनां तथैव मुनिवाक्यं॥४८॥ उच्चांशस्थतो भानुर्नीचस्थश्च
महत्सुखं॥ करोति राज्यभारं च दशांते विपदं भृशं॥४९॥ इति रविदशाफलं॥ ॥अथ चंद्रदशाफलं॥
अत्युच्चगस्यापि निशाकरस्य दशाविपाके कुसुमांबरं च॥ महत्त्वतामेति कलत्रलाभं धनाप्तिपुत्र
मनोविलासं॥१॥ उच्चस्थितस्यापि निशाकरस्य प्राप्तो दशायां सुतदारवित्तं॥ मिष्टान्नपानांबरभू
षणानि विदेशयानं स्वजनैर्विरोधं॥२॥ आरोहिणीचंद्रदशाप्रपन्ना स्त्रीपुत्रवित्तांबरसौख्यकांतिं॥
करोति राज्यं सुखभोजनं च देवार्चनं भूसुरतर्पणं च॥३॥ निशाकरस्याप्यवरोहकाले स्त्रीपुत्रमित्रां
बरसौख्यहानिं॥ मनोविकारं स्वजनैर्विरोधं चौराग्निभूपैः पतनं तदैके॥४॥ नीचांशकस्यापि निशा
करस्य प्राप्तौ दशायां विविधार्थहानिं॥ कुभोजनं क्लान्तिं न राजसेवा मनोविकारं समुपैति निद्रां॥५॥
भूसंधिकोणस्थितचंद्रनाथे नृपाद्धनं भूमिसुतार्थदारान्॥ प्राप्नोति भूपां वरमानलाभं सुखं जन
न्यारतिकेसिसोसं॥६॥ स्वक्षेत्रगस्यापि निशाकरस्य नृपाद्धनप्राप्तिमुपैति सौख्यं॥ त्रचंद्रवेश्या

स्थिर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स·चिं· ६७

गमनं क्षितीशान्मानं स्त्रीसुतबंधुसौख्यं ॥७॥ निशाकरस्याप्यतिशत्रुराशिगतस्य दाये कलहार्थ
नाशं ॥ कुवस्त्रता कुत्सितभोजनं च सेवान्यदारात्मजतोथ यानं ॥८॥ पीतांबरांसंकरणादिहानि
विदेशयानं परिवारकत्वं ॥ देशांतरे भ्राम्यति बंधुहीनो दुःखं परिक्लिश्यति शत्रुदाये ॥९॥ मित्रर्क्षग
स्यापि निशाकरस्य पाकेऽर्थलाभं क्षितिपालमैत्रं ॥ उद्योगसिद्धिं नसवस्त्रसानं विद्यांवरान्नपानाः
वाप्तिसासं ॥१०॥ सुधाकरस्याप्यतिमित्रराशिगतस्य दाये त्वतिसौख्यमेति ॥ विद्याविनोदं कि
नरांगनृत्यं सेवार्थदारात्मजकामसानं ॥११॥ दशाविपाके समराशिगस्य कलाधरे कांचनभूमिः
सानं ॥ किंचित्सुखं बांधवरोगपीडा विदेशयानं लभते मनुष्यः ॥१२॥ नीचस्थितस्यापि निशाकरस्य
दुःखं परिग्रहणवनवासमुपैति काले ॥ कारागृहं निगडपादकष्टं क्लेशान्नहीनः स्वरमेहसुतः
दारदोषं ॥१३॥ क्षीणेंदुपाके सकलं विहीनं राज्यार्थभृत्यत्रकलत्रमित्रं ॥ उन्मादवित्तं स्वजने विरोध
मलिनमायातिकुशीलवत्वा ॥१४॥ पूर्णेंदुपाके परिपूर्णमेति विद्याविनोदं किनरांगनृत्यं ॥ स्त्रीपुत्रभृत्यः

राम· ६७

६८

CC-0. In Public Domain. Digitization by eGangotri

न्यार्थमनोविलासं विशेषतः शोभनकर्मलाभं ॥१५॥ केनापि खेटेन्द्रस्य वियच्चरेण युक्तस्य चंद्रस्य दशा
विपाके ॥ मनःप्रसादं मदनाभिरामं स्त्रीपुत्रभृत्यार्थविनोदमोक्षं ॥१६॥ पापान्वितस्यापि निशाकर
स्य पाकेऽग्निचौराग्निनृपालकोपैः ॥ दुःखं सुतस्त्रीसुतबंधुहानिं विदेशयानं त्वशुभादिकर्म ॥१७॥ चंद्र
स्य सौम्यग्रहसंयुतस्य प्राप्तौ दशायां शुभकर्मलाभं ॥ गोभूहिरण्यांबरभूषणानि तीर्थाभिषेकं पर
दारसौख्यं ॥१८॥ पापेक्षितस्यापि निशाकरस्य दशाविपाके विपत्संकुकर्म ॥ कोपाधिकं कुत्सितभोज
नेन मातुर्वियोगं त्वथवा नदीयं ॥१९॥ निशाकरस्यापि शुभेक्षितस्य परोपकारं महतीं च कीर्तिं ॥
इष्टार्थविध्वानमनूपमानं जलक्रियावस्त्रमनोविलासं ॥२०॥ मूर्त्तित्रिकोणोन्नेंदोर्दशाप्रपन्नो नरः
शोकःसुवक्रकोशः ॥ वकुपुत्रवान्वितनीतो बंधुविरोधेप्रधानतां याति ॥२१॥ सुखस्थितस्यापि निशाक
रस्य मातुर्वियोगं सुखयानभूमिं ॥ कृषेर्धनाप्तिं गृहकर्मलाभं कीर्तिः स्वनामांकितपद्यजालं ॥२२॥
दारान्वितस्यापि निशाकरस्य पाके कलत्राप्तिमुदाहरंति ॥ सुपुत्रसौख्यं शयनांबरं च प्रमेहमूत्रादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

+ पराजयं महोत्साहं ॥३

स.चिं. ६८ करं मनोरुजं ॥२३॥ कर्मस्थितस्यापि दशाप्रसन्ना चंद्रस्य कीर्तिं सुमतेषु विद्यां ॥ यज्ञादिकर्माप्तिमनेकसौ
ख्यं नृपत्रयानां वरवंशसौख्यं ॥२४॥ नीचांशकस्यापि दशा [illegible] ददाति रोगं महदन्तरं चेंदोः पापाहि
रोगपीडां पुरुषेषु ॥२५॥ उच्चांशकस्यापि दशा ददाति सौख्यं महदन्तरं चेंदोः ॥ नानाविधधनलाभं नृपतिसन्मा
नं देहपुष्टिं च ॥२६॥ चंद्रदशायामादौ नरपतिसन्मानकीर्तिसौख्यं च ॥ मध्ये स्त्रीसुतनाशं गृहधनसौख्यं
प ग्रैरं चांते ॥२७॥ षष्ठस्थचंद्रस्य दशाप्रपन्ना करोति दुःखं सकलं वियोगं ॥ चौराग्निनृपालभयं गदेन मृ
त्वादिकृच्छ्रं धननाशमाहुः ॥२८॥ रंध्रस्थितस्यापि दशाप्रपन्ना देहस्य कार्श्यं ज्वरभीतिदुःखं ॥ विदेशः
यानं सकलैर्विरोधं कुभोजनं मातृजनेषु नाशं ॥२९॥ रिःफस्थचंद्रदशायां संप्राप्नोमति नाशनं कु
रुते ॥ राज्ञो नृपधनभाग्यं स्थानविनाशं महत्स्य रंदुःखं ॥३०॥ चंद्रस्य वित्तस्थितपाककाले वित्ता
त्मजस्त्रीसुखभोगभाग्यं ॥ मिष्टान्नपानं रतिकेलिसौख्यं धनागमं पुत्यजलाभिषेकं ॥३१॥ तृतीय
राशिस्थनिशाकरस्य दशा महत्सौख्यमनेकवित्तं ॥ मनोहरं भ्रातृजनादिसौख्यं रूपान्नपानां वरम् राम. ६८

षणाप्नि:॥३२॥सा भस्थितस्यापि निशाकरस्य प्राप्नोदशायांविविधार्थलाभं॥मृदन्नपानांवरकेसिः
सोलं_ स्त्रीपुत्रसाभंतुमनोविलासं॥३३॥दिनेशरश्म्याहृतवंडदायेप्राप्नोतिदुःखस्वजनैर्विरोधं॥भा
यत्रिसियंभूपनपाप्निचौरैर्मतिविर्योगंकृषिधान्यनाशं॥३४॥चंडेस्थानवसाधिकेधनसुखंकीर्तिंविवि
धागमंदेवब्राह्मणतर्पणांनयधनान्याप्नोतिभूमीधनं॥स्त्रीरत्नांवरभूषणांकृषिधनंगोविक्रयंसे
वनंमिष्टान्नादिरसायनंफ्रसुतंदधाग्यमौल्यांवरं॥३५॥निशाकरेदिग्वलसंयुतेस्मिन्दि [illegible] गंनरा
दागतवस्तुमित्रं॥विशागमंभूपतिमित्रतोवस्ववंधुपूज्यंगजवाजिभूमिं॥३६॥चंडेतथाकालवसाः
न्वितेस्मिन्तुरंगयानंकृषिगोमहीश्च॥वाद्यादिदोषोघनिजकेसैदंतवमांविरासंकृतवाहनेव॥३८॥नि
सर्गवीर्यान्वितचंडदायेनिसर्गतिश्चापिकरोतिसौख्यं॥श्रयत्ननोवाहनदेहलाभंनपोसपूज्यंवङुः
वाहनेव॥३९॥चंडेयदादिग्वलवीर्ययुक्तेकृपाकदासेणनरेश्वरस्य॥समस्तभाग्यंसमुपैतिसौख्यं
५ निशाकरेस्थानवलैर्विहीनेस्थानार्थनाशंस्वपदच्युतिंच॥स्वबंधुनाशंत्व

वणिक्कोणं कवेलानां सुखं चैव लभेत ॥३०॥

परोपकारं च मनोभिलाषं ॥४०॥ क्रूरादिषष्ठ्यंशसमन्वितस्य स्नये शशांकस्य वदन्ति दुःखं ॥ स्त्रीपुत्रना
शं क्षितिपालकोपं विद्याविवादं कलहं जनेभ्य ॥४१॥ मृदंशषष्ठ्यंशसमन्वितस्य चंद्रस्य दाये बहुपुत्र
लाभं ॥ स्वार्थलाभं विजयं सुखं च कीर्त्तिं च विद्यां लभते सुखं च ॥४२॥ पारावतांशेशसमन्वितस्य चं
द्रस्य दाये महतीं च कीर्त्तिं ॥ विद्याविनोदं लभते च सौख्यं देवार्चनं पुत्रजलाभिषेकं ॥४३॥ क्रूरद्रे
ष्काणसंयुक्तचंद्रो दिशति रोगतां ॥ कार्यपापसमायुक्तं गोत्रालस्तानिपीडनं ॥४४॥ स्वादेशाच्च फः
संप्रोक्तं स्थानजं यत्नतः परं ॥ अंशोद्भवं फलं पश्चाद्दृग्जातफलं तथा ॥४५॥ इति चंद्रदशाफलं ॥ ॥
इति सर्वार्थचिंतामणौ त्रयोदशोऽध्यायः ॥ ॥ अथ भौमदशाफलं ॥ कुजस्य तुंगे दनदायकाले सैन्य
स्य लाभं समरे जयं च ॥ अधिपत्यमन्वेति नरेशमानं सहोदरस्त्रीसुतवान्विलासं ॥१॥ उच्चं गतस्यादि
दशा धरित्रीसुतस्य प्राप्नोति राज्यमथ वाक्षितिपाद्वित्तं ॥ मूलमध्यदारसुतबंधुसमागमं च यानादि
रोहणं विशेषविदेशयानं ॥२॥ आरोहिणी भूमिसुतस्य सौख्यं दशातनोत्यत्र नरेशपूज्यं ॥ प्रधान

CC-0. In Public Domain. Digitization by eGangotri

तां धैर्यमतोपि सापं भाग्योन्नतिं नो न नवाप्तिसंघं ॥३॥ धरासुतस्याप्यथ रोहकाले स्थानार्थनाशं कलि
कोपदुःखं ॥ विदेशवासं स्वजनैर्विरोधं चौराग्निभूपैर्भयमेति कष्टं ॥४॥ जीवस्थितस्यापि धरासुतस्य
दायेकुवृत्त्यास्वजनादिरक्षा ॥ कुभोजनं नो न नवाप्तिनाशं स्ववंधुनाशं नृपवह्निचौरैः ॥५॥ मन्दस्थि
कोणस्थितभौमदाये मिशान्नपानां वरभूषणाप्तिं ॥ पुराणधर्मश्रवणं मनोज्ञं भ्राताद्विसौख्यं कृषिः
साम्प्रमेति ॥६॥ स्वक्षेत्रगस्यापि धरासुतस्य दशाविपाके सुमतेर्थभूमिं ॥ स्थानाधिपत्यं सुखवाहन
वनामदर्यं भ्रातृसुखं सुखाप्तिं ॥७॥ धरासुतस्याप्यतिशत्रुराशिगतस्य दाये कलहादिदुःखं ॥ नरेश
वंशस्वजनैर्विरोधं भृत्यार्थदारात्मजमित्रनेहं ॥८॥ भूनंदनस्याप्यरिराशिगस्य दशाविपाके समरे
वधोद्यं ॥ शोकाग्निभूपालविषैः प्रमादं धीजात्विंगिकुमुदादिदुदाक्षिरोगं ॥९॥ मित्रर्क्षगस्यापि कुजस्यदा
ये मित्रत्वमायाति सपत्नसंघैः ॥ चौराग्निमांद्यक्षितिपादभूमिं कृषेर्विनाशं कलिकोपदुःखं ॥१०॥
कुजस्य दाये त्वतिमित्रराशिगतस्य भूपालकृतार्थभूमिं ॥ वस्त्रान्नयानादिविवाहदीक्षामुपैति देशां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सं.वि.
७०

नरसत्वमान्यं ॥११॥ धरासुतस्यापि समर्क्षगस्य गृहे पकार्यं त्वशनं प्रमादात् ॥ स्त्रीपुत्रजन्यात्मसमोदराणां
शत्रुत्वमाप्नोति नृपाग्निपीडां ॥१२॥ नीचग्रहेणापि समन्वितस्य धरासुतस्याति मनोविकारं ॥ क्षेपत्वदृत्तिं
परकीयमन्नं स्त्रीपुत्रनाशं नृपवह्निचौरैः ॥१३॥ किंचित्सुखं भोजनवस्त्रयानं कष्टेण दत्तिं नृपपूजनं च
॥ उच्चान्वितस्यापि समन्वितस्य भौमस्य दायेषु तदारपीडां ॥१४॥ पापान्वितस्यापि कुजस्य दाये किंचित्सुखं
देहकृशां गरोगं ॥ भूमेर्विवादं समरेण चैव विद्याविवादं परदेशवासं ॥१६॥ शुभेक्षितधरासूनोर्दायेम
न्यर्थनाशनं ॥ तस्मिन्गोचरसंस्थे च तत्वं तं शोभनं भवेत् ॥१७॥ स्वारस्य पापग्रहवीक्षितस्य प्राप्नोदशाः
यावद्दुःखकष्टं ॥ जनैः परित्यक्तकलत्रमित्रो देशांतरस्थः क्षितिपालकोपात् ॥१८॥ केंद्रगतभौमदा
येचौरविषाभ्यामुपैति दुःखानि ॥ कलहो नाम विरोधं लभते देशांतरं यायात् ॥१९॥ चतुर्थराशिस्थि
तभौमदायेस्थानच्युतिर्बन्धुविरोधता च ॥ चौराग्निपीडां नृपतेः सकाशाद्गीतिं परां दुर्गपथं प्रयाति ॥ राम.
२०॥ कलत्रपुत्रस्य कुजस्य दाये कलत्रहानिं उदरव्रणं च ॥ भ्रातावरस्थस्य न नादशं फलं तदन्यथा वे ७०

80
६०

CC-0. In Public Domain. Digitization by eGangotri

त्वं समन्यथैव ॥२१॥ कर्मस्थितस्यापि कुजस्य दायेकर्मादिवैकल्यमुपैति दुःखं ॥ उद्योगभंगं त्वपकीर्त्ति
मेति विद्यासुतस्त्रीधनमानहानिः ॥२२॥ स्वर्क्षगभौमदशायां दधाति शोकं स्त्रियाविरोधं च ॥ राज्यमु
तो विपत्तादि देशदेशांतरं याति ॥२३॥ वित्तगभौमदशायां संप्राप्तौ सस्यवृद्धिमुपयाति ॥ स्वकुलाद्य
त्वं सम्मतेन वहन विनं मुखाक्षिरोगं च ॥२४॥ भ्रातृस्थानगतस्य सौख्यफलदो नंदनोराति हा धैर्यं
वित्तसुतार्थदारसहजैः संगं नृपात्प्राप्यतां ॥ पुत्रस्थानगतस्य पुत्रमरणं बुद्धिभ्रमं ज्ञाद्यनाशं बुत्रे नेत्र
गत ~~स्थभूमिसहजैः संगं नृपात्प्राप्यतां ॥ पुत्रस्थानगतस्य पुत्रमरणं बुद्धिभ्रमं ज्ञाद्यनाशं बुत्रेत्र~~
स्यभूमिसहजैर्दुःखं महारोगभाक् ॥२५॥ पंचमस्थधरासूनोर्दायि कीर्त्तिविविक्तता ॥ नेत्ररोगं त्वर्थ
नाशं दद्यात्कलहमेव वा ॥२६॥ मरणपदस्थो भौमः करोति दुःखं महद्भयं पाके ॥ सोदकमन्नविरोधं
स्थानविनाशं विदेशयानं च ॥२७॥ नवमस्थधरासूनोर्दशाकाले पदच्युतिं ॥ गुरूणां वनथा कष्टं तपो
विघ्नं महद्भयं ॥२८॥ आयस्थभौमदायेकरोति राज्यार्थभूपसन्मानं ॥ समरे जयप्रतापं वाशुपकारं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स०वि०
७१

मनोजभयं कांतिं ॥२९॥ व्ययगत भौमदशायां संप्राप्नो धनहृतिं नृपाग्नीतिं ॥ स्थानसुतदारनाशं भ्रातृणां
विदेशवासं च ॥३०॥ उच्चांशसंयुक्तधरात्मजकाले मनोज्ञिसौख्यं विजयं सुखं च ॥ एवं तदासीगमनं नृपस्य
प्रयाति तोयादिसुखं न यवर्ग्यं ॥३१॥ नीचांशभौमदायेनीचयुते भ्रातृकर्मवैकल्यं ॥ धनहृति नृपतिदंडा
:शिश्नोदरपरायणो शीलः ॥३२॥ भौमपशात्रमेहृदासजनतेविविधार्थमानहानिं च ॥ मध्येन्निनृपवै
रैर्भीतिं न च विविदिक्षिन्मतिमान् ॥३३॥ स्वं स्वे भ्रातृवियोगं सुतधनः दाराग्निउस्मवृद्धादि ॥ वामे यव
नृपवेक्षोवरसुके विशेषतः कथयेत् ॥३४॥ भौमस्य संस्थानवशान्नितस्य दशाविपाकेर्थ कलत्रसौख्यं
॥ स्थानादिसाम्यं सुखकीर्तिशौर्यं सुघोगमर्थं तनयाद्युपैति ॥३५॥ स्थानवीर्यविहीनस्य कुजस्तेस्वप
दच्युतिं ॥ कुजः कुशीलश्च त्याव जीवनं भवति ध्रुवं ॥३६॥ दिग्वीर्ययुक्तस्य कुजस्य काले नपान्सुसद्वा
र्थरागं प्रतापं ॥ गोभूमिकृष्यं वरयानसाम्यं दिगंतराक्रांतयशः प्रतापं ॥३७॥ कालात्तवीर्यसुत भौमः
दशायां कामलब्धिरपि सौख्यमुपैति ॥ पट्टवस्त्रमणिमौक्तिकलाभं चित्रवस्त्रदधिगो गजलाभं ॥३८॥

राम०
७१
७१

CC-0. In Public Domain. Digitization by eGangotri

निसर्गवीर्यान्वित भौमदाये कृपाकटाक्षेण महीपतीनां ।। समस्तभाग्यात्मजमित्रबंधुगोभूमिभूषां
वरगेहसौख्यं ।।३९।। निसर्गतः स्थानधनाग्निनाशं पित्ताधिकं कुत्सितभोजनं च ।। कुजस्य दाये कुनखं
पितृघ्नं सहोदराणाम पिदेहपीडा ।।४०।। वक्रान्वितस्य भौमस्य दशा कालेमहद्भयं ।। चौराग्निसर्पपीडां
च वनयानमुपद्रुतिं ।।४१।। दृग्वीर्ययुक्तान्वित भौमदाये कृपाकटाक्षेण महीपतीनां ।। समस्तभाग्यात्म
जमित्रबंधुगोभूमिभूषां वरगेहसौख्यं ।।४२।। क्रूरषड्वर्गकयुत भौमदायेतिपीडनं ।। कारागृह
प्रवेशं च समस्तविभवक्षयं ।।४३।। सौम्यषड्वंशसंयुक्त भौमदाये शुभं भवेत् ।। विवाहदीक्षाय
ज्ञं च सर्वे बान्धुपकारकं ।।४४।। पारावतादिसंयुक्त भौमदाये महत्सुखं ।। भूम्यर्थदारसंपत्तिधन
वाहनभोजनं ।।४५।। क्रूरद्रेष्काणसंयुक्त कुजदाये मनोव्यथा ।। निगडं विषभीतिं च पाशवंधनमेव
वा ।।४६।। नत्वा केपुत्रमरणं नपवह्निविषाद्भयं ।। ।। भूमिपुत्रोपि नीचस्थः सोच्चभागसमन्वितः ।।
तत्त्याके भूमिदारार्थ पुत्रमित्रविवर्द्धनं ।।४७।। इति कुजदशा ।। ।। अथ बुधदशाफलं ।। ।। स्वसुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स.वि.
७२
ब्रसोमात्मजदायकाले धनान्वितः ख्यातिसुचेतिसौख्यं ॥ ज्ञानं च कीर्त्तिं जननायकत्वं स्त्रीपुत्रभूम्यर्थम
होत्सवं च ॥१॥ उच्चस्थितस्यापि शशांकसूनोर्दशामहत्वं कुरुतेर्थसौख्यं ॥ देहस्य पुष्टिर्धनधान्यपुत्रगो
वाजिमत्तेभमदंगनादं ॥२॥ आरोहिणीसौम्यदशाप्रसन्नाय ज्ञोत्सवं गोवृषवाजिसंघं ॥ मदन्नद्धबांव
रयानलाभं वाणिज्यभूम्यर्थपरोपकारं ॥३॥ शशांकसूनोस्त्ववरोहिणीयादशा महत्कष्टतरं च दुःखं ॥
विज्ञानहीनं परदारसंगं नृपाग्निचौरैर्भयमत्रकथ्यं ॥४॥ नीचस्थचंद्रात्मजदायकाले ज्ञानं च मानं स्व
जनैर्विमुक्तं ॥ पदच्युतिर्बंधुवियोगता च विदेशयानं वनवासदुःखं ॥५॥ मूलत्रिकोणान्वितसौम्य
दाये राज्यं महत्सौख्यकरं च कीर्त्तिं ॥ विद्याविलासं त्विनमांतशीलं पुराणधर्मश्रवणादियुक्तः ॥६॥
स्वसेत्रगस्यापि शशांकसूनोः प्राप्तौ दशायां धनधान्यसंपत् ॥ वाणिज्यगोभूमिसुतार्थदारमह
त्वपानांबरभूषणाप्तिः ॥७॥ शशांकसूनोरतिशत्रुराशिगतस्य पाके विपदं च दुःखं ॥ उद्योगनष्टंगं स्व
जनैर्विरोधं यशादिविध्वंसमकर्मनाशं ॥८॥ शशांकसूनोस्त्वरिराशिगस्य शत्रोर्भयं भूपतिकोपजाः
राम.
७२
१२
७२

तं॥विद्याविहीनं कृशहीनसत्त्वं कुभोजनं दारसुतार्थनाशं॥९॥मित्रक्षेत्रदशायां शशांकसूनोर्धनाप्
तिं सौख्यं॥नामद्वयं संप्राप्नुवन्नामांकितगद्यपद्यानि॥१०॥अतिमित्रराशिगतस्य दशाप्रपन्ना महत्त्व
तां याति॥नृपमैत्रं सौख्यधनं सुततदारांश्च बंधुसन्मानं॥११॥समर्क्षगतस्यापि शशांकसूनोर्दशासु खेधा
न्यसुतां वराप्तिः॥करोति राज्यश्रुतिमन्त्रविघ्नं विज्ञानहीनं पिटकादिरोगं॥१२॥नीचखेचरसंयुक्तसौ
म्यदायेतिकष्टतां॥पदभ्रंशं बंधुनाशं कर्मनाशं मनोरुजं॥१३॥उच्चखेचरसंयुक्तसौम्यदाये महत्सु
खं॥प्राप्नोत्तरं सुविद्यां च वाणिज्यं नो कृषिक्रिया॥१४॥विदः पापान्वितस्यापि दाये पापमुपैति च
॥स्वेत्रार्थदारसुतादिकृषिनोऽपि नाशनं॥१५॥विदः सौम्ययुतस्यापि परिपाके महत्सुखं॥राज
योगं सुखं कीर्त्तिं दारपुत्रधनाप्तसुखं॥१६॥सौम्येक्षितस्यापि शशांकसूनोर्दशाविपाके महतीं च की
र्त्तिम्॥विद्याविलासोद्भवराजपूज्यं कांतिप्रतापं यशसा समेतं॥१७॥पापेक्षितस्यापि शशांकसूनो
र्धान्यनाशं स्वयं बंधुजनैर्वियुक्तं॥विदेशयानं स्वपदच्युतिं वा क्लेशानुबन्धात्कलहोग्रदुःखं॥१८॥केंद्रेन

तस्य हिदशा शशिनंदनस्य नृपालमित्रधनधान्यकलत्रपुत्रान् ॥ यत्नादिकर्मनिचयमानयशः प्रसिद्धिं म
स॰चिं॰ ७३ दन्नपानांवरभूषणानि ॥१९॥ तत्रैव तस्य हिदशा जननायकत्वं नृपालभूमिनयनं कृषिसत्वमान्यं
॥ मैत्रीरवादिपरिघोषितयानमार्गं तीर्थाप्तिरेकमथवाजगतित्रसिद्धं ॥२०॥ वित्तनर्त्तसौम्यदशायां
विद्याप्तिमहत्वकीर्त्तिं च ॥ नृपतिभाग्यसमाजो राज्यस्थानेप्रधानतां याति ॥२१॥ तृतीयराशिस्थित
चंद्रसूनोर्दशाविपाके जउतां समेति ॥ उन्मानमाजीवनउत्सरोगं. प्राप्नोति योगेन पमाननं च ॥२२॥
शशांकसूनोर्हिबुकस्थितस्य दशाप्रपन्नान्नृपभूमिनाशं ॥ सौख्यादिहीनं हिबुकेशमत्युसुयोगभंगं
यपदस्तुतिं वा ॥२३॥ पंचमस्य शशिनंदनस्य वाक्क्रूरबुद्धिरतिकष्टता भवेत् ॥ हीनवृत्तिरपि राजसेव
याकृतु सत्वधनमेति संपदं ॥२४॥ षष्टमांशस्थितसौम्यदाये त्वन्दोषजातं वक्रुरोगमेति ॥ विचर्चिका
पैत्तिकपांडुरोगं नृपाग्निचौरैर्भरणं कृशत्वं ॥२५॥ देहांगवैकल्यकलत्रवंधुविद्वेषणां नृपतिदत्तको
पं ॥ आकस्मिकं मृत्युभयं प्रमादं रिःफस्थितस्यापि शशांकसूनोः ॥२६॥ दारास्थितस्यापि शशांकसूनो शम॰ ७३

७३

७३

दशाविशेषेसुतदारवित्तं॥विद्याविनोदंविमलांबरंच नामद्वयंभूपतिमैत्रतांच॥२७॥भाग्यस्थितः
स्यापिशशांकसूनोर्भाग्योत्तरंदारसुतार्थलाभं॥तीर्थाभिषेकंजपहोमदानंयज्ञादिकर्मासिमतेमनुः
ष्यः॥२८॥कर्मस्थितस्यापिशशांकसूनोर्दशाविपाकेनमनुष्यमेति॥सौख्यस्यनामांकितभाग्यपद्य
स्वनामदारश्चसुतार्थलाभं॥२९॥वधूजनंदेवमहीसुरात्तां साम्राज्यलाभंजननायकत्वं॥कवित्व
मार्गस्तुपैतिकाले यज्ञादिदीक्षास्वजनैर्विशिष्टात्॥३०॥उपांत्यराशिस्थितसौम्यदाये स्वनेकधा
वित्तमुपैतिकाले॥दानेनवाभूपतिमाननाशाकृषेश्चवाणिज्यविचारतोवा॥३१॥उच्चांशसंयुक्त
शशांकसूनोर्दशाविशेषेसुतभूषणाप्तिः॥मनोविलासंमदनाभिराममुत्साहशौर्यंचजलाभिषेकं
॥३२॥नीचांशयुतसौम्यस्य नीचकृत्यानुजीवनं॥खेष्वेत्वंपरिहारंच दशायांवकरोतितत्॥३३॥
सौम्यदशायामादौसमतेधनधान्यसंपदंपुरुषः॥स्वांत्येस्वजनविरोधंमध्येदायेनरेशसन्मानं
॥३४॥श्वर्कगसौम्यदशायांसमंतेविविधापदंमनोदुःखं॥स्वकुलजनपविरोधंनिंदांभयंचापि

स·पिं·
७४

रोगं च ॥३५॥ स्थानवीर्ययुते सौम्ये तस्याके कीर्त्तिरापदं ॥ मनो धैर्यं मनोत्साहं यन्नादीनाशुभप्रियं ॥३६॥
नष्टहीने बुधे स्थान दारपुत्रमहद्भयं ॥ विदेशवासं दुःखं च नानापरिभवक्रिया ॥३७॥ दिग्वीर्यसहिते
सौम्ये देशांताद्धनिकः सुधीः ॥ सामंतराजमैत्रत्वं गंधमाल्यसेवनं ॥३८॥ कालवीर्ययुत सौम्य दशां
यां देहसौख्यकलहादिवियोगं ॥ दारपुत्रनदमातनमेति गांगतोयकृतसेकतनुः स्यात् ॥३९॥ नि
सर्गवीर्यान्वित सौम्य दाये निसर्गनृपाद्विभुमादिकर्म ॥ विद्याविवादं स्वजनैर्विरोधं मातुर्वियोगं
तथवानदीयं ॥४०॥ वक्रचेष्टान्विते सौम्ये आन्यदारसुतार्थभाक् ॥ पुराणादानादिनदीसमुद्रस्नान
माचरेत् ॥४१॥ दग्धस्थेन युते सौम्ये सर्वभूतेषु सौम्यतां ॥ करोति रतिकेलिं च राजभाग्यसमन्वितां
॥४२॥ क्रूरषष्ट्यंश सौम्यस्य दशाकाले महद्भयं ॥ चौराग्निनृपैर्भीतिः स्यात् शुभदृग्योगवर्जिते ॥४३॥
मृदंशादियुते सौम्ये राज्यलाभं महत्सुखं ॥ मार्दवं सर्वभूतेषु कृषिपुत्रार्थसंपदं ॥४४॥ सौम्ये वैशे
षिकांशस्थे विशेषाद्राजपूज्यतां ॥ सुगंधांबरमाल्यं च विद्यागोष्ठिरहस्यतां ॥४५॥ क्रूरद्रेष्काणसंयु

राम·
७४
८५
७४

CC-0. In Public Domain. Digitization by eGangotri

क्लेशं ऽस्त्वनुर्यदा तदा॥ चौराग्निभूपतिभयं स्थाननाशं महद्भयं॥४६॥ उच्चराशिगतः सौम्यो नीचभाग
गतो यदि॥ राज्यं सुखं महत्कीर्त्तिं विनाशयति तत्क्षणात्॥४७॥ चंद्रात्मजोपि नीचस्थः स्वोच्चभागसम
न्वितः॥ अशुभं फलमादौ तु शुभमंते प्रयच्छति॥४८॥ इति बुधदशा॥ ॥अथ गुरुदशा॥ ॥गुरोर्द
शायां परमोच्चगस्य राज्यं महत्सौख्यमुपैति कीर्त्तिं॥ मनोविलासं गजवाजिसंघं नृपाभिषेकं स्वकुला
धिपत्यं॥१॥ कुलीरगस्यापि गुरोर्दशायां भाग्योन्नतं नृपतिमाननादा॥ विदेशयानं महदाधिपत्यं
सुत्रेपरे क्लिन्नतनुर्मनुष्यः॥२॥ आरोहिणीदेवगुरोर्महत्वं दशाप्रपन्नाकुरुतेऽर्थभूमिं॥ ज्ञानक्रि
यास्त्रीसुतपोजपस्य स्ववीर्यतो प्राप्तयशःप्रतापं॥३॥ जीवदशायामारोहिण्यां मंडलाधिनाथो वा
॥द्विजनृपात्सुधनो मेधावी कांतिमान्विनीतश्च॥४॥ देवेंद्रपूज्यस्य दशावरोहा करोति सौख्यंस
कलदेवनाशः॥ सकृद्यशः कांतिविशेषजासं नरेश्वरत्वं सकदेवयाति॥५॥ अतिनीचभागभाजो गुरो + उरोः
दशायां प्रजनन्नहृच्चं नः॥ अन्योन्यहृदयवैरं कृषिनाशं याति परभृत्यः॥६॥ नृसत्रिकोणनिजस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स·सिं·
७५

दशायां राज्यार्थभूमिसुतदारविशेषसौख्यं ॥ यानाधिरोहणमपि स्ववशोन्नरत्वं यज्ञादिकर्मजनभूमित
पादपीठं ॥७॥ गुरोर्दशायां स्वगृहं गतस्य राज्ञोर्थभूषाम्बरसुखं वरं च ॥ मिष्टान्नदेवाजिमनोविलास
कीर्त्यादिगुणागमवेदशास्त्रं ॥८॥ गुरोर्दशायामतिशत्रुराशिगतस्य दुःखं समुपैति शोकं ॥ विवादभूस्य
र्थकलत्रनाशं नृपाग्निचौरैर्बहुदुःखबीजं ॥९॥ गुरोर्दशायामरिराशिगस्य सेवादिवित्तं शयनं
वरं च ॥ नरेशसन्मानमुपैति नित्यं स्त्रीपुत्रभृत्याप्तसहोदरार्त्तिं ॥१०॥ ज्ञाप्तौ दशायामतिमित्रराशि
गतस्य जीवस्य नरेंद्रपूज्यं ॥ मृदंगभेरीरवयानघोषं दिगंतराक्रांतसमस्तभाग्यं ॥११॥ मित्रक्षेत्रगतस्या
पि गुरोर्दशायां नरेशमैत्रीं समुपैति कीर्त्तिम् ॥ विद्याविवादे जयमन्नसौख्यं सुगंधभृद्वस्त्रपरोपका
रं ॥१२॥ समक्षेत्रगतस्यापि गुरोर्दशायां मान्यं च भूमीपतिदत्तभाग्यं ॥ कृष्यर्थगोभूमिमनोविलास
पीनां वरालंकृतभूषणाप्तिं ॥१३॥ नीचखेचरसंयुक्त जीवदाये मनोरुजं ॥ परद्वेषोपवादं च गुर्वा राम·
णामपि रोधता ॥१४॥ उच्चखेचरसंयुक्त गुरुदाये महत्सुखं ॥ अनेकगोतुरादीनां निर्मलानां पदः ७५

85

७५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धैर्यं॥ कविधर्मः जयविधानसौख्यं कविधनं मानसुखैश्चितैश्च॥ ८॥ अथ शनिस्तस्यापि गुरोर्दशायां देयान्नैपुण्य कवयैक्ति ८

ज्यतां ॥१५॥ पापान्वितस्यापि गुरोर्दशायां करोति पापे हृदयांतरस्थं ॥ न्दरं वहिः पुण्यफलं विशेषान्नृ-
मर्थदारात्मजमेति सौख्यं ॥१६॥ शुभान्वितस्यापि गुरोर्दशायां नरेशयानं मृदु संवरं च ॥ दानेन वि-
त्तं नृपमाननाद्य यज्ञादि सन्मानविशेषलाभं ॥१७॥ पापेक्षितस्यापि गुरोर्दशायां आप्तं सुखं किं वि-
दुषैति कोपात् ॥ देवार्चनं भूसुरतर्पणं च तीर्थाभिषेकं गुरुपूज्यतां च ॥१८॥ केंद्रगतजीवदाये राज्यं
भूदाररात्न सन्मानं ॥ विविधसुखानंदकरं बहुजनरसां प्रधानतां याति ॥२०॥ सत्रंगतस्य हि दशा
पुरुषं करोति जीवस्य सौख्यममलां वरभूषणानि ॥ यानादिरोहणानन्दनपण्यरवैश्च मत्तेभवाजि-
भटसंघयुतः करोति ॥२१॥ चतुर्थकेंद्रस्थितजीवदाये यानत्रयं भूपतिमित्रलाभं ॥ भूपालयोने
यदि भूपतित्वं नो चेत्तथा तत्सदृशं करोति ॥२२॥ कलत्रराशिस्थितजीवदाये दारार्थपुत्रार्थसुखं
प्रयाति ॥ विदेशयानं समरे जयं च धानं परबलात्पुण्यकर्म ॥२३॥ कर्मस्थितस्यापि गुरोर्वि-
पाके राज्याप्तिमात्मतुनियसत्तदानी ॥ भूपालयोने त्वथ वार्थपुत्रकलत्रसत्कर्मसुराजयोग्यं ॥२४॥

CC-0. In Public Domain. Digitization by eGangotri

त्रिकोणसंस्थस्य गुरोर्दशायां स्त्रीपुत्रधान्यार्थविवेकवृद्धिं ॥ मृष्टान्नपानांवरबंधुवस्त्रयानादिलाभं न
वमेशसौख्यं ॥२५॥ पंचमस्थगुरोर्दाये मंत्रोवस्त्रमहत्सुखं ॥ सुतात्पिंराजपूज्यं च वेदांतश्रवणादिकं ॥२६
॥ उच्चांशसंयुक्तगुरोर्दशायां नान्योत्तरं राजसमाजमेति ॥ प्रवासखुक्तामणिरत्नलाभं सर्वेषु सख्यं स
मुपैति सौख्यं ॥२७॥ नीचांशसंयुक्तगुरोर्विपाके भूपालयंत्रसमविचर्चिकादीन् ॥ स्थानच्युतिं बंधुविरो
धतां च नपान्निचौरैः स्वकुलोद्भवश्च ॥२८॥ अर्कनजीवदशायां सहलोभतनिवेन्नीलां ॥ दुर्हूनिरोग
तप्तोडुःशीलत्वं भ्रमन्न संसारं ॥२९॥ स्वादौ गुरुदशाकालेन्त पस्वगं महत्सुखं ॥ मध्ये स्त्रीपुत्रलाभा
दिवांतेकष्टं विनिर्दिशेत् ॥३०॥ धनस्थितस्य पितुरो विपाके धनायतिं माननंदं ॥ विद्याविवादं किः
तराजतोष्टिं सर्वोपकारं विजयं सुखं च ॥३१॥ तपस्कुतवञ्जमानं भ्रातृभिर्भूमिलाभं परसुतविधनैर्वा
दत्तगोभूमिवित्तं ॥ अशनवसनभूषाणां धमाल्यां वरालि परकृतमुपकारं वृद्धितामेति शांत्यै ॥३२॥
त्तीयस्थगुरोर्दाये भ्रातृणांचसुखं धनं ॥ नपानाद्धनं सौख्यं गंधमाल्यांवरादिकं ॥३३॥ नीरोगता

+भूपतिः४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पुत्रकलत्रलाभं सन्मानाद्रिपुस्थस्य गुरोर्दशायां ॥ आदौ भवेदेवमथांत्यपाके दारार्थचौरादिभयं सरोगं
॥३४॥ नीचो मरणपदस्थः करोति सौख्यं बंधुजनहानिं ॥ स्थानच्युतिं विदिशं प्राप्ते स्त्रीपुत्रराजसन्माने ॥
३५॥ लाभगजीवदशायां संप्राप्नोति राज्यलाभमुपयाति ॥ वक्रार्थदारपुत्राद्युपविरोधं स्वबंधुविद्वेषं ॥३६
॥ व्ययगतजीवदशायां प्राप्नोति वाहनादिसमुपयाति ॥ लभते विदेशयानं नानाक्लेशैश्च परिभूतः ॥३७
॥ पाकेस्थानबलान्वितस्य च गुरोः क्षेत्रार्थदारात्मजान् संप्राप्नोति गजाश्ववस्त्रकनकं वित्रांबराभूषणं ॥ दि
ग्वीर्यान्वितदेवनायकगुरौ लोके प्रसिद्धिं तथा जीवे कासवलाधिके नृपवधूसन्मानतां याति सः ॥३८॥
निसर्गवीर्यान्वितजीवदाये निसर्गनिष्ठाप्तिं स्वं महत्वं ॥ विद्याविलासं रतिकेलिसौख्यं भागीरथीतोय
कृताभिषेकं ॥३९॥ वक्रंगतस्यापि गुरोर्दशायां महार्थतां याति सुतार्थदारान् ॥ सुखेजयं भूपतिमि
त्रतां वसुगंधयानां वरवाग्विलासं ॥४०॥ दृग्वीर्ययुक्तस्य गुरोर्विपाके कृपाकटाक्षेण महीपतीनां ॥ स
मस्तभाग्यं समुपैति वित्तं देशांतरे भ्राम्यति किंचिदेव ॥४१॥ क्रूरषष्ट्यंशसंयुक्तगुरोर्दायेतिकष्टतां ॥

+सुष

स.चिं. ७७

राजकोपापमानादीन् लभते नात्र संशयः ॥४२॥ सौम्यवर्गांशसंयुक्तगुरोर्दायेति सौख्यतां ॥ वाहनं वं
धुसन्मानं यज्ञवैवाहिकं शुभं ॥४३॥ पारावतांशसंयुक्तस्य गुरोर्दाये महत्सुखं ॥ मृष्टान्नपानवस्त्रं च हेम
विक्रयभूषणं ॥४४॥ पाशद्रेक्काणसंयुक्तस्य गुरोर्दाये च बंधनं ॥ कारागृहप्रवेशं च निगडं दारविग्रहं ॥
४५॥ उच्चस्थेपि गुरौ नीच राश्यंशकसमन्विते ॥ महाभाग्येनु संप्राप्ते नत्क्षणादेव नश्यति ॥४६॥ नीच
स्थे देवपूज्येपि स्वोच्चांशकसमन्विते ॥ भाग्यस्य येनु संप्राप्ते भाग्यं याति नदा नरः ॥४७॥ इति गुरुदशा ॥
॥ ॥ अथ शुक्रदशा ॥ ॥ स्वतुंगस्थभृगुर्दशायां मंत्रविलाससुप्रियार्थभोगी स्यात् ॥ मास्याच्छादनभोजन
शयनस्त्रीपुत्रधनयुक्तः ॥१॥ स्वोच्चस्थितस्यापि भृगोर्दशायां स्त्रीसंगनष्टार्थविरुद्धधर्मे ॥ पित्रोर्वि
नाशं समुपैति दुःखं शिरोरुजं भूपतिमानं च ॥२॥ आरोहिणीशुक्रदशा उपन्नाधान्यांवरालंकृ
तकांति पुण्यं ॥ ब्रदन्ति सिद्धिं स्वजनैर्विरोधं मात्रादि नाशं परदारसंगं ॥३॥ भृगोः सुतस्याप्यवरोह
काले प्रवृत्तेऽवेश्यागमनं धनाप्तिं ॥ स्त्रीपुत्रबंधत्तिमनोविकारं हृत्स्य सरोगं मदनार्तिमिति ॥४॥ उच्चे

राम. ७७

४१

७८

नरो न तप्तः कर्मसु विफलेषु सर्वदाभिरतः॥ अतिनीचगस्य दाये शुक्रस्यान्यार्थदारपुत्रार्त्तिः॥५॥ भू
सुतिको ण भाजो भृगोर्दशायां महाधिपत्यं स्यात्॥ क्रयविक्रयकुशलो धनवान्कीर्त्यन्वितो विधिज्ञश्च
॥६॥ शुक्रः स्वक्षेत्रदशायां लभते स्त्रीपुत्रधनशौर्यं॥ नित्यो त्साहं देवं परोपकारं महत्त्वं च॥७॥ भृगो
र्दशायामतिशत्रुराशिगतस्य पुत्रार्थदारहानिः स्यात्॥ नृपतिरोषं कुरुते मन्त्रविलासार्थपापकर्मा
णि॥९॥ मित्रक्षेत्रदशायां परोपकारी कलाकलाविधिज्ञं च॥ पुरारामकृषिः स्यादेवमनुष्ये श्वराः
कृतार्थश्च॥१०॥ अति मित्रशुक्रदाये नृपति सम्मानसौख्यं च॥ गोधनवाजिसमेतं गजगणतसंघैः स
मस्तसंघैश्च॥११॥ समभे गतस्यापि भृगोर्विपाके प्रमेहगुल्मादिगुदप्ररोगः॥ किंचित्सुखं भूपतिव
द्भिवैरैर्भयं स्वनामांकितनव्यपद्यं॥१२॥ नीचखेचरसंयुक्ते भृगोर्दाये महद्भयं॥ अपवादकृतं दो
षं लभते पापकर्मभिः॥१३॥ स्वोच्चस्थितेन सहितस्य भृगोर्विपाके राज्यं महत्त्वममराधिपतित्व
मेव॥ देवांगवरादिमालिभवलायानलाभं मेरीमृदंगपणवारववाद्यघोषैः॥१४॥ पापान्वितः

७ कलत्रहानिं॥ प्रभग्नसंसारविशीलदेहं गुल्मादिरोगं ग्रहणीप्रकोपं॥८॥ श[illegible] दशायां [illegible] ७

CC-0. In Public Domain. Digitization by eGangotri

स॰वि॰
७८

स्यापि भृगोर्दशायां स्थानच्युतिं बंधुजनैर्विरोधं ॥ आचारहीनं कलहप्रियत्वं रूपार्थनम्यात्मजदारना
शं ॥१५॥ शुभान्वितस्यापि भृगोर्दशायां सौभाग्यमित्रात्मजधान्यलाभं ॥ नरेशसन्मंगजवाजिसंघंवा
स्त्रमुक्तामतियानलाभं ॥१६॥ पापेक्षितस्यापि भृगोर्दशायां मानार्थहानिं समुपैति दुःखं ॥ स्त्रियाविरो
रोधं स्वपदच्युतिंच विदेशवासं निजकर्महीनं ॥१७॥ शुभेक्षितस्यापि भृगोर्विपाके धनायतिं भूपति
पूजनं च ॥ जनाधिपत्वं स्वशरीरकांतिं कलत्रमित्रात्मजसौख्यमेति ॥१८॥ केंद्रेगतस्य हि दशाभृः
गुनंदनस्य यानां वरादिमतिभूषितदेहकांतिं ॥ राज्यार्थभूमि कृषिवाहनपट्टवस्त्रदुर्गाधियान
वनवासजलाभिषेकं ॥१९॥ लग्नगशुक्रदशायां संप्राप्त राजमाननं लभते ॥ मतिधनगोकृषिलाभं
परापवादं मनोत्साहं ॥२०॥ चतुर्थराशिस्थितशुक्रदाये राज्यं महत्सौख्यमुपैति यानं ॥ कृषिक्रिया
वित्तपशुप्रजानां वृद्धिं व्रतापान्वितकीर्तिलाभं ॥२१॥ ~~चतुर्थराशिस्थितशुक्रदाये राज्यं महत्सौख्य~~
~~मुपैति यानं~~ ॥ कलत्रराशिस्थितशुक्रदाये कलत्रनाशं त्वथवा विदेशं ॥ प्रमेहगुल्मानिलरोगजालं राम॰
७८
६८
७८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रसन्नवित्तात्मजबंधुराज्यं ॥२२॥ कर्मस्थशुक्रस्य दशाविपाके यज्ञादिकर्मार्थनरेशपूज्यं ॥ भाग्यांत
रेयासितदेहकांतिं दिनंतराधाप्ययशः प्रतापं ॥२३॥ त्रिकोणसंयुक्तभृगोर्विपाके विद्याधनप्राप्तिन
रेशपूज्यं ॥ प्रवासशुक्तामणिशंखमुक्तिगोभूमियानांबरवस्त्रलाभं ॥२४॥ पंचमस्थे भृगोर्दयेपु
त्रावाप्तिं विनिर्दिशेत् ॥ कीर्तिं चिराज्ञपूज्यं वसवैर्वामुपकारतां ॥२५॥ त्रित्रिकोणनतः शुक्रः करोति
नृपपूज्यतां ॥ यज्ञकर्मादिलाभं च गुरुपित्रोः सुखं यशः ॥२६॥ वित्तगः
शुक्रदशायां धनहानिमाहुर्धनायतिं वापि ॥ स्वन्नसुखवाग्विलासं परोपकारं नरेशसम्मानं ॥२७
॥ तृतीयराशिस्थितशुक्रदाये धैर्यं मनोत्साहमदीनसत्वं ॥ विद्यांवरासंकृतवाहनाप्तिं सहोदराणां
वजुभाग्यलाभं ॥२८॥ भृगोर्विपाके रिगतस्यनाशं धान्यार्थवस्त्रात्मजसोदराणां ॥ रोगं महत्कार्यवि
नाशनं च शत्रोर्भयं भूपतिवह्निचौरैः ॥२९॥ रंध्रस्थितस्यापि भृगोर्विपाके शस्त्राग्निचौरसंतमनत्रः
विघ्नं ॥ कचित्सुखं किंचिदुपैति वित्तं कविन्नरेशाप्रयशः प्रतापं ॥३०॥ लाभस्थितस्यापि भृगोर्विपाके सुः

स·बिं·
७९

नेध माल्यां वरराजपूज्यं ॥ पुत्रार्थसौख्यं कृषिविक्रयं च दानं स्वनामांकितपद्यजातं ॥३१॥ व्ययगत
शुक्रदशायां लभते धान्यार्थतानस्थानं ॥ स्थानच्युतिं प्रवासं मानवियोगं मनोविकारं च ॥३२॥ जी
वक्षेत्रगतस्य भृगोः स्त्रीपुत्रमहीविनाशनं कुरुते ॥ कर्मस्थितिस्थोदितो जननी क्लेशान्वितो मनोदुःखी ॥
३३॥ सिंहगशुक्रदशायां लभते विविधापदं मनोदुःखं ॥ उद्योगरोगतप्तः कर्मसुविफलेषु सर्वदाभि
रतः ॥३४॥ मृक्षगभृगुदशायां जीर्णगृहवासकः सुपावृतो धष्ठ ॥ लभते दारविनाशं भ्रातृवियोगं भवे
वेत्कलहं ॥३५॥ शुक्रे स्थानवशाधिके नरपतेः सन्मानतं भूवलं विद्यावादविनोदगोष्ठिरसिकं नाम
दयं संभ्रमं ॥ तस्मिन्दिग्बलशान्विते बहुयशः पुत्रार्थदारांबरं शुक्रे कामबलान्विते सुखधनं कीर्त्ति
: स्वनामांकिता ॥३६॥ निसर्गवीर्ययुक्तस्य भृगोर्दायि महत्सुखं ॥ कृषिगोभूमिवित्तादि भ्रातृमातृ:
सुखं भवेत् ॥३७॥ वक्रंगतस्यापि भृगोः सुतस्य दशाविपाके त्वति राजपूज्यं ॥ मृदंगभेरीरवयुक्तया
नं विचित्रवस्त्राभरणानि राज्यं ॥३८॥ दृग्वीर्ययुक्तस्य भृगोर्विपाके ज्ञानादिकर्माणि करोति काले ॥ वि

राम·
७९

८१

७९

याविलासं शयनं च वरं च नृपाभिषेकं कलहं विरोधं ॥३९॥ क्रूरषड्वं शशुक्रस्य भृगोर्दाये विपद्भयं
॥चौराग्निराजभीतिः स्यात् कृषिगोभूमिनाशनं॥४०॥ सौम्यषड्वं शशुक्रस्य भृगोः पाके महत्सुखं॥
कूपारामतडाकानां निर्माणं देवपूजनं॥४१॥ वैशेषिकांश संयुक्त भृगोर्दाये महत्सुखं॥ वाहनं नृप
सन्मानं भ्रातृस्त्रीधनसंपदः॥४२॥ क्रूरद्रेष्काणसंयुक्त भृगोर्दाये रिभीतिदं॥ काराग्रहं महत्क
ष्टं निगडं चोरपीडनं॥४३॥ उच्चक्षेत्रेपि नीचांशशुक्रतनुकोतिकष्टदः॥ करोति राज्यनाशं च स्थान
नाशमथापि वा॥४४॥ उच्चांशशुक्रतनुकोपि नीचराशिसमन्वितः॥ कृषिगोभूमिवाणिज्य धन
धान्यविवर्द्धनं॥४५॥ इति शुक्रदशाफलं॥ ॥अथ मंददशाफलं॥ मंदोत्तुंगदशायां ग्रामसभा
मंडलाधिपत्यं स्यात्॥ संभते विभोदशीसंपित्तनाशं बंधुकलहं स्यात्॥१॥ सोच्चदशायां कुरुते
देशभ्रंशं मनोरिजं दुःखं॥ वाणिज्याहानिस्सत्वं कृषिनाशं नृपविरोधं च॥२॥ आरोहिणीवा सरना
थस्य नोर्दशाविपाके नृपसत्वभाग्यं॥ वाणिज्यसाभं कृषिभूमिसाभं गोवाजियानं सुतदारसौख्यं॥

श०दिं०
८०

३॥ दिनेशसूनोस्तु वरोहकाले राजस्तुतिं दारसुतार्थनाशं ॥ भाग्यक्षयं भूपतिकोपयुक्तां खेष्वन्व
मायाति गुदाग्निरोगे ॥४॥ जीवस्थितस्यापि दिनेशसूनोर्दयितकलत्रात्मजसोदराणां ॥ नाशं महत्
कष्टं नरां कृषिं च जीवानुरन्यासमुपैति वन्तिं ॥५॥ भूसूनुकोणानि स्थितस्य शनेर्दशायां देशान्तरा
दिवनवासमुपैति काले ॥ नामहृद्यं यदि सन्नगराधिपत्यं विदेषतांसुतकलत्रजनादिचिन्ता ॥
६॥ बुधस्थितस्य दशादिवसे शसूनोर्द्वेषं करोति वसुपौरुषकीर्तिनाशं ॥ राजाश्रयं कनकभूष
णाभूमिसार्भ धैर्यत्वनामसदृशानुगुणां च सौख्यं ॥७॥ दानेर्दशायामतिशत्रुगस्य स्थानच्युतिं बंधु
विरोधतां च ॥ चौराग्निभूपैर्भयमन्नविघ्नं भ्रन्यार्थदारात्मजकोपमेति ॥८॥ दिनेशसूनोस्तु रिरा
शिगस्य वैश्याद्ध्वंसाप्यति भूमिनाशं ॥ कृषेर्विनाशं स्वपदच्युतिं च वैरं समायाति शरीरकष्टं ॥९॥
मित्रक्षेत्रदशायां मंदस्य तु शिल्पकर्मगुणावेत्ता ॥ ज्ञानेन च सुप्रतापं ददाति दुःखं महत्त्वं च ॥१०॥
स्वतिमित्रमंददायेददाति सौख्यं नरेशसन्मानं ॥ सुतधनदारविशेषान्यभुकृषिमहिषादिवाणिः

राम०
८०
९०

ज्ये ॥११॥ समर्क्षेन स्यापि शनेर्दशायां समानवुद्धिं सुतदारमित्रैः ॥ भृत्यापदं बंधुजनेषु वैरं देहस्य का
र्श्यं क्षयपित्तवातैः ॥१२॥ नीचखेचरसंयुक्तशनिदाये महद्भयं ॥ विदेशे प्रवासंच नीचभृत्यानुजीव
नं ॥१३॥ स्वोच्चखेचरसंयुक्तशनिदाये महत्सुखं ॥ किंचिद्राजभयं द्वेषैः सर्वत्र भृत्यवर्गार्थनाशनं ॥१४॥ पा
पान्वितस्यापि शनेर्दशायां पापानि दुरानिकरोति काले ॥ नीचस्त्रियासंगमनं विशेषाच्चौरारिनीचैः
कलहं विवादं ॥१५॥ शुभान्वितस्यापि शनेर्दशायां विशेषतो ज्ञानमुपैति काले ॥ परोपकारं नृपसद्मः
भाग्यं रूपाणि धान्यान्ययसां वसानं ॥१६॥ पापेक्षितस्यापि शनेर्दशायां भृत्यार्थदारात्मजसोदराणां
॥ नाशं समायाति परापवादं कुभोजनं कुत्सितगंधमाल्यं ॥१७॥ शुभेक्षितस्यापि शनेर्दशायां स्त्रीरत्
त्नपुत्रार्थमुपैति काले ॥ पश्चादुपैत्यत्रमहत्त्वकष्टं गोभूमिदारात्म्यरूपे विनाशं ॥१८॥ केंद्रान्वितः
शनेर्दाये कलहायासपीडनं ॥ पुत्रमित्रार्थदारादि बंधनां मरणं ध्रुवं ॥१९॥ सप्तमगस्य शनेर्दाये दे
हरुजमुपैति च ॥ स्थानच्युतिं प्रवासं च राजकोपं शिरोरुजं ॥२०॥ चतुर्थस्थशनेर्दाये मातृतद्वर्गना

CC-0. In Public Domain. Digitization by eGangotri

स॰चिं॰ ८१

नाशनं॥ गृहदाहं पदभ्रंशं चौराग्निनृपपीडनं॥२१॥ दारराशिगतस्यापि शनेर्दायेरिपीडनं॥ बन्ध
कुमहद्द्वेषं स्त्रीहेतोर्मरणं तु वा॥२२॥ दशमस्थशनेर्दाये कर्मनाशमुपैति च॥ देशान्तरं पदभ्रंशं नि
गडं राजपीडनं॥२३॥ द्वितीयस्थशनेर्दाये वित्तनाशमथाग्निरुक्॥ राजकोपं मनस्तापमन्नदेषेम
नोरुजं॥२४॥ तृतीयस्थशनेर्दाये कृषिगोधनसंपदः॥ मनोज्ञाङ्गमहोत्साहं भ्रातृवर्गविनाशनं॥
शं॥ पंचमस्थशनेर्दाये पुत्रनाशं मनोरुजं॥ राजकोपं मन्यनाशं बंधुस्त्री वित्तविभ्रमः॥२६॥ षष्ठस्थ
रविसूनोर्दशाकाले रिपीडनं॥ व्याधिचौरविषैर्बाधां गृहक्षेत्रविनाशनं॥२७॥ मरणपदस्थो म
दः करोति निःस्वं सुतार्थदाराणां॥ नाशं न्यजनानां निगडं क्षितिपकुमित्रदारनाशं वा॥२८॥ नवमग
तमंददायेपि व्रीनाशिगुरोस्तथैवापि॥ स्वमने विदेशयानं स्वकुलजाते विनाशमुपयाति॥२९॥ ला
भगमंददशायां स्वभते विविधार्थसौख्यसन्मानं॥ सुतदारभृत्यसौख्यं मनोविलासं कृषेश्च सद्धध
नं॥३०॥ व्ययगतमंददशायां नीतिचौराग्निनृपसंदोषश्च॥ विविधापदंचदुःखं विदेशयानं स्ववंधुः

राम॰ ८१

९१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाशं च ॥३१॥ अर्कांशगे मंददशायां स्वजनद्वेषं परस्त्रियं लभते ॥ भृत्यापत्यविरोधं महोग्रमं द्वेष परि
भूतं ॥३२॥ जीवांशगे मंददाये जीवाचारेण जीवनं लभते ॥ सर्वेषां द्वेष्यत्वं धनसुतदारैश्च विग्रहं दुःखं
॥३३॥ उडुपांश मंददाये विविधसुखानंद भोगभोग्यादिं ॥ कुरुते विदेशयानं ग्रामसभामंडलाधिपत्यं
वा ॥३४॥ भ्राते मंददशायामतिदुःखं मातृविनाशं कुरुते ॥ मध्ये विदेशयानं परगृहवासं परान्नं
भुक्त्वा त्ये ॥३५॥ स्थानवीर्ययुतमंददशायां दारपुत्रधनकीर्त्तिमुपैति ॥ चोरशत्रुनृपवह्निभयं च
वंधुनाशमथवाप्यपितुर्दार्त्तिं ॥३६॥ मंदस्य दिग्वीर्ययुतस्य दाये दिगंतरादात्तसुखार्थकीर्त्तिं ॥ भृत्य
दारात्मजसोदराणां विनाशनं वंधुजनैर्विरोधं ॥३७॥ कालवीर्ययुतमंददशायां कालकूटविष
भीतिमुपैति ॥ दारपुत्रनृपचोरभयं वा धान्यभूमिकृषिवाहनसाभं ॥३८॥ वक्रचारयुते मंदः क
रोति विफलक्रियां ॥ उद्योगभंगं दुःखं च सोदरार्थविनाशनं ॥३९॥ क्रूरषष्ट्यंशसंयुक्तशनिदाये
महद्भयं ॥ नृपकोपं पदभ्रंशं कारागृहनिवेशनं ॥४०॥ सौम्यषष्ट्यंशसंयुक्तशनिदाये महत्सुखं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स-चिं
८२

दारपुत्रार्थसंपत्तिं लभते बंधुविग्रहं ॥४१॥ वैशेषिकांशसंयुक्तः शनिः सौख्यं करोति च ॥ विशेषाद्राजः
सन्मानं विविधं वरभूषणं ॥४२॥ क्रूरद्रेष्काणसंयुक्तः शनिदाये महद्भयं ॥ उद्वेगं धननं विनाशोतिं नृपचो
राग्निजं भयं ॥४३॥ नीचराशिगतो मंदः त्वोच्चांशकसमन्वितः ॥ दशादौ दुःखमापाघ् दशांते त्वन्नसौ
ख्यकृत् ॥४४॥ उच्चराशिगतो मंदो नीचांशकसमन्वितः ॥ दशादौ सुखमापाद्य दशांते कष्टदो भवेत् ॥
४५॥ इति शनिदशाफलं ॥ ॥इति सर्वार्थचिंतामणौ पंचदशोध्यायः ॥ ॥अथ राहुदशाफलं ॥ रा
होर्बीजं केतोस्तु पुच्छिकं तु न संज्ञितं ॥ स्वस्वत्रिकोणं कुंभं च क्रियमित्रमुच्यते ॥१॥ एतत्स्थमरा
शिस्थकेतो स्वत्रिकोणकं ॥ षष्ठाष्टरिःफगो राहुस्तद्दाये कष्टदो भवेत् ॥२॥ उच्चस्थसैंहिकेयस्तु त
त्याके सुखदो भवेत् ॥ राज्यं करोति मित्राप्तिं धनधान्यविवर्द्धनं ॥३॥ राहुर्नीचस्थितो दाये चौराग्निनृ
पभीतिदः ॥ उद्वेगं धननं विनाशोतिं जनते सिंहिकासुतः ॥४॥ राहोर्दशायां संप्राप्तौ नृपचौराग्निपीड
नं ॥ विदेशयानं दुःखानि वनवासाद्भयं ध्रुवं ॥५॥ स्वगृहगतराहुदाये बुद्धिं दीनं विषाग्निशस्त्राद्यैः ॥ बंधु

+वि१

राज
८२
९२
८२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विनाशं लभते दुःखार्त्तिं पराजयं समरे ॥६॥ राहोर्दशायां धनराशिगस्य राज्ञाञ्च वित्तं क्रियते विशेषात् ॥
कुभोजनं कुत्सितराजसेवां मनोविकारं त्वनृतं प्रकोपं ॥७॥ तृतीयराशिस्थितराहुकाले सुतार्थदाराः
त्मजसोदराणां ॥ सुखं कृषेर्वैधनमाधिपत्यं विदेशयानं नरपालपूज्यं ॥८॥ चतुर्थराशिस्थितराहुः
काले मातुर्विनाशं त्वथवा तदीयं ॥ सुतार्थनाशं नृपतेः प्रकोपं नयादिपानित्यमनेकदुःखं ॥९॥ चौः
राग्निबंधार्त्तिं मनोविकारं दारात्मजानामपि रोगपीडां ॥ चतुर्थराशिस्थितराहुकाले प्रभग्नसंसारक
लत्रपुत्रे ॥१०॥ बुद्धिभ्रमं भोजनसौख्यनाशं विद्याविवादं कलहं च दुःखं ॥ कोपं नरेंद्रस्य सुतस्य नाशं
राहोः सुतस्थस्य दशाविपाके ॥११॥ दशाविपाके त्वरिगस्य राहोश्चोराग्निभूपैर्भयमाप्तनाशं ॥ प्रमेह
गुल्मक्षयपित्तरोगं त्वग्दोषरोगं त्वथवामृतिं च ॥१२॥ कलत्रराशिस्थितराहुदाये कलत्रनाशं समुपै
ति शीघ्रं ॥ विदेशयानं कृषिभाग्यहानिं सर्पाद्भयं मृत्युसुतार्थनाशं ॥१३॥ राहोर्दशायां निधनस्थितस्य
यमालयं याति सुतार्थनाशं ॥ चौराग्निभूपैः स्वकुलोद्भवैश्च भयं मनगेर्वविनवासदुःखं ॥१४॥ राहोः

स॰ चिं॰
८३

दशायां नवमस्थितस्य पित्रोर्विनाशं लभते मनुष्यः ॥ विदेशयानं गुरुबंधुनाशं स्नानं समुद्रस्य सुतार्थ
नाशं ॥१५॥ मानस्थितस्यापि दशाविपाके राहोः वदन्ति लभते मनुष्यः ॥ पुराणधर्मश्रवणादिनिष्ठ गां
गेयतोयैरपिशुद्धदेहः ॥१६॥ सौम्यर्क्षगस्थेन्फलमेवमेव पापर्क्षगस्थे न तथा न वेद्मि ॥ प्रोक्तं फलं यत्स
कलं तदेव सौम्यर्क्षगस्थेत्फलमन्यथा न्यत् ॥१७॥ पापक्षेत्रगतो राहुः कर्मस्थः पापसंयुतः ॥ अग्निशास्त्र
स्तदाकाले पुत्रदारानिपीडनं ॥१८॥ स्वापराशिगतो राहुः स्वत्याके न पमाननं ॥ धनापिदाररत्नभव
न्हस्मे त्रार्थसंपदः ॥१९॥ व्ययगत राहुदशायां देशभ्रंशं मनोविजं कुरुते ॥ विछिन्नदारपुत्रं कृषिध
नधान्यसंपदां नाशं ॥२०॥ कुलीरगो मेषसुतस्य राहोर्दशाविपाके धनलाभमेति ॥ विद्याविनोदं न
पमाननं च कलत्रभृत्यात्सुखं प्रयाति ॥२१॥ पाथोनधीनाम्बसुतस्य राहोर्दशाविपाके सुतदार
लाभं ॥ देशाधिपत्यं नरवाहनं च दशावसाने सकलं विनाशं ॥२२॥ पापर्क्षसंयुक्तफणीन्द्रदाये देहस्य
कार्श्यं स्वकुलस्य नाशं ॥ नृपाग्निभयं वंचनचोरभीतिं प्रमेहकासक्षयमूत्रकृच्छ्रं ॥२३॥ पापदृष्टियुतोः

राम॰
८३

७३

८३

CC-0. In Public Domain. Digitization by eGangotri

राहुः कर्मनाशं करोति च ॥ उद्योगनशनं देहार्त्तिं चौराग्निनृपपीडनं ॥२४॥ शुभग्रहदृष्टियुतो राहुः करोति सफ
लक्रियां ॥ राजमानं नमथाप्तिं वंधूनां मरणं दृढं ॥२५॥ उग्रग्रहयुतो राहू राज्यलाभं करोति च ॥ स्त्रीपु
त्रधनसंपत्तिं वस्त्राभरणसेवनं ॥२६॥ नीचग्रहयुतो राहुर्नीचवृत्त्यानुजीवनं ॥ कुभोजनं कुदारं च कु
पुत्रांश्च भवेत्तदा ॥२७॥ दशादौ दुःखमाप्नोति दशामध्ये सुखं यशः ॥ दशान्ते स्थाननाशं च गुरुपित्रादि
नाशनं ॥२८॥ इति राहुदशाफलं ॥ ॥ अथ केतुदशाफलं ॥ ॥ आयुःपुत्रविनाशनं नरपतेर्भीतिं म
हत्कष्टतां विद्यावंधुधनाप्तिमित्रविहतिं रोगाग्निमित्रैर्भयं ॥ यानारोहणपातनं विषजलैः शस्त्रा
दिभिर्वह्निभयं देशाद्देशविवासनं कलिरुचिं नत्यादिभिर्वह्निभयं ॥१॥ केतोर्दशायां संप्राप्तो दारपुत्रवि
नाशनं ॥ राजकोपं मनस्तापं चौराग्निकृषिनाशनं ॥२॥ केंद्रस्थस्य दशा केतोः करोति विफलक्रियां ॥
राज्यार्थसुतदाराणां नाशं च विपदं तथा ॥३॥ लग्नकेंद्रगतस्यापि केतोर्दये महद्भयं ॥ ज्वरातिसारः
मेहं च स्थानकादि विभ्रविकाः ॥४॥ धनराशिगतस्यापि केतोर्दये धनक्षयं ॥ वाक्पारुष्यं मनोदुःखं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कुत्सितान्नं मनोरुजं ॥५॥ तृतीयराशिगस्यापि केतोर्दशे महत्सुखं ॥ मनोवैकल्यमायाति भ्रातृभिर्द्वि-
षतां परं ॥६॥ चतुर्थराशिगस्यापि केतोर्दशे सुखक्षयं ॥ अन्नपानदारपुत्रादिगृहधान्यगृहक्षितिः ॥७॥ पं-
चमस्थस्य केतोस्तु दशाकाले तु तत्क्षयं ॥ बुद्धिभ्रंशं विशेषेण राजकोपं धनक्षयं ॥८॥ केतोस्तु रिगतस्या-
पि दशाकाले महाभयं ॥ चोराग्निविषभीतिः स्याद् रोगाग्निसमुपैति च ॥९॥ कलत्रराशिसंयुक्तकेतोर्द-
शे महद्भयं ॥ दारपुत्रार्थनाशं च मित्रकष्टं मनोरुजं ॥१०॥ मृत्युराशिगतस्यापि केतोर्दशे महद्भयं
॥ पितृमृत्युं श्वासकासग्रहण्यादिभयान्वितः ॥११॥ नवमस्थस्य केतोस्तु दशापाके पितुर्विपत् ॥ गु-
रोर्वापि पदं दुःखं सुजनकर्मविनाशनं ॥१२॥ कर्मस्थकेतोः संप्राप्तौ दशायां सुखमेति च ॥ मानहानिं म-
नोजाड्यमपकीर्तिर्मनोरुजं ॥१३॥ लाभस्थकेतोः संप्राप्तौ सौख्यं करोति च ॥ भ्रातृवर्गादिसौख्यं च य-
शोदानादिवर्द्धनं ॥१४॥ रिःफस्थकेतोः संप्राप्ते दाये कष्टतरं भवेत् ॥ स्थानच्युतिं प्रवासं च राजपीडाभि-
नाशनं ॥१५॥ दशादौ सुखमाप्नोति दशामध्ये महद्भयं ॥ दशान्ते राजभीतिः स्याद्देहनाशमथापि वा ॥

CC-0. In Public Domain. Digitization by eGangotri

१६॥शुक्रवीक्षणाद्युक्तस्य केतुः सौख्यं करोति च॥राज्यार्थगृहशांतिं च राजपूजां महद्भयं॥१७॥पापेक्षि
तो युतो वापि केतुर्दुःखं करोति च॥ज्वरातिसारं मेहं च त्वग्दोषान्राजपीडनं॥१८॥इति केतुदशाफलं॥
॥ ॥अथांतर्दशाफलं॥तेजस्विनमतिसुखिनं सुस्थिरविभवं नृपाद्वलब्धधनं॥स्वनवांशकवलयुक्तः
पुरुषं कुर्याद्दिनान्वितं ख्यातं॥१॥शुभदर्शनवस्त्रयुक्तं पुरुषं कुर्याद्दिनान्वितं ख्यातं॥शुभगंधधानममसं
सुरूपदेहं सुसौम्यं च॥२॥अन्योन्यपक्षाष्टमदायकाले नृपाद्भयं भ्रात्यजनैर्विरोधं॥स्त्रियाविरोधं सुतदा
रनाशं चौराग्निवंधुर्त्तिमनोविकारं॥३॥पाकेश्वरादंत्यगतस्य शुक्रो स्यान्नृपस्तुतिं बंधुजनैर्विरोधं॥विदे
शयानं स्वजनैर्विरोधं पादास्सिद्धयोगमुपैति काले॥४॥दशाधिपेनापि युतस्य शुक्रो स्त्रीपुत्रभृत्यार्थ
रूपेविनाशं॥उद्योगभंगं स्वजनस्य कष्टमाकस्मिकं दूषणमेति काले॥५॥दशाधिपाद्धि त्रिगतस्य शु
क्रो महद्भवन्नपानांबरगंधमाल्यं॥परोपकारं स्वजनस्य सौख्यं स्त्रीपुत्रवंधात्ममनोविलासं॥६॥दशाधि
पात्सोदरराशिगस्य शुक्रो नृपाद्वित्तमुपैति सौख्यं॥सुगंधमाल्यांबरभूषणानां च सोन्योन्नवं भोजनसौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स॰ चिं॰ ८५

स्थिते ऽपि ॥७॥ पाकेश्वराद्बंधुगतस्य पुंसो दारात्मजार्थं न हि बंधुयानं ॥ मित्रान्नपानं वरभूषणं वस्त्रमथग्रह
श्चेत्फलं समन्यथा यत् ॥८॥ पापग्रहो विभुगदः खलु दायनाथाद्बंधुस्थितः स्वगवनोत्थवसादिकृतः ॥ सौ
म्यग्रहोपशुभदः शुभराशिपुंसो दायेश्वरात्स्वगवनोत्थवसादिहीनः ॥९॥ दशानाथात्सुतस्थस्य पुंसो पु
त्राप्तिमादिशेत् ॥ शुभग्रहस्य सौख्यं च पापपुंसो सुतक्षयं ॥१०॥ स्वान्तर्दशायां पापस्य षष्ठगस्य दशेश्वरा
रात् ॥ वैराग्निजं तु देहार्तिं शूलमेवं वदेद्विप्रमं ॥११॥ तस्मात्षष्ठगसौम्यस्य दायेशात्सुखवर्द्धनं ॥ सप्तमे
पुत्रमित्राप्तिं स्त्रीसंभूतसादिगस्य तु ॥१२॥ दायेशात्सप्तमस्थस्य पापस्यापहृतौ तदा ॥ दाराद्युत्थवंधू
नां नाशं भूपतिनाभयं ॥१३॥ सप्तमस्थशुभस्यापहृतौ सौख्यं दशाधिपात् ॥ नीचशत्रुविहीनस्य भद्रवस्त्रं
वरभूषणं ॥१४॥ पाकेशादष्टमस्थस्य पापस्यापहृतौ ≈ ≈ ≈ ≈ ≈ ≈ ≈ ≈
भयं ॥ निधनं कुत्सितान्नं च वैराग्निनृपपीडनं ॥१५॥ पाकेशादष्टमस्थस्य सौम्यस्यापहृतौ सुखं ॥ भु
क्त्वा दोषोऽभवन्नेत्रोक्तं मंत्रेकदेहं विनिर्दिशेत् ॥१६॥ दायेशान्नवमस्थस्य पापस्यापहृतौ यदा ॥ गुरुमंत्रसन्न

राम॰ ८५

९५

ते कर्मस्थानभ्रंशं मनोरुजं ॥१७॥ प्रदानतः शुभस्यास्य सौम्यस्यापहृतौ यदा ॥ विवाहं यज्ञदीक्षां च ना
प्तिर्लभते नरः ॥१८॥ कर्मस्थपापखेटस्य हृतौ पाकेश्वराद्यदा ॥ कर्मनाशमवाप्नोति दुःकीर्त्तिं विविधा
पदं ॥१९॥ तस्मात्कर्मस्थसौम्यस्य हृतौ सौख्यं विनिर्दिशेत् ॥ तडागगोपुरादीनां पुण्यमर्थादिसंग्रहं
॥२०॥ लाभस्थस्य दशानाथात्पापस्यापहृतौ धनं ॥ सम्पत्ते पुत्रमित्रादीन्स्थानप्राप्तिं च शाश्वतीं ॥२१॥
पाकेशाल्लाभयुक्तस्य सौम्यस्यापहृतौ सुखं ॥ भाग्योत्तरं नृपात्प्राप्तिं दारपुत्रादिवर्द्धनं ॥२२॥ व्यय
स्थस्य हृतौ दुःखं पापस्य तु दशाधिपात् ॥ स्वार्थनाशं नृपक्रोधं स्थाननाशं परिभ्रमं ॥२३॥ पाकेश्व
राद्यस्थस्य सौम्यस्यापहृतौ तदा ॥ वाहनं भोगभोग्यं च वस्त्राभरणभूषणं ॥२४॥ तत्तद्दशायां
संयोज्यमेवमेवं विशेषता ॥ स्वर्क्षोच्चमित्रवर्गादि विनाशवर्ज्जिकस्ययेत् ॥२५॥ स्वनाथसौम्यगस्या
पि पापस्यापहृतौ तदा ॥ पाकेशाद्दुःखमाप्नोति सौम्ययुक्तोऽशुभं भवेत् ॥२६॥ एवं तद्दशायां क्रूरस्य क्रू
रदाये महद्भयं ॥ स्थानाप्तिं बंधुपुत्रार्त्तिं दारानाशं नृपाद्भयं ॥२७॥ शुभयुक्तोऽशुभे दाये स्थानवाह

स·चिं·
८६

नभूषणं ॥ सौम्ययुक्तौ [illegible] पापदाये त्वादौ सौख्यं परं भयं ॥२८॥ सौम्यदाये पाप
युक्तौ त्वादौ कष्टं ततः सुखं ॥ शीर्षोदयर्क्षगाः खेटा स्वादौ चांत्ये च अक्षगाः ॥२९॥ यत्र संवाद वाक्यं
योगयित्वाफलं वदेत् ॥ अथ संवादकार्येषु यथोक्तं फलमादिशेत् ॥३०॥ ॥इति समुदायांतर्दशा
फलं ॥ ॥अथ ग्रहाणां स्थानादिस्थित्या भेदेन पुनरप्यंतर्दशाफलविशेषमाह ॥ ॥लग्नगस्य रवेः
पाके भौमार्किशिखिभोगिनां ॥ अंतर्दशायां दुःखं स्याद्राज्यार्थजनहनाशनं ॥१॥ तेषामगोचरस्थानां
दिनेशान्स्य समीदृशं ॥ गोचरस्य फलं सौम्यं सर्वेषामपि पापकग्रहे ॥२॥ गोचरस्य तं नाम ॥ स्वर्क्षतुंग
त्रिकोणस्थः षडष्टांत्य वि वर्जितः ॥ षष्ठाष्टव्ययगस्थो वा यो खेटो यमगोचरः ॥४॥ लग्नस्य वासरेश
स्य दशायां भौमस्युक्तयोः ॥ शशांकसौम्ययोर्युक्तौ कफपित्तोद्भुतदारभ्रः ॥५॥ धनस्थ वासरेशस्य पा
पयुक्तौ धनक्षयं ॥ वाक्पारुष्यं मनोदुःखं नेत्ररोगं महद्भयं ॥६॥ सौम्ययुक्तौ रवेः पाके धनस्य स्य
महत्सुखं ॥ विद्यासामं नृपाद्गीतिं वस्त्रवाहनभूषणं ॥७॥ तृतीयस्थस्य वरवेः पाके पापयुतोय
४ अनस्तगोमित्रनक्षगोचरस्थो भवेद्ग्रहः ॥३॥ अस्तगो नीचगो वापि सोऽशुभस्थवि

राम·
८६
५०

८६

दा॥ गोचरस्थे महत्सौख्यं नोचेत्पापफलं भवेत्॥८॥ चान्द्रस्य भानुपाके च शुभजुक्तौ महत्सुखं॥ धैर्यवि
त्तसुखाप्तिं च समरे जयमाप्नुयात्॥९॥ दिनेशस्य सुखस्थस्य दशायां पापिनां हतौ॥ मातृनाशं मनो
दुःखं चौराग्निनृपपीडनं॥१०॥ रवेः सुखान्वितस्यापि शुभजुक्तौ महत्सुखं॥ राज्यार्थपुत्रदारादि वस्त्र
माल्यानुलेपनं॥११॥ पंचमस्थ रवेः पाके शन्यारशिखिभोगिनां॥ अंतर्दशायां पुत्रार्त्तिं चौरनृपा
ग्निपीडनं॥१२॥ शुभग्रहाणां युक्तौ तु रवेः पंचमस्य तु॥ सुताप्तिं च तथा राज्यं वाहनं भूषणं तथा॥
१३॥ षष्ठस्य सूर्यदायेस्मिन्नपहारे तु पापिनां॥ ऋणं चौराग्निभूपेभ्यो भीतिरावश्यकी तदा॥१४॥ सौ
म्यानामपहारे तु भास्करस्यारिनस्य च॥ वरिपाके सुखं पूर्वं पश्चाद्दुःखं विनिर्दिशेत्॥१५॥ सप्तम
स्थ रवेः पाके शुक्रेज्याज्ञविदां हतौ॥ दारलाभं मनोत्साहं यानां वरविभूषणं॥१६॥ तथाविधरवेः
पाके दुःखं स्यात्पापिनां हतौ॥ ज्वरातिसारं मेहं च. मूत्रकृच्छ्रादिपीडनं॥१७॥ अष्टमस्थ रवेः पाके
शुभजुक्तौ शुभं भवेत्॥ किंचिद्दुःखं शुभाभिक्यं शयनं वरभूषणं॥१८॥ तथाविधरवेर्दाये पापयु

सौमहद्भयं ॥ मरणं व्याधिपीडा च परप्रेष्यत्वमेव वा ॥ १९ ॥ शुभस्थानगतस्यापि रवेः पापदृशौ यदा ॥
स॰चिं॰ ८७ सौम्यानां शुभकर्माणि दानयज्ञमहोत्सवं ॥ २० ॥ नवमस्थरवेः पाके पापभुक्तिर्यदा तदा ॥ करोति दुःखबा
हुल्यं गुरुपित्रादिनाशनं ॥ २१ ॥ कर्मस्थितरवेर्दाये पापभुक्तिर्यदा तदा ॥ करोति कर्मको शान्तिं यो रा
ग्निनृपपीडनं ॥ २२ ॥ तथाविधरवेः पाके शुभभुक्तिर्यदा तदा ॥ करोति विपुलं राज्यं कीर्त्तिमांश्चंडता
रकं ॥ २३ ॥ लाभराशिगतस्यापि रवेः पाके शुभेतरः ॥ भुक्तिर्यदा तदा दुःखं पश्चात्सौख्यं करोति च ॥
२४ ॥ तथाविधरवेः पाके शुभभुक्तिर्यदा तदा ॥ धनाभिराज्ञसन्माने दारपुत्रनृपाश्रियं ॥ २५ ॥ द्वा
दशस्थरवेः पाके पापभुक्तौ महद्भयं ॥ स्थानच्युतिं प्रवासं च नृपकोद्विग्नमानतां ॥ २६ ॥ तथाविधर
वेः पाके शुभभुक्तौ महत्सुखं ॥ गोभूमिवस्त्रधान्यादि मतिविद्रुमभूषणं ॥ २७ ॥ इति रविपाकान्तर्द
शाफलं ॥ ॥ अथ चंद्रदशाफलं ॥ ॥ मूर्त्तिस्थचंद्रदायेतु शुक्रस्येज्यविदां दृशौ ॥ देहारोग्यं नृपात्प्री राम॰
तिं वाहनांबरभूषणं ॥ १ ॥ तथाविधस्य चाशुभस्य परिपाके शुभेतराः ॥ हानिः करोति दुःखं च रुचिनो ८७

९७

८६

CC-0. In Public Domain. Digitization by eGangotri

ऋमिनाशनं ॥२॥ द्वितीयस्थनिशानाथपरिपाके शुभे नराः ॥ कलत्रपुत्रवंधूनां नपाप्नीतिं करोति
व ॥३॥ सौम्यदृतौ द्वितीयस्थे चंद्रदाये महत्सुखं ॥ अन्नानां वरमानेव मनोत्साहं करोति हि ॥४॥ तृ
तीयस्थनिशानाथपरिपाके महत्सुखं ॥ शुभग्रहाणां शुक्तिस्तु करोति नृपमाननं ॥५॥ तथाविधनिः
शानाथपरिपाके शुभेतरा ॥ दृतिः करोति वैकल्यं भ्रातृधैर्यविनाशनं ॥६॥ चतुर्थस्थनिशानाथ
परिपाके महत्सुखं ॥ शुभदृष्टौ नृपादित्तं जायते विविधं सुखं ॥७॥ पापदृष्टौ महत्कष्टं गृहदारा
र्थनाशनं ॥ चौराग्निनृपभीतिं च ताद्दशाताद्दशांतरे ॥८॥ पंचमस्थनिशानाथपरिपाके महत्सुखं
॥ सौम्यदृष्टौ कलत्रार्थपुत्रमित्रांवराणि च ॥९॥ तथाविधनिशानाथ दायेपापदृतौ यदा ॥ बुद्धिसौमं
मनस्तापं दारपुत्रनृपाद्भयं ॥१०॥ कृषिनाशमृणग्रस्तं षष्ठस्थितनिशाकरात् ॥ स्यात्पापिनां दृतौ
दुःखं च भेदस्सयपांडुभिः ॥११॥ तथाविधनिशानाथे सौम्यानां च यदा दृतिः ॥ करोति सर्वतो मैत्री
चौरारिभयनाशनं ॥१२॥ कलत्रस्थनिशानाथाद्यदा सौम्यदृतिस्तदा ॥ कलत्रपुत्रसंपत्तिर्वाहनां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वरभूषणं ॥१३॥ तथाविधनिशानाथान्वापिनां तु हृतिर्यदा ॥ विदेशयानं पुत्रार्थदारबंधुविनाशनं ॥
स॰ चिं॰ ८८ १४॥ अष्टमस्थनिशानाथात्पापयुक्तौ महद्भयं ॥ मरणं दारपुत्राणां कुक्षि नान्नं पराजयं ॥१५॥ रं
ध्रस्थितनिशानाथात्परिपाके महत्सुखं ॥ सौम्ययुक्तौ महत्कीर्त्तिं धैर्यं वाहनभूषणं ॥१६॥ धर्मस्थि
तनिशानाथात्शुभयुक्तौ महत्सुखं ॥ धर्मयज्ञविवाहं च राजलक्ष्मी धनसंपदः ॥१७॥ तथाविधनिशा
नाथान्वापिनां तु हृतिर्यदा ॥ धर्महानिं महद्दुःखं राज्यार्थग्रहनाशनं ॥१८॥ कर्मस्थितनिशानाथा
त्सौम्ययुक्तौ महत्सुखं ॥ सत्कर्मनिरतं शांतं धर्मदानपरायणं ॥१९॥ तथाविधनिशानाथे पापयु
क्तौ यदा तदा ॥ कर्मनाशं करोत्यत्र स्वपकीर्त्तिर्महद्भयं ॥२०॥ लाभचंद्रे शुभयुक्तौ धनधान्यांबराणि
च ॥ वाहनं राज्यसन्मानं करोति विविधं सुखं ॥२१॥ लाभचंद्रे पापयुक्तौ धननाशमुपैति च ॥ कृषि
धान्यादि देहार्त्तिं नृपचौरादिपीडनं ॥२२॥ द्वादशस्थनिशानाथपरिपाकेर्थनाशनं ॥ पापयुक्तौ राम॰ ८८
महत्कष्टं सर्वहानुत्वमेति च ॥२३॥ शुभयुक्तौ व्ययस्थस्य वस्त्रमाल्यविभूषणं ॥ दारपुत्रार्थमित्रा

९४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

णां वर्द्धनं वाहनं सुखं ॥२४॥ ॥अथ कुजांतर्दशाफलं॥ ॥लग्नस्थितधरासूनोः परिपाके कुजान्त
ते॥पापयुक्तौ महत्कष्टं भीरग्न्यादिभयाद्भवेत्॥१॥शुभयुक्तौ नपाप्नोतीति भ्रान्ति वर्गसुखं शुभं॥त
थाविधधरासूनोर्दशायां सेव्र वाहनं॥२॥धनस्थितधरासूनोः शुभयुक्तिर्यदा तदा॥भ्रान्तसौख्यं
मनोत्साहं विद्या वाहनभूषणां॥३॥~~द्वितीयस्थधरासूनोः शुभयुक्तिर्यदा तदा॥भ्रान्तसौख्यं मनो~~
~~त्साहं विद्या वाहनभूषणां॥३॥~~द्वितीयस्थधरासूनोः परिपाके शुभाहृति॥पूर्ववित्तविनाशं च रा
जकोपभयं रात्रिदिनेः॥४॥तृतीयस्थधरासूनोः पापयुक्तिर्यदा तदा॥मनोवैकल्यमाप्नोति भ्रान्तवर्ग
विनाशनं॥५॥तथाविधधरासूनोः पाके सौम्यहृतिर्यदा॥भोजनांबरसौख्यं च कृषिभूषणां वाहनं
॥६॥हिबुकस्थधरासूनोः क्रूरयुक्तौ महद्भयं॥गृहक्षेत्रविनाशं च तपचोराग्निपीडनं॥७॥हिबुक
स्थधरासूनोः ~~क्रूरयुक्तौ महद्भयं॥गृहक्षेत्रविनाशं च तपचोराग्निपीडनं॥७॥~~ पाके शुभहृतिर्यदा॥
सेत्रां वरसुखावाप्तिं शुभ्र वाहनभूषणां॥८॥पंचमस्थधरासूनोः पाके पापहृतिर्यदा॥कुबिनो ध

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथान्यार्थसुतदारविनाशनं ॥९॥ तथाविधकुजान्सौम्ययुक्तौ शोभनमादिशेत् ॥ तानपभृग्वंशुनापि
वमंत्रोपास्तिमथाचरेत् ॥१०॥ षष्ठस्थितकुजात्पापयुक्तौ कष्टं विनिर्दिशेत् ॥ चौराग्निनृपपीडां च
स्थानकक्षयमेहनं ॥११॥ तथाविधकुजान्सौम्य-युक्तौ जयान्समित्रतां ॥ बंधुनाशं मनोदुःखं पश्चात्सौ
ख्यं विनिर्दिशेत् ॥१२॥ कलत्रस्थकुजात्पापयुक्तौ स्त्रीसुतराजभीः ॥ सुतयुक्तौ महत्सौख्यं नृपवाहनभूष
णं ॥१३॥ अष्टमस्थकुजाद्युक्तौ पापिष्ठं मरणं ऋणं ॥ सौम्ययुक्तौ महत्सौख्यं कृषिगोनृपपूजनं ॥१४॥ न
वमस्थधरासूनोर्दये पापहृतिर्यदा ॥ पित्रोर्नाशं गुरोर्नाशं धर्महानिर्भ्रमो रुजः ॥१५॥ तथाविधकुजा
त्सौम्ययुक्तौ गोधनसंपदः ॥ विवाहं यज्ञदीक्षां च देवभूसुरतर्पणं ॥१६॥ कर्मस्थितधरासूनोर्दु
:खं स्यात्पापितोहतौ ॥ विदेशयानं दुःकीर्तिं लभते हि पराजयं ॥१७॥ लाभस्थभूमिपुत्रस्य पाके पा
पहृतिर्यदा ॥ करोति विपुलं राज्यं गंधमाल्यविभूषणं ॥१८॥ शुक्रस्यात्र विनोयुक्तौ लाभराशिग
तस्य तु ॥ परिपाके महत्सौख्यं दानधर्मादिसंग्रहं ॥१९॥ द्वादशस्थधरासूनोः पाके पापहृतिर्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दा॥ करोति विपुलं राज्यं गंधमाल्यविभूषणं॥१०॥ शुक्रस्यांतर्विदां शुक्रो लाभराशिगतस्य तु॥
परिपाके महत्सौख्यं धनधान्यादिसंग्रहं॥११॥ द्वादशस्थे धरासूनोः पाके पापहतिर्यदा॥ करोति दुः
खबाहुल्यं कारागृहप्रवेशनं॥१२॥ शुभापहारे सौख्यं वस्त्राणां च रविभूषणं॥ शुक्रांते राजकोपं च
पदभ्रंशं मनोरुजं॥१३॥ ॥अथ राहोरंतर्दशाफलं॥ ॥लग्नस्थे सिंहिकेयस्य दाये पापहतिर्यदा॥ क
रोति दुःखबाहुल्यं [illegible]
[illegible] नृपचौराग्निपीडनं॥१॥ तत्रस्थे भोगिनः पाके शुभयुक्ते शुभं वदेत्॥ गृ
हे सत्राग्निदद्धिश्च भोजनानां वरभूषणं॥२॥ षडष्टांत्यगतस्याहेः परिपाके शुभेतराः॥ हतिः कलहरोगा
ग्नि नृपचौरविषादिभिः॥३॥ धनस्थस्य प्रमेहादिमूत्रपीडादिरोगकृत्॥ कुभोजनं च वस्त्रं च स्था
ननाशं नृपाद्भयं॥४॥ दुःस्थस्य वाहिनाथस्य परिपाके शुभाहतिः॥ शौर्यसौख्यं महत्सौख्यं नृपमानं ध
नागमं॥५॥ अंत्ये तु राजभीतिः स्यात्स्थाननाशं शिरोरुजं॥ कृषिगोभूमिवस्त्रादि बंधुपुत्रार्थनाशनं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स.चिं. ९० ६॥ केंद्रत्रयस्थितस्याहेः पापिनां तु यदा हृतिः॥ तद्दायेऽग्निरोगं च दारपुत्रमहद्भयं॥७॥ स्थानच्युतिं
मनोदुःखं निजाचारविवर्जितं॥ अकस्मात्कलहं चैव चौराग्निनृपपीडनं॥८॥ चतुष्टयगतस्याहेः प
रिपाके शुभाहृतिः॥ क्वचित्सौख्यं क्वचित्कीर्तिं क्वचिद्धर्मं क्वचित्सुखं॥९॥ एवमादौ तु शुक्रांते राजको:
पाद्धनक्षयं॥ शुक्रे परात्ययं चैव विग्रहादं महद्भयं॥१०॥ त्रिकोणस्थस्य फणीन्द्रस्य दशापाके महाहः
शं॥ पापयुक्तो महत्कष्टं पापाचारसमन्वितं॥११॥ अपकीर्तिं कुल्ल्युक्तिं च कृषिनोनृविनाशनं॥ वि
प्रत्तं वौर्य्यं च गौल्यादिपतनं भवेत्॥१२॥ तथाविधफणीन्द्रस्य शुभयुक्तो शुभक्रिया॥ सुतदा
रधनाप्तिं च शुक्रांते फलमीदृशं॥१३॥ किंचित्सुखं तदा दौःस्तु विदेशगमनं तदा॥ मंत्रोपास्ति मनोत्सा
हं कलत्रात्मजद्भवं॥१४॥ त्र्ययस्थानगतस्याहेः परिपाके महत्सुखं॥ पापयुक्तो नृपप्रीतिं फल
मीदृशमादितः॥१५॥ अंते कष्टं विनिर्दिष्टं चौराग्निनृपपीडनं॥ बंधुदेशं मनोदुःखं भ्रातृवनवि राम.
नाशनं॥१६॥ धनराशिगतस्याहेः पापिनां तु हृतिर्यदा॥ धननाशं मनोदुःखं भार्यापुत्रविनाशनं ९०

१५०

९०

॥१७॥क्रयविक्रयवित्ताप्तिं वान्दूषणमथापि वा॥तथाविधफणीन्द्रस्थशुभजन्तुकौ सुभोजनं॥१८॥
वस्त्रवाहनभूषाप्तिः क्रयविक्रयदूषणं॥उद्योगभंगं देहार्त्तिं दद्यात्पापसमे नरः॥१९॥ ॥अथश
नैरंतर्दशा॥ ॥केंद्रस्थितशनेर्दाये यदा पापहतिस्तदा॥स्थानच्युतिं प्रवासं च नपद्मोराग्निपीडनं॥
॥दारार्थसुतबंधूनां मरणं देहनाशनं॥परखेध्यं मनोदुःखं पापहतिस्तदा॥स्थानच्युतिंप्र
वासं च नपद्मोराग्निपीडनं॥दारार्थसुतबंधूनां मरणं देहनाशनं॥परखेध्यं मनोदुःखं
शूलादि पीडनं॥२॥तथाविधशनेर्दाये सुभजन्तुकौ महत्सुखं॥नृपाप्तिं वेकमथाप्तिं देशग्रामाधि
पत्यतां॥३॥फलसमीदृश मादौ तु अन्त्ये तेरोग पीडनं॥परापवादं बंधूनां मरणं च विनाशनं॥४॥त्रि
कोणस्थशनेर्दाये पितृपुत्रविनाशनं॥पापजन्तुकौ महत्कष्टं कर्मनाशमथापि वा॥५॥वातास्मिभ्र
सरोगं च स्ववंधुकलहं तथा॥उद्योगभंगं दुःखं च स्वसधान्यविनाशनं॥६॥तथाविधशनेर्दाये
शुभजन्तुकौ महत्सुखं॥राजपूज्यं कृषे सम्भिं धनधान्यादिवर्द्धनं॥७॥स्ववंधुदारपुत्राणामारोग्यं भ्र

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बलादिकं ॥ मृत्यभित्रार्थसंपत्तिं लभते धर्मसंग्रहं ॥ ८ ॥ षष्ठाष्टमव्ययस्थस्य शनेः पाके शुभे नराः ॥ ह
स·वि· ९१ तिर्दुःखं महत्कष्टं स्थानन्नाशं धनक्षयं ॥ ९ ॥ गुह्यरोगं विषार्त्तिं च भ्रमं वह्निनृपाद्भयं ॥ स्वस्थानं बंधुम
रणं पुत्रयोगस्य विनाशनं ॥ १० ॥ षष्ठाष्टमव्ययस्थस्य स्य शुभांशः पाके महत्सुखं ॥ पाके शुभफलं प्रोक्तं नृ
पभोगैर्नृपवलं ॥ ११ ॥ आरोग्यं कांतिवृद्धिं च देशग्रामाधिपत्यतां ॥ तृतीयलाभराशिस्थ शनेः शु
भं हृतिर्यदा ॥ १२ ॥ तृतीयलाभराशिस्थशनेः पापहृतिर्यदा ॥ पाके धनापत्तिं दुःखं च भ्रातृवर्गविना
शनं ॥ १३ ॥ विदेशयानं कलहं वैकल्यं मृत्युनाशनं ॥ कुभोजनं परक्षेपं कुस्त्रीसंगमनं भवेत् ॥ १४ ॥
धनस्थितशनेः पाके यदा पापहृतिर्भवेत् ॥ राजदंडं महाविघ्नं कारान्तहनिरोधनं ॥ १५ ॥ उत्साहभं
गं देहार्त्तिं ज्वरातीसारपीडनं ॥ राज्यनाशं गजाश्वानां मरणं वाहनाद्भये ॥ १६ ॥ द्वितीयस्थशनेः पा
के शुभं शुक्तौ मनोहरं ॥ उपकर्तृत्वमन्येषां पूतविद्याविनोदनं ॥ १७ ॥ गानकेलिरहस्यं च भोजनं च व राम· ९१
रम्भृषां ॥ उद्योगसिद्धिं राज्याप्तिं मानो वृद्धिं मकांचनं ॥ १८ ॥ ॥ अथ गुरोरंतर्दशाफलं ॥ ॥ केंद्रत्रि

तस्यजीवस्यदशायां पापिनांहतौ ॥ देहार्त्तिंलभतेदुःखं राजकीयाद्धनक्षयं ॥१॥ कृषिगोभूमिनाशंच
विरोधंबंधुभिःसह ॥ उत्साहभंगंवैकस्यमादौवांत्येशुभंभवेत् ॥२॥ शुक्रौशुभानांतत्कालेगुरोःकें
द्रगतस्यतु ॥ राज्यलाभंमनोत्साहंवस्त्रवाहनभूषणं ॥३॥ दानेहोमंजपंधर्मं तपसासन्नमानतां
॥ सर्वोपिकारंकल्याणं विविधांवरकांचनं ॥४॥ त्रिकोणस्थगुरोःपाकेशुभंशुक्रौमहत्सुखं ॥ प्राका
रगोपुरादीनांनिर्माणंदेवतर्पणं ॥५॥ भाग्योत्तरंमहत्कीर्तिंदारपुत्रार्थसंग्रहं ॥ विदेशयानादाः
प्तार्थयशोविद्याजयंसुखं ॥६॥ तत्रस्थितगुरोःपाकेपापिनांवहतिर्यदा ॥ दारपुत्रनृपक्रोधंबंधू
नांमरणंतथा ॥७॥ बुद्धिभ्रमंपदभ्रंशंकार्यविघ्नकरंतथा ॥ चौरारिदाहपीडांचकुरुतेनात्रसंश
यः ॥८॥ स्वकुलाचारहीनंचपरदाराभिमर्शनं ॥ वंचनेमानहानिंचमतिविद्रुमनाशनं ॥९॥ ष
ष्ठाष्टमव्ययस्थस्यगुरोःपाकेशुभेतराः ॥ करोतिस्वकुलाचारहीनंवाक्यार्थनाशनं ॥१०॥ आत्मार्थिः
बंधुमरणंविदेशनृपसासनं ॥ भूविवादंमनोदुःखंव्याधीनांभयमेवच ॥११॥ गुरोर्नाशगतस्याः

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स.चिं.
९२

पिपरिपाके महत्सुखं ॥ देशग्रामाधिपत्यं च शुभयुक्तौ महद्यशः ॥१२॥ देहारोग्यकरं किंचिन्मनाग्भा
ग्यं च राजप्रिय ॥ शुद्धभोजनवस्त्राणि क्षीरदध्याज्यशर्कराः ॥१३॥ तृतीयायगतस्यापि गुरोः पाके महद्य
शः ॥ सौम्यानां युक्तिकाले तु वस्त्रवाहनभूषणं ॥१४॥ मणिविद्रुममुक्तादिकांचनाद्यं च राजप्रिय ॥ दे
शाधिपत्यं मंत्रित्वं लभते नात्र संशयः ॥१५॥ तादृशस्य गुरोर्दाये पापयुक्तौ महद्भयं ॥ आचारहीनं
कुरुते स्वजनोद्भवनाशनं ॥१६॥ विदेशवासं कष्टं च नानादुःखपरिभ्रमं ॥ एवमादौ दशांते तु सुखं
वाहनभोजनं ॥१७॥ धनस्थितगुरोर्दाये शुभयुक्तौ धनागमं ॥ विद्यालाभं जयं सौख्यं दारपुत्रनृपात्
सुखं ॥१८॥ सर्वेषामुपकर्तृत्वं जनाधीशान्महत्सुखं ॥ भोजनं पौष्टिकं चैव धर्मदाराश्वरादिकं ॥१९
॥ द्वितीयस्य गुरोः काले पापयुक्तिर्यदा तदा ॥ करोति दुःखबाहुल्यं राजाहृतधनं तदा ॥२०॥ बंधुद्वे
षं मनोद्विग्नं वाचिकं दैन्यमेव च ॥ कुभोजनादिदुःकर्मकुत्सितेष्यभावनां ॥२०॥ ॥ इति गुरुः ॥ ॥ राम.
अथ बुधस्यांतर्दशाफलानि ॥ ॥ केंद्रस्थितस्य सौम्यस्य दशायां पापिनां हतौ ॥ कर्मविघ्नं महद्दुःखं म ९२

102

९२

CC-0. In Public Domain. Digitization by eGangotri

नश्यांव स्यमेवच ॥१॥ उत्साहभंगं नोभ्रमिहिरण्यां वरनाशनं ॥ स्थानच्युतिं महद्वेषं विघ्नानाशं समेत्त
दा ॥२॥ शुभशुक्तौ तु वस्यापि पाके कंदगन स्यान्तु ॥ वैवाहिकं यज्ञकर्मदानधर्मजपादिकं ॥३॥ ज्ञानाधि
क्यं नृपात्प्राप्तिं कृषिगोभूमिवर्द्धनं ॥ मुक्तामणिप्रवालादिवाहनांवरभूषणं ॥४॥ ज्ञस्य त्रिकोणे शुक्त
स्य दशायां पापिनां हतौ ॥ दारपुत्रार्थनाशं च कर्मनाशं मनोरुजं ॥५॥ कृषिवाणिज्यनाशं च वंधुना
शमथापि वा ॥ पदभ्रंशं महद्दुःखं वंधुद्वेषं समेन्नरः ॥६॥ तथाविध ज्ञस्य पाके शुभशुक्तौ नृपात्प्रियं ॥
आरोग्यमतिसौख्यं च सौमयान्नादिकं सुखं ॥७॥ स्वनामांकितपद्यानि नामद्वयमथापि वा ॥ औ
जनांवरभूषाप्तिं नरेशत्वं समेन्नरः ॥८॥ षष्ठाष्टमगतज्ञस्य परिपाके तु पापिनां ॥ हृनौ चौराग्निपी
डां च ज्वरातीसारपीडनं ॥९॥ स्ववंधुमरणं क्लेशं भृत्यस्त्रीपुत्रनाशनं ॥ विवादं विग्रहं सर्वैर्वंधुभि
स्समेन्नरः ॥१०॥ तथाविधा ज्ञपुत्रस्य शुभशुक्तौ महद्यशः ॥ आरोग्यं कांतिलाभं च देवभूसुरतर्प
णं ॥११॥ दशादौ फलमेवं स्यात् अंत्ये तु सुखनाशनं ॥ गोमहिष्यादिपीडां च वाक्पारुष्यं नृपाद्भयं ॥१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स॰चिं॰
९३

॥तृतीयायगतस्तस्य भुजंगभुक्तौ शुभं भवेत्॥ मानी धैर्यं महोत्साहं विदेशाद्द्रव्यसंचयं॥१३॥ विद्याजयं
नृपात्प्रीतिं नीजजनं पौष्टिकं तथा॥ यज्ञं वैवाहिकं कर्मपुराणश्रवणादिकं॥१४॥ तथाविधस्तस्य पाके
पापभुक्तौ मनोभयं॥ भ्रातृवनविनाशं च वैकल्यं नृपपीडनं॥१५॥ चौरारिवह्निभीतिश्च कुस्त्रीभ्र
नादिसेवनं॥ कर्महीनं कृषेर्नाशं नजात्मानां तु पीडनं॥१६॥ धनस्थितिनाऽरुपुत्रस्य परिपाके शुभेत
रा:॥ कुर्वंति राजदंडं च वंधनं निगडं तथा॥१७॥ विपत्तिं वंधुविद्वेषं कृषिगोभूमिनाशनं॥ शत्रुतं
सकलैः सार्द्धं नीचाचारविवर्जितं॥१८॥ द्वितीयस्तस्य सौम्यस्य परिपाकेऽर्थलाभभाक्॥ शुभभुक्तौ
नृपात्प्रीतिर्देवब्राह्मणतर्पणं॥१९॥ अध्वरादि महत्कर्म दानहोमजपादिकं॥ वंधुपूज्यं मनोत्साहं वि
धाश्रमं लभेन्नरः॥२०॥ ॥अथ केतोरंतर्दशाफलं॥ ॥केतोश्चतुर्थयस्तस्य यदा पापहतिस्तदा
॥मनोभंगं महद्वेषं नृपचौराग्निपीडनं॥१॥ मातृनाशं नदीयं वा दारपुत्रविनाशनं॥ कर्मनाशंप
दभ्रंशं मातुः स्यात्कसहं वदेत्॥२॥ केतोस्तथाविधस्यापि शुभभुक्तौ नृपाश्रियं॥ देहारोग्यकरं सौ

राम॰
९३
153
९३

ख्यं बंधुभिश्च समागमं ॥३॥ भोजनं वरवस्त्रं चाप्नि मादौ वांतो मनोरजं ॥ उद्योगमन्नं नं कामार्त्तिस्त्वकुसो
द्भवनाशनं ॥४॥ त्रिकोणराशिसुक्रस्य केतोर्दयेिसुभे नराः ॥ इति स्त्रदामनस्तापं कुर्वंति विविधापदं
॥५॥ पुत्रवर्गादिमरणं पित्रोर्नाशमथापि वा ॥ स्थानार्थयोस्तथा यासं भ्रंत्य वंधुविरोधनं ॥६॥ सुभग्र
ग्रहाणां केतोस्तु परिपाके इति यदा ॥ कृषिर्नो भूमि लाभंच विद्या वंधुसमागमं ॥७॥ भोजनं वरः
सौख्यं वधुमित्रादौ फलमीदृशं ॥ शुक्रांते स्थानचलनं मकस्मात्कलहं वदेत् ॥८॥ वक्राष्टमव्ययस्थ
स्य केतोर्दयेिसुभे तदा ॥ इतिः करोति मरणं विदेशं वापदं भ्रमं ॥९॥ प्रमेहमूत्रगुल्मादि राजचौरा
ग्निपीडनं ॥ फलमादौ तदंते च यत्किंचिद् दुःखवर्द्धनं ॥१०॥ शुक्रौ सौम्यग्रहाणां तु इतो स्त्रीपुत्र वर्द्ध
नं ॥ धान्यं वरविभूषाप्तिं मतिप्रवरकांचनं ॥११॥ विप्रसंगं च चौर्यचिन्तौ स्यादिपतनं तथा ॥ वाहनं
भूमिलाभं च गंधमाल्यानुसेवनं ॥१२॥ इत्यंतरागमं चापि स्व वंधुजनपूजनं ॥ पापयुक्तौ तथा के
तोः पापकर्म समाचरेत् ॥१३॥ सर्वेषां विघ्नकर्त्तत्वं वंधुभिस्त्यक्तजीवनं ॥ परखेषां कुव स्त्रे च युक्ताः

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स॰विं॰ ९४

दौष्फलमीदृशं ॥१४॥ शुक्रांते सुखमाप्नोति दारपुत्रधनादिकं ॥ धनस्थितधनस्यापि परिपाके शुभे नरा
ः॥१५॥ कुर्वंति विविधं दुःखं मैत्र्यमत्र मनोरुजं ॥ पुत्रमित्रकलत्राणां नाशनं मृदपदं ॥१६॥ राज्ञाः
चौरेण वा विनं हृद्यनेवंधुनाशनं ॥ शुभंशुक्रौ धनाप्तिं च विद्यावादजयावहं ॥१७॥ परोपकारं सर्वेषां
भोजनांबरभूषणं ॥ शुक्रादौष्फलमेवं स्यादंते किंचिद्धनव्ययं ॥१८॥ वाक्पारुष्यं मनोद्विग्नं च बलक्षयं
नमेव वा ॥१९॥ ॥अथ शुक्रांतर्दशा॥ ॥केंद्रस्थितस्य शुक्रस्य सौम्यानां शुहृतिर्यदा ॥ राज्याप्तिं राज
सन्मानं यानांबरविभूषणं ॥१॥ उत्साहं कीर्त्तिसंपत्तिं स्त्रीपुत्रधनसंपदः ॥ भाग्योन्नतं मनोधैर्यं रा
जदाराधिपत्यता ॥२॥ तथाविधस्य शुक्रस्य पापशुक्रौ धनक्षयं ॥ कुभोजनं कुवस्त्रं वस्तुभक्षविना
शनं ॥ शुक्रादौष्फलमेवं स्यादंते विफलमादिशेत् ॥ कृषिगोभूमिलाभं च दूरदेशाद्धनायतिं ॥४
॥ त्रिकोणस्थस्य शुक्रस्य शुभंशुक्रौ शुभक्रिया ॥ देवब्राह्मणभक्तिश्च सुतदारविवर्द्धनं ॥५॥ यत्नादिक राम॰
र्मलाभं च गोभूषणजयावहं ॥ आरोग्यं देहकांतिं च कीर्त्तिं तीर्थमनोरथं ॥६॥ कुत्सीसंगं कुवार्त्तं वि ९४

तथाविधस्य शुक्रस्य पापशुक्रौ मनोरुजं ॥ अनारोग्यमपमर्यादं नृपचोराग्निपीडनं ॥७॥१ १०५

९४

वंधुद्वेषं मतिभ्रमं ॥ दुःस्वप्नं गोसिपतनमभयकीर्त्तिर्भवेन्नरः ॥८॥ पाके शुक्रस्य दुःस्थस्य शुभभुक्तौ मह
द्यशः ॥ राजसन्मानमथापि च पुत्रस्त्रीधनसंपदः ॥९॥ वस्त्रवाहनलाभाश्च मादोवांत्ये मनोरुजं ॥ वंधुद्वे
षं गुरोर्नाशं स्वकुलोद्भवनाशनं ॥१०॥ शुभग्रहाणां संयुक्तौ देहारोग्यं महत्सुखं ॥ परान्नपदवस्त्राप्तिं
गेधमास्यविभ्रमतां ॥११॥ अन्त्याद्यौ फलमेवं स्याद्दत्ये क्लेशकरं भवेत् ॥ चौरारिदाहपीडां च स्ववंधुज
ननाशनं ॥१२॥ तृतीयायस्य शुक्रस्य परिपाके शुभे नराः ॥ इति दुःखमवाप्नोति धनधान्यविनाशनं
॥१३॥ उद्योगभंगं क्लेशं च रोगाग्निनृपपीडनं ॥ भूविवादं स्ववंधूनां नाशनं स्वपदस्य च ॥१४॥ तथा
विधस्य शुक्रस्य शुभभुक्तौ महत्सुखं ॥ नृपात्सूखं मनोधैर्यं दिशग्रामाधिपत्यता ॥१५॥ वाहनं भूष
णानि च पुत्रस्त्रीभृत्यसंपदः ॥ कूपारामतडागानां निर्माणं धर्मसंग्रहं ॥१६॥ धनस्थस्यापि शुक्रस्य
शुभभुक्तौ महत्प्रियं ॥ दारपुत्रार्थलाभं च स्ववंधुजनरक्षणं ॥१७॥ विद्याजयं मनोल्लासं देवभूसुर
तर्पणं ॥ यज्ञादिकर्मलाभं च स्वभेन्नामदयं तथा ॥१८॥ धनस्थितस्य शुक्रस्य पापभुक्तौ भृशं वदेत् ॥ रा

जदंडं मनोदुःखं हृत्कुदाक्षितिपपीडनं ॥१९॥ विद्यावादं कृषेर्नाशं कार्यहानिं पदच्युतं ॥ वह्निचोरारिभीतिं
स·चिं· च लभते नात्र संशयः ॥२०॥ ॥इति सर्वार्थचिंतामणौ षोडशोध्यायः॥ ॥ग्रंथोयं समाप्तः॥ ॥ ॥
९५ यद्यज्जन्मनि नक्षत्रे वह्निभावमुपेयुषि ॥ तस्य श्रीरायुरारोग्यं भवत्येव विनिश्चयं ॥१॥ तिथ्यादिषु त
थावाद्यं स्मये तल्लिन्नयो भवेत् ॥ तिथिरेकगुणा प्रोक्ता नक्षत्रं दशगुणं भवेत् ॥२॥ लग्नं सहस्रगुणं प्रोक्तं
तत्सद्गृहे फलादिकं ॥ ॥केंद्रस्थिता जन्मनि यस्य कस्य पापाश्च सर्वे विफलप्रदाः स्युः ॥ कुर्वंति दारिद्र्यम
नेकदुःखं श्वासं क्षयं प्लीहगुदोदरार्त्तिं ॥३॥ पापग्रहे कर्मगते तिनीचेव क्वाप्विते पापखगैः प्रदृष्टे ॥ ना
शं कलत्रस्य वदंति नूनं मुनीश्वरास्तत्र वदने कशास्त्रे ॥४॥ दुःखी मृतो सोकविद्वेषकारी कामः पंगुर्निर्धि
नो मानहीनः ॥ स्यादायुः स्यात्केंद्रगाः पापखेटाः खलु देवी वाप कीर्तिं विलसदेव ॥५॥ शंकराचार्यस्क्ता ॥ ॥
लग्ने माने सप्तमे वाथ वंधौ पापाः खेटा जन्मकाले तु सर्वे ॥ निष्ठं त्येवं स्व स्वमायुःप्रमाणं ने पामेको स
न्नपो वा यदि स्यात् ॥६॥ तथापि तत्रोगफलं प्रमाणं नादृग्निधं स्यान्मुनयो वदंति ॥ सन्नीचभागादि राम· ९५

105
९५

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स.चिं.
९६

माहीपयोगेप्येकं फलं दुःखितनिर्गतायुः ॥७॥ तथास्थितेऽजन्मनि यस्य कस्य वास्येव पित्रोर्मरणं वक
ष्टे ॥ त्रिकाशने नाम्बुदरस्य पूर्त्तिर्दानवत्येव तदंग हीनं ॥८॥ स्वनीचभंगादि महीपयोगे जातेपि य
स्यापि नरस्य कस्य ॥ केंद्रत्रिकोणेषु शुभा यदि स्युस्तदा जयोगं सफलं वदंति ॥९॥ स्वे शेक्षिते सन्नग
ते क्रमांशे जीवेन दृष्टे धनराशिपेन ॥ स्वनीचभंगादि महीपयोगे जातोपि भूमेरधिपत्यमेति ॥१०॥
एवं चिंतामणौ प्रोक्तं वेंकटेशेन धीमता ॥ नीचभंगादियोगार्थ राजयोगादिजं फलं ॥११॥ ॥

राम.
९६

CC-0. In Public Domain. Digitization by eGangotri

106

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

8909

ग्नेश्च मा पा ... म चा ... स्वपा मुस्मम घान्चा ता ... मस्वाहा ... इद मपजम् ... पु ... ता

यामे वां ॐ आकूतिमग्निं प्रयुजं स्वाहा मनोमेधामग्निं प्रयुजं स्वाहा ॐ वाचो विधृतिमग्निं प्र
युजं स्वाहा चित्तं विज्ञातमग्निं प्रयुजं ॐ वाचो विधृतिमग्निं प्रयुजं स्वाहा प्रजापतये मनवे
मे चाम्पम वरुणो हतानु॥ धां मंते विश्वम्भुवनमधिश्रितमतः समुद्रे हृद्यन्तरायुषि॥ अपां म
नीके समिथे य आभृतस्तमश्याम मधुमन्तं त ऊर्मिम्॥ पुनस्त्वादित्या रुद्रा वसवः स
मिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः। घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य
माः॥ ततो यजमानेन वैश्वानर प्रजमं च संब स्वाहि॥ एषोसीति पुनः पृतनम्॥
स्याद्वि धीमहि समिदसि तेजोसि तेजो मयि धेहि॥ अग्ना इद्धा विस मी च मयो ... त प
त्यमिद्वृतं त्वं श्रद्धा वोपि मी ... वा दीक्षितो ... म्॥ ततस्त्रवेण मस्मानीय त्र्यायु
मायुष्यं यम दग्धेर इति ललाटे। कश्यपस्य त्र्यायुषमिति ग्रीवायां॥ यद्देवेषु त्र्यायुषमिति हृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

श्रीगणेशाय नमः॥ ॥प्रणम्य भानुं त्रिजगज्जनस्य मशेषदोषस्थितिनाश
हेतुं ॥दैवज्ञबोधाय मृदुस्फुटार्था व्याख्यायते ज्योतिषरत्नमाला॥ ॥सा
मः शर्मप्रसादेंदुविवृद्धमतिवारिधिः ॥ महार्घ्यां विद्वत्कंठभूषणरत्नमालां समुन्मे
लं॥ ॥अत्र तावदयमाचार्यो प्रारब्धग्रंथस्य वेद्यो तृणमात्मनश्चा
शेषान्तरायोपशमाय इष्टदेवतानमस्कारो भवतीति तत्समाद्यमपि कश्यपवं
शापुंडरीकमार्तंडः समस्तभौमिकचक्रशिरोमुकुटमाणिक्यकांतिनीराजि
तपदद्वंद्वो महाकारुणिकः श्रीपतिनामा श्रीकेशवपौत्रः श्रीनागदेवपुत्रो ग्र
हगणितपाटीगणितबीजगणितेषु सकलनिश्चलमतिर्विविधहोरातंत्रशास्त्रस्य प्रणे
ताः शास्त्रवनस्पतेः संहिताप्रवफलानीव वक्ष्यमाणजातकर्मनाम करणमौंजी

माला

१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बंधविवाहयात्रादौ गर्गादिसंहितामार्याविस्तरतो ज्योतिर्दिवसमायास्यमा
नमानवसंदैवज्ञनिवहमवेक्ष्य संजातदयो निखिलसंहितार्थमल्पग्रंथेना
भिधातुमिच्छुः समुचितेष्टदेवतानमस्कारं मालिन्याह ॥ ॥श्रीगुरुभ्योन
मः॥ ॥श्रीगणपतयेनमः॥ ॥श्रीसरस्वत्यैनमः॥ ॥श्रीसारदायैनमः
॥ ॥अहं श्रीमच्छ्रीपतिनामानंकालमभिवन्दे नमस्करोति ॥ किंभूतमीसस्वा
मिनं थापकनिमित्तस्य ॥पुनः किंभूतं विश्वजन्मात्ययानिमित्तं ॥ विश्वस्य त्रै
लोक्यस्य स्थावरजंगमादेर्जन्म उत्पत्त्ययो मृत्युर्यादि नाशास्तेषां कारणः ॥ एते
नोत्पत्तिस्थितिरथी स्यातीति ॥ तथाच वराहसंहितारंभ उत्पलेनोदाहृतं ॥ कलः
सृजति भूतानि कालः संहरति प्रजाः ॥ कालः सुप्तेषु जागर्त्ति कालो हि दुर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका तिक्रम्या कालेन वीतेरन्दोम्नः कालेनातीविनवीतिन:॥ कालस्य पुन: कर्त्तापु
श्रीगणेशाय नम:॥ ॥प्रश्नविवेरतिमस्य॥ ॥श्रीरामाय॥
न: कर्त्तापुराणते येम्ना येर॥ अथ कीवसुजन्मा व्ययानामितिवहुवचननिष्य
तिल भ्यते॥ यथा मे केस प्रोति वुनाव शा नौ मनु वास यौक ल्याक स्प ईनौग्रहन
दात्र मुनि प्रत यस्तस्मात् कालपतस्या स्थिति संहारनिमित्तं निमित्तेकारणं॥ त
२ थाम्व्यायिक कीरण थ लयो सर्वोत्पत्ति मतं निमित्तकारणं कालः॥ तत्समेतद्वि
तादितो: पृथक् दसंयोगाविभागवर्जीका लक्समे धतानाम सवाय कारण काल॥ माला
कालस्य कडु यद्वा दसवाय कारणं न घटते:॥ असमवायकारणं॥ गुनकर्मनोरे २
वातानि समात:॥ यत्रयोस्मन् कालो विघयते प्रासक्ता: सनकादयो योगी नोपी प्रम १८

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वविरतिमध्यः ज्ञानवंध्या नमातीर्मितिरुरे. अवर्त्ततेप्रभवदोत्पत्ति विरतितरव

॥ ॥ज्ञानवंध्यानितांतं॥ ॥

सानंमध्यमंतरालेप्रभवविश्वः विरतिश्चमध्यान्ते षंज्ञानंमध्यधारयात
नज्ञानंवंध्याज्ञानहीनाकालस्यादिमध्यावसानयोगि नोपिनाधंरति
त्पर्थः॥ तद्धितैर्ज्ञानज्ञत्वाभाविष्यतिमाहः॥ विदितपरमतत्त्वा विदितेना
नेपरमतत्त्वे॥ पंचविंसतितत्वं प्रकृत्यं स्वरूपं येस्ततथा॥ पंचविंसतितत्वानि
तथापंचबुद्धिः॥ इन्द्रियाणि॥ श्रोत्रतत्वक्चक्षुर्जिह्वानासिकारूपा॥ पंचकर्मे
न्द्रियाणि॥ गुह्यः हस्तपादवाग्गुह्याणि॥ पंचतन्मात्राणि॥ सब्दस्पर्शरसरूप
गंधाख्यानि॥ पंचभूतानि॥ पृथिव्यापस्तेजोवाकाशादि॥ मिमनोकारो बुद्धि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

प्रकृतिपुरुषाविति अथ यथा विश्वपूर्वे तामसान् प्रकृतिर व्यक्तं सत्त्वरजस्तमसां साम्याव २
स्था सा क्रियया विजिगीषया पुरुषाधिष्ठिता सर्गाय प्रवर्त्तते तस्या महान् महतो ऽहं
कारः सं ज्ञं ततो ऽहंकारस्त्रिविधः सात्त्विको राजसस्तामसश्चेति॥ तत्र सात्त्विकाहंकारा
द्वैकृतात् सात्त्विकादेकादशेन्द्रियाणि पंच ज्ञानेन्द्रियाणि पंच कर्मेन्द्रियाणि तामसाद्भूतादिसंज्ञात
न्मात्राणि॥ सदादि निरजसा तेजसात्वादहंकाराद्भयमपि भवति॥ राजसाहंका माला

॥ ॥विविदितपरमतत्वा॥ ॥

२ भूतिभौतिकस्वरूपनामसाहंकारो सर्गाय प्रवर्त्तमानान् महतो राजसतन्मात्रेभ्य
पंचमहाभूतानि तत्र शब्दतन्मात्रादाकाशं शब्दगुणं शब्दतन्मात्रात् स्पर्शसहितात् स्पर्शसहि
तन्मात्राद्वायुः शब्दस्पर्शगुणः शब्दस्पर्शतन्मात्रसहिताद्रूपतन्मात्रात्तेजः शब्दस्पर्शरूपगु १५

न सब्दस्पर्शरूपतन्मात्रासहिताद्रसतन्मात्रादापः सब्दस्पर्शरसरूपगुणाः ॥ सब्दस्पर्शर
सरूपतन्मात्रासहितः गन्धतन्मात्रात् सब्दस्पर्शरसरूपगन्धगुणाः ॥ पृथिवी जायते ॥ प्र
ब्रह्माण्डं जीवं विना देहं जायते ॥ तत्र सति पुरुषयोः भेदज्ञानं अभ्यासात् ज्ञानमुत्पद्यते ॥ त
थाच ॥ सा बुद्धिः महान् ॥ मनोहंकारस्तस्मात् उत्पद्यते षोडशकस्तस्मादपि षोडश
